श्रीरेवतीकान्त भट्टाचार्य्यस्य ।

प्रबन्धकल्प-लतिका ।

सार्, आर्, सि, मित्र-इनष्टिटिउसननामधेय-उच्च-
इंरेजिविद्यालयस्थप्रधानसंस्कृताध्यापकेन
श्रीयुक्त रेवतीकान्त भट्टाचार्येण
सम्पादिता ।

—:०:—

संस्कृतपुस्तकालयात्
श्रीअखिलबन्धु भट्टाचार्येण
प्रकाशिता ।

——

५८ नं कर्णओयालिस् ष्ट्रीट्,
संस्कृतपुस्तकालय,
कलिकाता ।

मूल्यम् सार्द्धरूप्यकम्, १॥० ।

प्राप्तिस्थान—
श्रीअखिलबन्धु भट्टाचार्य्य,
संस्कृतपुस्तकालय,
५८ नं कर्णओयालिस, ष्ट्रीट्,
कलिकाता ।

कलिकाता—५ नं छिदामसुदिर लेन,
"शास्त्रप्रचार-प्रेस"
श्रीकुलचन्द्र दे द्वारा मुद्रित ।

निवेदनम् ।

अयुक्तं यदिह प्रोक्तं प्रमादेन भ्रमेण वा ।
दीने मयि दयावन्तः सन्तः संशोधयन्तु तत् ॥

विगतशारदीयपूजावकाशानन्तरमेव इयं "प्रबन्ध-कल्पलतिका" आयसाक्षरविन्यस्ता प्रकाश्यतामिष्यतीति समन्तात् प्रचारितवानासम्। किन्तु तदारभ्य ग्रन्थस्योपादानादीनां (Paper ink etc.) प्राच्यदेशीय-महाहव-निबन्धनदुष्प्राप्यतया सा आशा सुदूरपराहतेव जातेति नितरां लज्जितोऽस्मि तच्चिन्तयितुमपि। यद्यपि एतावता कालेन केवलं ग्रन्थसमूह-समालोचनं पौराणिकेतिवृत्तमालम्ब्य संवृत्तं, तथापि वैदेशिक-ग्राहकाणामाग्रहातिशयेन तथान्तरङ्गबन्धुवर्गनिर्ब्बन्धबाहुल्येन च इममंशमादायैव प्रथमपाठः प्रथमांशो वेति निर्द्दिश्य इयमेव प्रबन्ध-कल्पलतिका जनसमाजे प्रथमं प्रकाशिता।

समालोचनाया गुरुत्वमवितथं सर्व्वजनविदितम्। अतो मादृशानामल्पधियामस्मिन् समालोचने यत्नः केवलमुपहासायैव नास्त्यत्र कोऽपि सन्देहावकाशः; तथापि बलवद्वासनावासितान्तःकरणस्य स्वाधिकारमविचारयतो मे मनस्विनामपि दूरारोहे कर्म्मणि प्रवर्त्तमानस्य अनुष्ठानमिदं नास्मद्विचारसहं, सहृदयहृदयमेवात्र प्रमाणम्।

यन्त्वस्थितेऽस्मिन् ग्रन्थे शरीरास्वस्थतया, तथा क्रूरकालस्य कुलिश-कठोरशासनेन शिशोरनुजात्मजस्य आकालिकमहा-

प्रयाणेन च——यस्य तावत् विकशत्-कुसुमकोरकमिव कोमलं मुखमण्डलं, अलक्तरञ्जितनवनीतमिव कान्तं काय-सन्निवेशं, अच्चैरुच्चरितं पीयूषवर्षि वाक्यजातं नाद्यापि विस्मरामि ; प्रत्युत मूर्त्तिमतीव तत्स्मृतिरहर्निशं मां तद्दर्शनप्रलोभनेन प्रतारयति व्यथयति च नितराम्। तथाविधान्तर्निहितसन्तापमशमयन् संशोधन-प्रयासं यथायथमङ्गीकर्त्तुमसमर्थं आयसाच्चरनियोजकानां अनवधानतया कुत्रचिद्भ्रममवलोकयद्भिः सहृदयैर्भवद्भिरनुकम्पनीयोऽयं जनः। आशंसते च नवीनेनानेन ग्रन्थेन यदि कस्यापि कथं कथमप्युपकृतिर्भवेत् तदा श्रमोऽयं साफल्यमेष्यतीति।

एतदपि वक्तव्यं यत् श्रीमदुयज्ञेश्वरवेदान्तभूषण,-श्रीमद्रोहिणीकान्तसांख्यतीर्थ,—श्रीमत्कालीपदकाव्यव्याकरणतीर्थ,-श्रीमत्ताराचरणकाव्यतीर्थ,-श्रीमन्नरेन्द्रनाथकाव्यव्याकरणसांख्यवेदान्ततीर्थ,-श्रीमच्चण्डीचरणव्याकरणतर्कतीर्थ,-कविराज-श्रीमत्श्रीकृष्णप्रसन्नस्मृतितीर्थप्रमुखैर्महोदार-चरितैरस्मिन् ग्रन्थसङ्कलने निरतिशयं साहाय्यं कृतं, अतोऽपरिशोध्यं तेषामृणम्। श्रीपरमेश्वरसकाशे तेषां दीर्घजीवनं सदैव प्रार्थनीयमिति शम्।

विष्णुपुरस्कुल। १९१६ खृष्टाब्दीया दूर्व्वाष्टमी।	विधेयस्य श्रीरेवतीकान्तदेवशर्म्मणः।

ॐ पितृभ्यां नमः ।

ग्रन्थार्पणम् ।

आसीदाशशिसूर्य्यमूर्ज्जितयशा विद्योतितस्तेजसा
विद्यासेवधिवारिधिर्निरवधिः श्रीचन्द्रनारायणः ।
काश्यां धीरधुरन्धरेषु महतीं भीतिं समुत्पादयन्
लीलाभिर्व्विचचार चारुचरितो यो न्यायपञ्चाननः ॥

दीप्तः कीर्त्तिविभाभिराविरभवत् तस्माच्च रत्नाकरात्
राधाकान्तशिरोमणिर्म्मलिनतासम्पर्कशून्यश्चिरम् ।
येनादर्शि गभीरशास्त्रगहनेष्वर्थो निगूढ़ः स्फुटम्
पूतं नाम पितुः समुज्ज्वलयता चौणीमलंकुर्व्वता ॥

सूनुस्तस्य महोदयस्य रजनीकान्तेतिनामाभवत्
लोकातीतमनीषयातिनिपुणस्तर्कादिविद्यानुगः ।
तेभ्यो ग्रन्थमिमं तदन्वयभवः श्रीरेवतीकान्तकः
भक्त्याद्यार्पयते प्रबन्धलतिकासंज्ञं निवापोपमम् ॥

प्रबन्धकल्प-लतिका ।

मृच्छकटिक-विषयिणी समालोचना ।

मृच्छकटिकं नाम प्रकरणं शृङ्गाररसात्मकम्, अस्य कविः सामाजिककाव्यकुशलः शूद्रको नाम । यस्य काव्यरसप्रवाहः सरलया भाषया विस्फूर्जितो हरति हृदयं सहृदयानाम् । अस्य तावत् काव्यस्य प्रतिपदमेव प्रसरति रसप्रवाहः । प्रसादगुण-सम्वलितया च रचनया भूयानलौकिकानन्दः सञ्जायते स-चेतसां चेतसि । अभिनयकाले चास्य कुतश्चिदननुभूतमिव स्वर्गसौन्दर्य्यमुपतिष्ठते । मन्दारकुसुमस्रगिव गलविलम्बिनी स्वर्गीयामुपपादयति प्रेम-धाराम् । प्रतिज्ञातञ्च यत् यत् प्रस्ताव-नायां, तत् तत् सर्व्वमक्षुण्णमेव सम्पादयामास कविः काव्यदिशा । तथाहि प्रस्तावनायां प्रतिज्ञा—

"तयोरिदं सत्सुरतोत्सवाश्रयं
नयप्रचारं व्यवहारदुष्टताम् ।
खलस्वभावं भवितव्यतां तथा
चकार सर्व्वं किल शूद्रको नृपः ॥"

प्रतिज्ञानुरूपञ्च विहितं कविना काव्यप्रणयनविधौ, तथा च राजश्यालकस्य शकारस्य चरितमन्तरा निवेश्य खलस्वभावं व्यवहारप्रकारमुपवर्ण्य नीतिप्रचारं, अकाण्डे वसन्तसेनायास्तथा समागमम्। अत्यन्तविपत्पातसम्भावनायामपि भवितव्यतां चारुदत्तस्य निर्दोषस्यापि दण्डविधानार्थं श्मशानभूमौ संप्रेषणनिवेशेन व्यवहारदोषं तथा चारुदत्ते वसन्तसेनानुरागमालिख्य सत्सुरतोत्सवं सम्पादयन् कविः कां नाम रचनायामुत्तमतामादर्शयामास। अपि च गणिकाया अपि तथाविधं स्वार्थं;माल्मविसर्जनं नूनमलौकिकमिति। अन्तुतश्च तस्या वसन्तसेनायाः प्रतिपदमेव निःस्वार्थताविकाशः।

भूयानयं गुणः कविप्रवरस्य यदसमञ्जसोऽपि गणिकात्मजाया वसन्तसेनाया भावनिवहः समञ्जसतया विवक्षित इति, चारुदत्तस्य च तथा प्रतीयते दीनातिदीनस्यापि चरित्रशुद्धिः यथा परमैश्वर्य्यवतामपि सर्व्वथा दुर्लभतया ज्ञायते। अपिचास्य सरलभाषाशुद्धतया सरलभावसमाश्लिष्टतया च प्रसादगुणबाहुल्यवती रचना नितरां सहृदयहृदयचमत्कारिणी श्रुतिमात्रेण स्वभावतो जात इव भावनिवहः परितर्पयति तदानीमात्मानम्। तथाहि—'दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते। संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते॥' 'गर्ज वा वर्ष वा शक्र, मुञ्च वा शतशोऽनिशम्। नहि शक्याः स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति॥' इत्यादिवाक्येषु कविर्यथा भावनिवहं

प्रतिपादयितुं सयत्न आसीत्, तथा तथैव सारल्येन लोकैः प्रतिपद्यते श्रुतिमात्रेण, अयमेक एव प्रधानतमो गुणः कवीनां नाम। लौकिकव्यवहारविज्ञानञ्च काव्यपाठस्य प्रकृष्टं फलं, तच्च सामाजिककाव्यपाठेन यथा लोकानामधिगतं स्यात्, न तथा काव्यान्तरानुशीलनेनेति। तथाहि—समाजेषु यथा यथा प्रचरन्ति स्वभावतो भावनिवहाः, यथा च व्यवहारजातानि, ते ते नूनमद्याप्यपि स्वाभाविकतामुपयान्ति। प्रायश एव अनुभूतरसेषु अलौकिकेषु भावेषु चिन्तासंक्रमे च कथं अत्रानुरागः ? अननुरक्ततायाञ्च कथं तच्चरितस्य नितरां परिशुद्धस्यापि शिक्षा नाम ? अपि च नान्दीमुपक्रम्य—'गौरीभुजलता यत्र विद्युल्लेखेव राजते।' इत्युपमासंश्लिष्टभावनिबन्धेन शृङ्गाररसमयमेव नाटकं संपत्स्यत इति मुख्यतो ज्ञापितम्। तदप्यत्तुमाभीष्टस्य प्रकृष्टतामुपधत्ते। अन्यच्च प्रस्तावनायां—'क्षुधा ममाक्षिणी खटखटायते' इत्यादिना दारिद्र्स्य विकाशस्यापि भूयः प्रकम्पितव्यता सूचिता। शकारवाक्येषु असामञ्जस्यञ्च सूचितम्। यथैषां चरित्रपरिदर्शनेन रूपकलक्षणमव्याहतं स्यात्, लोकशिक्षा च सम्यक् सम्पद्यते, तथैव कविः कौशलेन कृतवानिति। प्रथमतो नाटके मुख्यभावेन दुश्चरित्रं सुचरित्रञ्च समवस्थाप्य पात्रं तयोरुत्कर्षप्रकर्षौ पर्य्यालोच्य समाजशिक्षानैपुण्यं समादर्शितम् कविवरेण। तथा च शकारः सर्व्वपापमूर्त्तिरिव समुपस्थितः, परिणामकठोरतां पापकर्म्मणां परिचाययामास

निपुणम्। चारुदत्तश्च भूयः कठोरास्वपि दशासु निमग्नः परिणामे रमणीयं भावं समालेभे। नूनमेष स्वाभाविकः प्रकारः। यत् पापिनामधोगतिः कष्टातिशयसंसर्गश्च, पुण्यात्मनाञ्च समुन्नतिः परिणामे प्रमोदलाभश्च। अत एव ये ये पापात्मानः शकारप्रभृतयो दुष्कर्म्मकारिणः पुण्यात्मानश्च चारुदत्तवसन्तसेनादयः ते ते योग्यतमामेव भूमिमधिरोहन्तः समाजशिक्षाविधिमपूर्व्वभावेन सहृदयहृदयेषु सम्पादयन्तः परमानन्दपदवीं प्रवर्त्तयन्ति। जात्या निकृष्टस्यापि यदेकान्त-स्वभावसौष्ठवं वृत्तया नीचस्यापि यदुत्कृष्टचारित्रम् इति द्वयं सम्पादयामास, चण्डालद्वयं शकारभृत्यञ्च समुपस्थापयन् पारिषदनेत्रयोः शूद्रकः कविः कल्पनाकुशलो नाम। एवमिदं काव्यं समालोचनासु प्रकर्षमुपाधत्ते, कुतोऽस्तु सहृदयानामेतत्काव्यसमालोचनायां निरुन्मुखत्वं स्वत एव सञ्जायतेऽत्र प्रकरणे भूयाननुरागः। आपाततश्च काव्यजगति प्रकृष्टमेव पदमुपाश्रयते मृच्छकटिकं नाम प्रकरणं, कवेश्च प्रकरणेनानेन प्रकृष्टमेव प्रतीयते समाजशिक्षापारदर्शित्वं अव्याहता च सञ्जायते तच्छिक्षेति।

मृच्छकटिकप्रकरणस्य संक्षिप्तेतिवृत्तम् ।

अस्य तावत् प्रकरणस्य प्रथमेऽङ्के—वश्यवृत्तिपरिगृहीतस्य द्विजचारुदत्तस्यावस्थापकर्षात् दारिद्रानुभवसमुत्थो निरतिशयो खेदः, नृपश्यालकस्य शकारस्य चारुदत्तानुरक्तां गणिकां वसन्तसेनां गृहीतुं महानेव प्रयासः, तत्प्रतिकूलाया वसन्तसेनायाश्चारुदत्तभवनप्रवेशः, तत्राभरणन्यासश्च। द्वितीये—द्यूतकराणां बहुच्छलं क्रीड़ितं, पणादानप्रकारः, वसन्तसेनासम्बाहकसम्बादः, कर्णपूरकप्रवेशः, वसन्तसेनायाश्चारुदत्तानुरक्तिप्रकाशश्च। तृतीये—चारुदत्तावासे शर्व्विलकस्य सन्धिखननम्, वसन्तसेनान्यासीकृतालङ्कारभाण्डापहरणञ्च। चतुर्थे—न्यस्तालङ्कारविनिमयेन रत्नावलीहारप्रदानाय मैत्रेयस्य वसन्तसेनायाः गृहगमनम्, तत्र तस्याः [illegible]ऐश्वर्य्यविलोकनम्, मदनिकाशर्व्विलकमिलनं, अलङ्कारभाण्डाधिगतिश्च। पञ्चमे—दुर्द्दिनवर्णनप्रकारः, चारुदत्तभवने वसन्तसेनायाः समागमनञ्च। षष्ठे—भूपचारकप्रणष्टस्य गोपालदारस्यार्य्यकस्य शकटविपर्य्यासेन चारुदत्तान्तिकागमनम्। सप्तमे—चारुदत्तार्य्यकसंवादः। अष्टमे—यानविपर्य्ययेण वसन्तसेनायाः संस्थानकोद्यानप्राप्तिः, संस्थानस्य वसन्तसेनामोटनञ्च। नवमे—वसन्तसेना चारुदत्तेन मोटितेति शकारस्याधिकरणे मिथ्याव्यवहारायणम्, विचारप्रकारश्च। दशमे—शूलारोहणाय चारुदत्तस्य श्मशान-

भूमावानयनम्, चारुदत्तस्य तद्वान्यवानाच्च खेदोक्तिः, वसन्तसेनासमागमः, आर्य्यकस्य राज्याधिगतिः, सदारापत्यस्य तावद्वासनविपर्य्ययः, शकारनिर्य्यातनं, चारुदत्तस्य तदपराधमर्षणञ्चेति।

मृच्छकटिकप्रकरणस्य नायकादि-सिद्धान्तः।

[नायकश्चारुदत्तो धीरप्रशान्तः, अनुरक्ता गणिका वसन्तसेना, कुलजा स्वकीया मध्या धूता च नायिके, चालम्बनविभावाः, प्रावृट्समयोदयादय उद्दीपनविभावाः, अन्योऽन्यालापाच्चिक्रियादयोऽनुभावाः, निर्व्वेदादयो व्यभिचारिणः, रतिः स्थायी, सम्भोगशृङ्गाररसोऽङ्गी, करुणहास्यादयोऽङ्गरसाः, विटचेटविदूषकाद्याः सहायाः, रीतिः लाटी, गुणः प्रसादाख्यः, प्रस्तावना कथोद्घातरूपा इति।]

मुद्राराक्षसविषयिणी समालोचना।

मुद्राराक्षसनामधेयं वीररसात्मकं दृश्यकाव्यम्। अस्य तावत् कविः सुपण्डितो विशाखदत्तो नाम। महाराजस्य

पृथोरङ्गजः, सामन्तवटेश्वरदत्तस्य च नप्ता। यस्य कवितारसनिष्यन्दैरानन्दपरम्परां समभिनन्दन्ति काव्यरसरसिकाः। रूपकेऽस्मिन् महती विद्यते रचनाविन्यासचातुर्य्यमयी गभीरता, यद्धि प्रतिपदमेव समुन्नयति समादधाति च कवीनां वीररसोन्मादम्। तथा च प्रस्तावनायाम्—'आः! क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति बलात्।' इति प्रारम्भ एव वीररसप्रकर्षं नाम। अपिच नान्दीमारभ्य यथा कविना प्रदर्शितं शब्दविन्याससार्थक्यं रचनापाटवञ्च तत्तत्सर्वमतिशयमेव हृद्यमिति। प्रथमतस्तु कुटिलनीतिबाहुल्यमयस्य नाटकस्यास्य नान्द्यामेव प्रसभमुद्भासितः कुटिलनयो रचनाकुशलेन कविना—'धन्या केयं स्थिता ते शिरसि? शशिकला, किन्नु नामैतदस्याः?' इत्यादिना 'पादस्याविर्भवन्ती मवनतिमवनेः रक्षतः स्वैरपातैः' इत्यादि द्वितीयनान्दीश्लोकेन च क्रोधवह्निना नन्दवंशवत् सराक्षसं मलयकेतुं समर्थस्यापि चाणक्यस्य राक्षससंजिघृक्षानुरोधात् कष्टेण कुटिलनीतिप्रयोगाभिनिवेश इति धन्यर्थेन प्रकृतोपयोगित्वमुट्टङ्कितम्। 'क्रूरग्रहः स केतुः' इत्यादिना च प्रस्तुतार्थमुपक्रम्य भूयः कौशलमुपन्यस्तं, यथा च तत्र प्रस्तावनालक्षणसङ्गतिः, न तथा प्रायः प्रतिपद्यते रचनास्वन्यासु। रचना चास्य रूपकस्य चित्तविक्षेपसंसाधिन्योजोगुणप्रधाना नाम। यया पताकास्थानकादीनां राजनीतिचातुर्य्यादीनाञ्च बहुलसन्निवेशेन रमणीयतामपूर्व्वामुपधत्ते

नाटकमिदम् । अलङ्कारसमलङ्कृतत्वं रचनानां, रसोपयोगित्वं भाषाणां, गम्भीरत्वञ्च भावबन्धानाम् इत्येते नाना गुणा एव तत्र स्फुरन्ति समनुसन्धीयमानाः । नाटकोक्तसन्धीनां यथालक्षणं सुसन्निवेशः । तेषां तेषां प्रकृष्टचरितानां नैपुण्येन रसोद्भासकत्वं घटनायाः सुसमञ्जसता नूनमिति गुणाः प्रसरन्ति कविप्रतिभाप्रत्यायकाः प्रशस्यतमाः, 'कार्य्योपक्षेपमादौ' इत्यादिभिः, 'मध्ये निश्चितमन्वयेन कथितम्' इत्यादिभिश्च प्रकृतोपयोगिभावसंरक्षणेन च पाण्डित्वविकाशः कवेः सुव्यक्तम् । 'प्रणमत यमस्य चरणे' 'कमलानां मनोहराणामपि' 'पीत्वा निरवशेषं कुसुमरसं' इत्यादिषु प्रकृतोपयोगिगूढ़ार्थसन्निवेशेन कविप्रतिभा सुतीक्ष्णतमा परिज्ञायते । कुटिलनीतिप्रधानस्य च नाटकस्य कुटिलनीत्यर्थगर्भतयैव मुद्राराक्षसमिति नामधेयम् । इत्येवं मुद्राराक्षसं प्रकृष्टतरं नाटकमिति । अत्र न तथा कश्चिद्दोषो विलसति, यथा रसोच्छेदः सम्भवतीति नानागुणसन्निवेशश्च काव्योत्कर्षसाधको वर्त्तते, तथा च, 'ध्वनिस्तत् काव्यमुत्तमम्" इति दर्पणोक्तकाव्यप्रकर्षसंसाधकव्यङ्ग्यार्थबाहुल्येन मुद्राराक्षसमुत्तमं काव्यमिति कोऽत्र विसम्वादः । अपि च मृच्छकटिकाख्यप्रकरणे पुनः पुनरुद्दीप्तिदोषेण पञ्चमाङ्कादौ भूयान् रसच्छेदः प्रपद्यते अस्वाभाविकता च । तथा च बहुप्राकृतभाषया अनधिगतार्थकतयेव मूढ़तामाभजते काव्यविदामपि साधारणानामन्तःकरणम् । रचनागभीरतायामपि

प्रकृष्यते मृच्छकटिकात् मुद्राराक्षसं नाम नाटकम्, अवश्यमिदमभ्युपगन्तव्यम्, यत् समाजशिक्षामात्रसमुद्देशी समाजस्य स्वाभाविकावस्था-पर्य्यालोचनमात्रापेक्षी च कविवरः शूद्रकः सरलया भाषया सरलेन च भावनिवहेन काव्यं प्रणीतवान्, का तत्र हीनतेति? तथापि रूपकद्वयसमालोचनायां नानागुणसम्बलिततया न मुद्राराक्षसमपकृष्टपदवीमधिशेते। काव्योत्कर्षसंसाधकगुणबाहुल्येनैव काव्योत्कर्षः संसाधयितव्यः। कविप्रकर्षन्तु समाजशिक्षाविधानादिपारदर्शितयापि सञ्जायते, इत्यलं बाहुल्येन।

मुद्राराक्षसस्य सङ्क्षिप्तेतिवृत्तम्।

अस्य तावत् मुद्राराक्षसनाटकस्य प्रथमेऽङ्के—परमनीतिज्ञस्य चाणक्यस्य राजनीतिसंशीलनम्, प्रणिधिमुखात् प्रतिपक्षाणामाचेष्टिताकर्णनञ्च। द्वितीये—चारराक्षससंवादः, राक्षसस्य चरमुखादात्मप्रयोगवैफल्यश्रवणञ्च। तृतीये——चाणक्यस्य वसन्तोत्सवनिवारणापदेशेन चन्द्रगुप्तेन सह कृत्रिमकलहः। चतुर्थे—प्रणिधिमुखतः कुसुमपुरोदन्तश्रवणेन राक्षसस्य विषादः, मलयकेतुना च प्रयोगकरणविचारः। पञ्चमे—राक्षसं प्रति मलयकेतोरविश्वासः राक्षसनिरसनञ्च। षष्ठे—चन्दनदासस्य

शूलारोपणवार्त्ताकर्णनेन राक्षसस्य शोकः, कुसुमपुरप्रवेशः, चन्दनदासमोक्षणाय आत्मदेहार्पणविचारश्च । सप्तमे—राक्षसस्यात्मसमर्पणम्, वणिजश्चन्दनदासस्य मुक्तिः, राक्षसस्य राज्ञश्चन्द्रगुप्तस्य समस्तकरणाधीश्वरप्राधान्यामात्यपदसध्यासनञ्च वर्णितमिति वस्तुसंक्षेपः ।

मुद्राराक्षसनाटकस्य नायकादिसिद्धान्तः ।

[अस्य खलु नायकश्चन्द्रगुप्तो धीरललितः, प्रतिनायको मलयकेतुश्चालम्बनविभावौ, परस्परमुद्दिश्य परस्परतर्ज्जितादीन्युद्दीपनविभावाः, उपायचिन्तनादयोऽनुभावाः, उत्साहः स्थायी, वीररसोऽङ्गी, करुणादयोऽङ्गरसाः, चाणक्यराक्षसौ नायकप्रतिनायकयोरुपनायकसंज्ञकौ सहायौ, रीतिः गौड़ी, ओजो नाम गुणः प्रधानम्, "पदानि त्वगतार्थानि" इत्यादि दर्पणकारोक्तः, प्रस्तावना उद्घात्यकरूपा इति ।]

उत्तररामचरितस्य समालोचना ।

उत्तररामचरितं नाम नाटकोत्तमं श्रीमन्महाकविना श्रीकण्ठेन प्रणीतम् । एतन्नाटकं किल रामायणान्तर्गतं सीता-

निर्व्वासनमधिकृत्य विरचितम् । एतस्यां नगनदीकाननादीनामतिमञ्जुलतमेषु प्रत्यच्चायमाणेषु स्वभाववर्णनेषु कवेर्महत्यात्मकवित्वशक्तिः प्रतिफलिता । एवमकृत्रिमस्नेहप्रेमशोकविरहादिवर्णनेषु च यादृशी प्रतिभा प्रस्फुटिता,तादृशी न सर्व्वत्र सुलभात्र जगति । शिशोः प्रथमोच्चरिता वागिव श्रवणसुखमादधाति, निर्ज्जनगगणान्तसञ्चारिणी मधुरझंकारसंवादिनी माधुर्य्यमयी वीणेव काव्यरसधारा सन्ततमेव मर्म्मस्थलोच्छासिनी प्रतिभासते। संसारक्लिष्टा अपि काव्यानुशीलनवशीकृता नितरां विश्राम्यन्ति शान्तिमन्तश्च चणं ब्राह्मानन्दसन्तृप्त इव नापरविषयमपेचन्ते कण्ठविलम्बिनीव खेदविद्रुनशरीरस्य मुक्तामालापरिहृतस्य शान्तिमुपपादयति । परमप्रियजनसमागमतृप्तिरिव परं प्रसरन्ती हृदयान्तराले स्वच्छता समुच्छेदयति प्रबलामपि संसारशोकपद्धतिम् । तथा च कविर्यथा यथा येन भावजातमभिव्यञ्जयामास, ते हि कवीनां काव्यनिवहेषु दृष्टान्तभूतामुपादधते। प्रारम्भ एव नैपुण्येन सूत्रधारस्य नटस्य च कथाच्छलेन प्रारम्भकथाप्रदेशमुपक्रम्य नैपुण्यमदर्शयत् । अन्यथा आकस्मिक इव कथासम्पातो दर्शकानां श्रोतॄणां व्यामोहमेव समुत्पादयेत् । दूरतो वर्त्ततां अभिनयदर्शनेन प्रीतिधारा, शिचाप्राप्तिः कवित्वपर्य्यालोचनेन वा, तथा च— 'भाव, प्रेषिता हि इतः स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गराचसाः' इत्यादि, ततश्च रामं तथा गभीर-

प्रणयविशुद्धमुपदेशप्रदाननिरतमुपस्थाप्य सीतायां प्रगाढ़प्रणयं रामस्य परिदर्शयामास। अनन्तरं योगिप्रधानस्य अष्टावक्रस्य मुनेः समुपस्थापनम्; सीतायाः भाविवनगमनमेवानुकूलयति। अपि च 'वीरप्रसवा भूयाः' इत्यनन्तरं रामेण 'लौकिकानां हि साधूनामर्थं वागनुवर्त्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥' इति वाक्योपन्यासेन मुनिवाचामसत्यत्वख्यापनेन कुशलवयोरखिललोकविख्यातविक्रमयोरुद्भवः प्रख्यापितः। वनगमनानुकूला च वाणी मुनेरष्टावक्रस्य यथा हि—'इदञ्च भगवत्या अरुन्धुत्या देवीभिः' इत्यादि। तदनन्तरं रामः—'क्रियते यद्यदेषा कथयति।' अपि च यत्प्रजारञ्जनार्थमेव रामः सीतां कान्तारे प्रस्थापयामास, तत्रानुकूलम्—'जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवञ्च राज्यम्। युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत् परमं धनं वः॥' इति वशिष्ठोपदिष्टम्। अथ नवीनया दिशा प्रवर्त्तमानः कविः उन्मनायमानां सीतां विनोदयितुं चित्रपरिदर्शनेन समुद्बुध्य पूर्व्वतनवनवासस्मृतिः सीता भूयो वनं द्रष्टुं सकामा जाता। रामेण स्मृतगुरुजनादेशेन कर्त्तव्यपरायणेन चानुमेने तदानीम्। ततो दुर्म्मुखवचनश्रवणकातरः सीतैकसमासक्तमानसोऽपि प्रजारञ्जनमेव कर्त्तव्यं मन्यमानः सीतामज्ञापयित्वैव तस्या वनस्थापनसंवादं लक्ष्मणेन वने प्रेषयामास। कल्पनेयं नूतनतमा सहृदयहृदयग्राहिणी च संवृत्ता। अन्यथा चित्रमपरि-

दृश्यं यदि केवलं दुर्मुखवचनश्रवणमात्रेणैव कठोरतया सीतायाः अनभिमतमपि वनवासं कविः राममुखेन प्रत्यपादयिष्यत्, तदा रामस्य प्रेम्णो गभीरता विस्रस्ता अभविष्यत्। सीतायाश्च करुणक्रन्दनेन वित्रासितो गलितहृदयो वा रामः कार्य्यहानिं व्यधास्यत्। यथा सीतानुरागिणं रामं कविः कल्पयामास, तत्र युज्यते तथैवेति। अत एव भावपरिभ्रंशभीतः कविः कौशलेन रामस्य सीतावनप्रेषणादेशोपयोगं कल्पयितुकामो नवीनेन मार्गेण चित्रदर्शनमुपकल्प्य सीतां वने गमनोन्मुखीं चकार। चित्रदर्शनावसरे तत्तत्स्थानेष्वनुभूतं भावं राममुखेन सीतामुखेन च प्रतिपाद्य तयोः प्रणयस्यातितरां प्रबलत्वं समाशंसितम्। तेन च तथा प्रियतमयोरपि तयोः कर्त्तव्यानुरोधेन विरहभोगः सुतरामुत्कर्षसाधक इति। सीता—'हद्धी हद्धी अहं वि अदिभूमंगदेण' इत्यादि वाचा परतः—'वत्सैतस्माद्विरम विरमातःपरं न क्षमोऽस्मि' इत्यादिना दुर्मुखवचनमविज्ञातस्य रामस्य भाविसीताविरहकातरत्वं चेतसि समुद्भावयति। तदानीमपि न जानाति सीताया वनवासं, तथापि यदत्यर्थं चित्रपरिदर्शनेन चञ्चलता, नितरां तदन्यथा कथं सम्भावयितुमर्हामः। अन्यत्र रामः—'प्रिये, किमेतत्? विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा' इत्यादि भावमय्या गाथया यथा प्रतिपद्यते रामस्य स्वच्छहृदयस्य प्रणयैकप्रवणमानसस्य विमुग्धता, तां

प्रतिपादयितुकामेनापि सर्व्वेणैव विपर्य्यस्यते, नास्ति तत्-प्रकाशनोपयोगिनी भारती, यया प्रकृतामवस्थां प्रकाशयितु' शक्यते। अपिच—'म्लानस्य जीवकुसुमस्य विकाशनानि' इत्यादिना यथा प्रणयस्य गम्भीरताविकाशिनीं भारतीं कविः प्रतिपाद्यते, न तथा सर्व्वत्र सुलभा। 'अद्वैतं सुखदुःखयो-रनुगुणम्' इत्यादिना रामस्य यथा प्रणयाभिज्ञता, सप्रेमहृदयता च समुपस्थापिता, तथैव तस्य परतोऽप्यवस्था नास्ति प्रक्रमोप-संहारयोरसमानता, असीमप्रणयसमाश्लिष्टहृदयस्य तस्य च युज्यत एव नारीजनोपमित्या सीतार्थं कानने कातरं विलाप-विकासनम्। यस्याः स्पर्शं मन्दारकुसुमदाम इव प्रमोदजनक-मुत्प्रेक्षते रामः, यस्याः वचनं सुधामयमिव, सन्तप्तस्य तृप्तिमिव, अतृप्तस्य शान्तिमिव, परब्रह्मोपासकस्य आनन्दमय-मिव गणयते, तस्या एव हृदयैकसमालम्बनीभूतायाः सीतायाः अपि यत् प्रजारञ्जनार्थं श्वापदसमाकीर्णे कान्तारे विसर्जनं तदतितरामेव राजगुणविकाशकमिति नाटकीयनायकस्य राज-वृत्तपारदर्शिनो विशेषतः समुत्कृष्टतामेव सम्पादयितुकामः कविः कल्पनामतिललितया दिशा प्रवर्त्तयामास, तदुपयोगिनी वाणी तन्मुखेनैव प्रकाशयति—'स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि। आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा।' इति। तृतीयाङ्के च तस्यैव रामस्य करुणरस-विद्रावितं मानसमिति वासन्ती च तत्प्रकाशसहकारिणीति

तथा च—'यत्र द्रुमा अपि मृगा अपि बन्धवो मे' इत्यादिना पञ्चवटीदर्शनेन 'अन्तर्लीनस्य दुःखाग्नेरद्योद्दाम' ज्वलिष्यतः। उत्पीड़ इव धूमस्य मोहः प्रागावृणोति माम्॥ 'हा! प्रिये जानकि,' अयञ्च च्छायाङ्क इति प्रतिपद्यते सुदूरसमीक्षमाणैरपि काव्यरसिकैः। तथा च सीतायाः देवीवरप्रभावेन वनदेवतयापि नूनमदर्शनं तदानीं रामो वासन्ती च सीतां नावलोकयतः। सीता तु उभयोरेव वाचं शृणोति, उभौ चावलोकते इति रमणीयमयं निर्द्देशः। तथा चान्तरान्तरा सीताशरीरस्पर्शविमुग्धो रामचन्द्रः स्वप्नलब्धमिव स्पर्शसुखं स्मृतिविषयतामुपयातमिव मन्दाकिनीरसाभिषेकमनुभूतसुधानिषेकमिव पूर्व्वतनं सीतायाः स्पर्शमुपगतः क्षणं प्रमोदमयः, क्षणञ्च तद्विभ्रंशकातरतामयो नानाविधेन भावेन वित्रस्तो विरहवेदनां बहुधानुभवति। विरहेण विना न मिलनं सुखावहं, अतः क्षणं मिलनं क्षणञ्च तद्वैधुर्य्यमुपपादितं कविना। वासन्ती नाम वनदेवतां सीतादेव्यास्तादृशीं सहकारिणीं कल्पयित्वा कल्पनाराज्येषु सर्व्वोच्चस्थानमधिचकार कविवरः। उपसंहारे तु रामः—'व्यक्तं नास्ति कथमन्यथा वासन्त्यपि तां न पश्येत्? अपि खलु स्वप्न एव स्यात्, न चास्मि प्रसुप्तः कुतो वा रामस्य स्वप्नः?' इत्यादौ अहो! माधुर्य्यम् निरासतायाः! अहो! धैर्य्यस्य प्रकर्षः!! यदर्थमेव विमनायितो रामचन्द्रः यस्याः स्पर्शेनापि समुज्जीवित इव

सुधात्पम इव नववपुष्मानिव तदानीमभवत् । सा चेयं नास्तीति कल्पनायामपि यद्गम्भीरभावेन धैर्य्यसहाय एवातिष्ठत्तदानीं तदेव तस्य प्रकर्षः । बहुवारं सीतया विप्रलब्ध इव शेषे परिकल्पयामास सीतानुचरस्य मिथ्यात्वमेव, परतः मूर्च्छामधिजगाम स एव तस्य धैर्य्यसीमा । ततो जनकस्य रौद्रभावजुष्टं रामस्नेहं, कुशलवयोः प्रकृत्या वीरवृत्तविकाशश्च सातिशयमाश्चर्य्यजनकः समजनि । चन्द्रकेतुना च वीरविक्रमविकाशः कुशलवयोः श्रीरामचन्द्रस्य स्निग्धभावः सहृदयानां हृदयं हरतीति स्वसंवेद्यमेव सर्व्वेषां बालकानां कुशलवचन्द्रकेतूनां सिंहविक्रमविकाशो हि सुतरामनन्यकल्पनीयतामुपाधत्ते, ततः स्वत एव कवीनां तत्रोन्मुखत्वं अनुशीलनञ्च । अथ कौशलेन नाटकान्तरे नाटकाभिनयमुपकल्प्य कविः सम्पूर्णभावेन नूतनां दिशं परिदर्शयामास । इयमपि कविना अन्यैरपि अननुशीलितेति कवेः प्रकर्षः । तथा च तत्र रामस्य नाटकाभिनयसन्दर्शनसमासक्तस्य प्रक्रान्ताभिनयदर्शनोद्भ्रान्तस्य "वत्स" इति परिप्लवनहृदयः सन् मुग्धोऽस्मि हा ! प्रिये,लोकान्तरमसि गता ?' ततश्च रामः—'कथं विलेय एव वैदेह्याः सम्पन्नः ? हा ! देवि, दण्डकारण्यवासप्रियसखि, हा ! चरित्रदेवते लोकान्तरं पर्य्यवसितासि ? (इति मुह्यति) (नेपथ्ये)' अपनीयताम् आतोद्यकम्' इत्यादि (ततः प्रविशति सीता अरुन्धती च) सीता—(ससम्भ्रमं स्पृशन्ती) 'समसंसिदु अज्जउत्तो' रामः—भोः

किमेतत्? कथं देवी?' इत्यादि, अनेन च प्रकारेण यत् कविर्वाल्मीकिना प्रस्तावितो मेलनसंवादस्तस्यायमर्थः इत्यस्माकं हृदयम्। तथाहि साधारणेषु कलङ्कभागिनीति विश्रुता सीता तथा निर्दोषितया व्यवस्थापनीया, यथा सर्व्वे एव ज्ञातुमर्हन्ति यत् सीता निरपराधा निष्कलङ्का पवित्रतमा मन्दाकिनीव देवतानामपि प्रियतमेति, तदाशयैव साधारणज्ञापनीयमभिनयमुपक्रम्य सीतया रामसंयोगः सम्पादित इति, तथा च लक्ष्मणः—"आर्य्य, एवमार्य्यया अरुन्धत्या निर्भर्त्सिताः पौरजानपदाः कृत्स्न श्च भूतग्राम आर्य्यां नमस्कुर्व्वन्ति, लोकपालाः सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते।" इति पर्य्यालोचकाः केचिदेवं चित्रपरिदर्शनस्य सार्थकतामुपवर्णयन्ति। तथाहि—चित्रपरिदर्शनप्रस्तावेन नाटकस्य प्रारम्भ एव रामस्य पूर्व्वचरितं दर्शकानां निवेदयामास कविः, तेन च उत्तरचरितप्रस्तावादेव किमपेक्ष्य चरित्रस्योत्तरत्वम् इति नाकाङ्क्षा सभ्यानाम् अन्यथा बहुपर्य्यालोचनेन केचित् ज्ञातुं शक्नुवन्ति, केचिद्वा अपरिज्ञाततत्तद्भावा एव नाटकदर्शनेषु विमुह्यन्ति। अतो वृत्तान्तस्योत्तरस्याकस्मिकत्वपातशङ्कानिराकरणार्थं चित्रदर्शनं पूर्व्वचरितबोधार्थम्। अपि च कुशलवयोर्जृम्भकास्त्रादिसमागमवर्णने च परतः प्रतिपादयिष्यमाणं कुशलवप्रयुक्तजृम्भकास्त्रप्रयोजनं चन्द्रकेतुबलेषु नाकस्मिकमित्यादिकं बहुवचः समनुभवनीयम् अनुभवशीलैरित्यलम् बहु जल्पनेन।

प्र—२

उत्तररामचरितस्य संक्षिप्तेतिवृत्तम् ।

एतन्नाटकस्यादिमेऽङ्के—लक्ष्मणेन सीतायाश्चित्रपटपरिदर्शनम्। तेन च तस्याः प्राग्दृष्टतपोवनगमनवासनाभिजाता। ततो दुर्म्मुखमुखादाकर्णितं जनगणोद्भाषितापवादमाकर्ण्य श्रीरामचन्द्रः तपोवनदर्शनव्याजेन तां लक्ष्मणेन वनं निर्व्वासयामास। द्वितीये—शम्बूकविनाशार्थं रामस्य पञ्चवटीगमनम्, तत्र शम्बूकवधः, शम्बूकस्य दिव्यरूपप्राप्तिः, पञ्चवट्याः तरुलतादिदर्शनेनानुपदमेव सीतास्मरणात् तदर्थमनुतापः। तृतीये—देववरप्रभावेन अन्यैरलक्षीभूतायाः सीतायाः विरहविदूनान्तःकरणस्य रामस्य दर्शनेन विलापोक्तिः, वासन्तीरामयोः कथोपकथनम्। चतुर्थे—अरुन्धुतीकौशल्यादीनां जनकराजेन समागमस्तेषां खेदः, परतो लवागमनम्। पञ्चमे—महाक्रतोरश्वमेधस्याश्वसंरक्षणपरेण चन्द्रकेतुना लवस्य स्नेहानुगतवीरोचितालापकलापविलसितं, समरोद्योगश्च। षष्ठे—चन्द्रकेतुलवयोर्युद्धम्, रामसमागमे चाहवप्रशान्तिः, कुशसमागमे च रामस्य तयोरवलोकनेनात्मजस्नेहाविर्भावः। सप्तमे—महर्षेर्वाल्मीकेराज्ञयाप्सरसां रामायणनाटकाभिनयस्तत्पश्यतो रामस्य निरतिशयक्लेशोत्कोटिकः, पृथ्वीभागिरथीप्रसादात् निवृत्तापवादायाः जनकनन्दिन्याः समागमश्च सुष्ठु वर्णितमेवास्ते।

उत्तररामचरितस्य नायकादिसिद्धान्तः।

[एतन्नाटकस्य नायको रामचन्द्रो धीरोदात्तः नायिका सीता-देवी स्वकीया मुग्धा चालम्बनविभावौ, रमणीयवस्तुदर्शनादीन्युद्दीपनविभावाः, मोहविलापादयोऽनुभावाः, विषादादयो व्यभिचारिणः, रतिः स्थायी, करुणविप्रलम्भाख्यः शृङ्गाररसोऽङ्गी, वीरादयोऽङ्गरसाः, रीतिः पाञ्चाली, गुणो माधुर्य्याख्यः, प्रस्तावना प्रयोगातिशयरूपा इति]।

मालतीमाधवप्रकरणस्य समालोचनम्।

मालतीमाधवं नाम प्रकरणं श्रीमन्महापण्डितकुल-भूषणाचार्य्येण भवभूतिना कविमुख्येन प्रणीतम्। एतद्धि शृङ्गार-रसप्रधानम्। अस्य खलु तावत् प्रतिपाद्यविषयः कविसामयिक-समाजचित्राङ्कनम्। तदानीं यैव समाजानामवस्था सैव कविना नाट्येन परिणमय्य वर्णितम्। तथाच—'भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्' इत्युक्तेः प्रकरणस्य कविकल्पितत्वं सर्व्ववादिसम्मतम्। किन्तु प्रकरणस्यैतस्य नाम गुणाढ्यकृतौ वृहत्कथायां विद्यमानत्वेन कया रीत्या लक्षणसमन्वयस्तत् संचिन्त्य वयमतिमात्रं पर्य्याकुलाः। मन्यामहे कविना वृहत्

कथायाः कथांशमपहाय केवलं मालतीमाधवयोर्नाममात्र-मादाय व्यरचि प्रकरणमिदं महत्त्वात्मकविलक्षणशक्तिविजृम्भितं कल्पनामूलम्। अथवा अपरिज्ञात एव कविस्तत्रास्ति मालती-माधवशीर्षको कापि कथा, काकतालीयन्यायेन समवर्त्ततैत-न्नामेति, इतःपरं ज्ञानवृद्धैर्विशेषज्ञैरेव विशेषेणावधेयम्।

अस्य प्रतिपाद्यं कुण्डिनीपुराधिपामात्यदेवरातस्य सूनुना माधवेन पद्मावतीश्वरस्य मन्त्रिणो भूरिवसोर्दारिकाया मालत्याः प्रणयाभिव्यक्तिरूपं घटनापारम्पर्य्यम्। प्रकरणेऽस्मिन् कवेर्वर्त्तते भूयसी रचनापरिपाटी, या हि प्रतिपदमेवादधाति काव्यरस-रसिकानां शृङ्गारादिरसोन्मादनाम्। तथा च प्रथमत एव ग्रन्थसूचनायाम्—'चूड़ापीड़कपालसङ्कुलगलन्मन्दाकिनीवारयः' इत्यादौ जटाजूटस्यानवरतस्नानकपिशस्यापि भुजङ्गनद्धतया तिरोहितरूपत्वेनातिश्यामत्वेन मेघोदयम्; अत एव सर्प-विहरणसूचनम्, गङ्गाजलगलनेन वर्षणम्; कपालमालया बलाकावलिम्; ललाटनेत्रत्विषा विद्युद्द्योतनम्; शिशु-शशिना च केतकशिखावत्त्वं दर्शयता मदनमोहोद्दीपनमुदिर-मेदुरघनसमयसूचनेन शृङ्गाररसशालिनाप्यस्य प्रकरणस्य कटाक्षितेति। तथा कामन्दकीं बौद्धभिक्षुकीं परिकल्प्य इद-मेव प्रत्याययति कविः यत् तदानीमार्य्यबौद्धधर्म्मयोरन्तरा नासील्लवमपि विद्वेषचिन्ता, उभावपि परस्परं सौहृद्येन निष्पादयतः समाजानां सुगूढ़गूहितमपि प्रतिपाद्यमाग्रहाति-

श्रयेन। तदानीन्तनी योषिदपि अन्तःपुरमपहाय जनस्थानमागत्य सञ्चरति स्वातन्त्र्येण। तत्प्रतिपादनाय सवयस्यां गजपृष्ठारूढ़ां मालतीं मदनमहोत्सवदर्शनाय मदनोद्यानं गतवतीं तत्र कुसुमचयनव्याजेन बकुलतलगतं माधवञ्च समुद्भाव्य तयोरागोन्मेषणमास्थाय लवङ्गिकाहस्तेन माधवगुम्फितां बकुलमालां विरहविधुरायै मालत्यै अर्पयित्वा कल्पनाराज्ये विजयति तत्रभवान् कविवरः। येन प्रियप्रहिता हि मालिका मालत्या घटनापारम्पर्य्येण गुरुकठोरामपि विरहवेदनां कथञ्चिदपि सान्त्वयित्वा मालतीविरहाधीरस्य माधवस्य मुहुर्मुहुश्चेतनाविगमे मालत्यभिज्ञानत्वेन तामेव मालिकामुद्भाव्यातिहृद्यमुपस्थापितं नाट्यकलापारिपाट्यविधौ कविकुलप्रभाकरेण श्रीमता श्रीकण्ठेन। तथा यत्र यत्र यया दिशा यमेव भावनिवहमभिव्यञ्जयितुं कामः तत्र तत्र तथैव निष्पाद्य प्रथितं यश आदधातीत्यत्र कः सन्देहः। तथा च अतिवीभत्समयश्मशानवाटवर्णनोपक्रमे पिशाचललनामधिकृत्य प्रत्यायति—'आन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पलव्यक्तोत्तंसभृतः पिनह्य सहसा हृत्पुण्डरीकस्रजः। एताः शोणितपङ्ककुमकुमजुषः संभूय कान्तैः पिबन् त्यस्थिस्नेहसुरां कपालचषकैः पीताः पिशाचाङ्गनाः॥' इति यदतिबीभत्सानामपि पिशाचाङ्गनानामलङ्कारसन्निवेशनं तदतिरमणीयम्; रसव्यधायकरसस्यात्र यन्निवेशनं तदपि च हृद्यं सहृदयानाम्। यथास्मिन् प्रियतमैः

सह मधुपानप्रवृत्तस्रक्चन्दनाद्यलङ्कृतनायिकाप्रतीतिः संभोग-शृङ्गाररसः प्रतीयमानः प्रधानस्य चार्थभूतस्य बीभत्सरसस्याङ्गमिति रसवदलङ्कारस्य च शोभनं सुसन्निवेश इति। अघोरघण्टशिष्यया कपालकुण्डलया मालत्या हरणं, तस्या अपि कामन्दक्याः शिष्यया वैदुष्या सौदामिन्या परिरक्षणं कल्पयित्वा नाटकस्योत्कर्षो निरतिशयं समाहितः। तथा सरिदाराद्योपवनानां यथा यत्र वर्णनं सुसन्निविष्टं तच्चातिशयनिसर्गानुकूलमूलम्। तथा च नवमाङ्के सौदामिनी—'पद्मावती विमल-वारिविशालसिन्धुपारा सरित्परिकरच्छलतो बिभर्त्ति' इत्यादितः 'दधति.करभाजामत्र भल्लुकयूना' इत्यादिश्लोकान्तमतिरमणीयम्। किन्तु महाकवेर्यद्यपि च सर्व्वत्रैवातुलनीया दृष्टिरत्र तथापि किञ्चिद्भावविपर्य्ययं मन्यामहे, षष्ठेऽङ्के शिवायतने लवङ्गिकाभ्रमेण मालत्या यत् माधवालिङ्गनं तदत्यस्वाभाविकं मासकानां हृदयम्। तत्र माधवेन स्वरव्यक्तयो न कृतो, नापि लवङ्गिकाया वेशोऽपि परिगृहीतः, तथापि माधवपरिसज्जनं मालत्या उपस्थापनेन यत् कविः बाष्पारुद्धनयनं व्यपदिशति, तदपि च नानुकूलम्। बाष्पाक्रान्तानां मुहूर्त्तमेव विभ्रमः सम्भवति, किन्तु मालतीमाधवयोर्नातिङ्क्स्वालापः कथं तादृशं विभ्रमं जनयितुमर्हतीति कृतमतिपल्लवितेन।

मालतीमाधवप्रकरणस्य प्रतिपाद्यम् ।

एतस्य प्रकरणस्य प्रथमेऽङ्के—बौद्धभिक्षुक्योः कामन्दक्यवलोकितयोः कथोपकथनम्, चित्रोपकरणहस्तेन माधवभृत्यस्य कलहंसस्य उद्यानप्रवेशः, तत्र माधवमकरन्दकलहंसानां परस्परं मालतीविषयकः संलापः। द्वितीये—लवङ्गिकया माधवगुम्फितायाः बकुलमालायाः विरहविधुरायै मालत्यै समर्पणम्, मालतीसमीपे कामन्दक्याः आगमनम्। तृतीये—शिवायतने मालतीलवङ्गिकयोः समागमः, तत्र माधवस्यापि गमनम्, अलक्षितेन तेन तयोः पर्य्यवेक्षणम्, शार्दूलेन मदयन्तिकायाः आक्रमणम्, माधवसखेन मकरन्देन तस्याः परिरक्षणम्। चतुर्थे—विचेतनं मकरन्दं वीक्ष्य माधवस्यापि संज्ञा तिरोहिता, प्रतिहारीवचनेन मालतीमाधवयोः प्रणये नैराश्यम्, मकरन्दस्य मदयन्तिकायामनुरागाभिव्यक्तिः, पारासिन्धुनद्योः सङ्गमवर्णनञ्च। पञ्चमे—कापालिकाघोरघण्टशिष्यया कपालकुण्डलया मालत्याः हरणम्, महामांसहस्तेन माधवेन करालादेव्याः मन्दिरप्राङ्गणस्थे महाश्मशाने आगमनम्, कपालकुण्डलया अघोरघण्टेन च करालादेवीबलिमुपहर्त्तुं मालत्याः देवीसमीपानयनम्, माधवेन तस्याः परिरक्षणम्, अघोरघण्टविनाशनञ्च। षष्ठे—मालत्यर्थं अमात्यप्रहिताभरणस्य प्रतिहार्य्या कामन्दकीहस्ते समर्पणम्, लवङ्गिकाभ्रमेण

मालत्याः माधवालिङ्गनम्, मकरन्दस्य मालतीवेशधारणम्, मालतीवेशपरिगृहीतस्य मकरन्दस्य राजनर्मसखेन नन्दनेन सह विवाहः। सप्तमे—मदयन्तिकाबुद्धरक्षितालवङ्गिकानां संलापः, निगूहितेन मकरन्देन मदयन्तिकायै आत्मनः प्रकाशः, मकरन्दाय तया आत्मनोऽर्पणम्। अष्टमे—मालतीमाधवयोः दीर्घिकाशिलातलोपस्थितिः, तत्र अवलोकितायाः समागमः, नगररक्षिपुरुषैः मकरन्दस्याक्रमणम्, तत्संवादेन तस्मात् कलहंसेन सह माधवस्य प्रस्थानम्, अवलोकितालवङ्गिका-बुद्धरक्षितानाञ्च एतत् विज्ञापयितुं कामन्दकीसमीपागमनम्, कपालकुण्डलाया मालतीमाहृत्य श्रीपर्वतगमनम्, मदयन्तिका-दीनां मालत्या अन्वेषणञ्च। नवमे—सौदामिन्या माधव-मकरन्दयोरन्वेषणम्, मालतीविरहेण माधवस्य पुनः पुनश्चेत-नायाः विगमः, माधवं पश्यतो मकरन्दस्य विलापः, पाटलवत्यां नद्यां तस्यात्मोत्सर्गाय प्रयत्नः, सौदामिन्या मालत्याभिज्ञान-रूपायाः माधवप्रहितायाः बकुलमालिकायाः पुनः माधवाय प्रदानम्, समाधवायाः सौदामिन्याः प्रस्थानम्। दशमे—कामन्दकीलवङ्गिकामदयन्तिकानां मालत्यर्थं परस्परमाक्षेपोक्तिः, मधुमतीस्रोतस्वत्यां तासां जीवनपाताय उद्योगः, मूर्च्छितया मालत्या सह माधवस्योपस्थितिः, सौदामिन्याः आगमनम्, राज्ञोऽभिमतप्रकाशनञ्च शोभनं वर्णितम्।

मालतीमाधवप्रकरणस्य नायकादिसिद्धान्तः ।

[अस्य नायकोऽमात्यपुत्रो माधवो धीरप्रशान्तः, नायिका मालती मुग्धा, चालम्बनविभावौ, स्रगाद्यवलोकनादीन्यु द्दीपनविभावाः, अन्योऽन्यालापाद्विक्रियादयोऽनुभावाः, निर्व्वेदादयो व्यभिचारिणः, रतिः स्थायी, सम्भोगशृङ्गाररसोऽङ्गी, भयानकबीभत्सादयोऽङ्गरसाः, भिक्षुकीमकरन्दाद्याः सहायाः, रीतिः पाञ्चाली, गुणः ओजः, प्रस्तावना प्रयोगातिशयरूपा ।]

अभिज्ञानशकुन्तल-समालोचनम् ।

अस्य किल इतरैरतुलनीयात्मनो रूपकस्य प्रथमतः समाप्तिं यावत् सर्व्वाङ्गमेव सुरसजुष्टमिति मतम् एतदधीयानानां काव्यरसरसिकानाम् । अस्य च य एवांशः सम्यगालोच्यते स एवाद्वितीयकवेः श्रीमतः कालिदासस्य अलौकिकीं कवित्वशक्तिं विशेषेण विकाशयन् आलोचयितॄणां चेतसि कामप्यनिर्व्वचनीयां वाङ्मनसोरप्यगोचरां नवीनानन्दधारामुद्भावयति । काव्यस्य हृदयं तावदतिमनोरमाणां चरित्राणामुत्पादनम् ; उत्पाद्यमानानामपि तेषां देशकालावस्थामनुसृत्य समावेशः । तत्र च, कवयितुरलौकिकीं प्रतिभामन्तरेण नान्यो गरीयानुपायः । नैसर्गिकव्यापारानुसारेण ये

व्यापाराः प्रतिदिवसमेवोत्पद्यन्ते, स्वभावसुलभता च येषां पूर्व्वघटितानां व्यापाराणाम्, तदनुयायिघटनानिवेशविषये कविना समवहितेन वर्त्तितव्यम्। यतः स्वभावप्रतिकूलं वस्तु जनानां विरागमुपजनयति। यदि पुनः प्राकृतान् व्यापारान् कवयित्वा आत्मनः प्रतिभाप्रभावेन स्वाभाविकादप्यधिकतरं हृद्यं विचित्रतामयञ्च निर्म्मातुं क्षमते, तस्यैवासाधारणी प्रतिभा सर्व्वथैव श्लाघनीया प्रर्थावतामतिमात्रम्। वस्तुतस्तु स्वाभाविकविषयेषु वैचित्र्यं प्रकटयितुमक्षमे काव्यकृतौ न प्रद्योतन्ते लवमपि प्रकृतकविजनसुलभा गुणाः। येनैव वैचित्र्यपरिरहितानां विदितपूर्व्वाणां विषयाणां भूयः सन्निवेशः प्रत्यक्षतो लोकानामुपकार उत आसक्तिपरम्परागतानन्दधारा च नोपजायेत। यदधीतमपि काव्यं केषामप्युपकारं नोपस्कुरुते तद्धि काव्यमुत्तमत्वे नाङ्गीक्रियते परमविधिर्रिराचार्य्यपादैः। उक्तञ्च तैः 'निर्म्मेयं चरितं शुद्धं जगन्मङ्गलकारणम्' इति। परन्तु तस्य च पुनरुक्तमवस्तुनः प्राचुर्य्येण उत्कर्षप्रतिपत्त्यर्थं वैचित्र्यविधानार्थं वा प्रयोजनमनुसृत्याप्रयोजनवस्तुनः सृष्टिरपि न दोषाय परं गुणायैव प्रभवति जगतामतिशयम्। अत्र खलु गीर्व्वाणवाणीपरिशीलितानां नाट्यानामवतंसे शाकुन्तले प्रतिवर्णमयं विधानो विलसति, लोकशिक्षोपयोगिनामुपदेशानां विलासैः परिपूर्णमादितोऽवसानं यावत् बाहुल्येन।

इदं तावत् पद्मपुराणान्तर्गतेन दुष्मन्तशकुन्तलापरिणयप्रस-

ङ्गोदन्तेन विमण्डितमलौकिकमपूर्व्वमतुलनीयञ्च दृश्यकाव्यमत्र जगति। न केवलमस्मद्देशीया एवास्मद्देशीयं काव्यं पक्षपातेन प्रशंसन्ति, अपि तु सुदूरयूरुपीया अपि देशनिरपेक्षा गुणपक्षपातिनो निरन्तरमेवालौकिकमाधुर्य्यरसं परिपिबन्तो बहुमन्यन्ते। अस्य तावत् नैसर्गिकोपवर्णनम् आश्रमपदम्, तथा शकुन्तलाया रमणीयतातिमुष्ठूपवर्णनमस्ति।(१) यथाहि शकुन्तलामुपवर्णयितुकामेन कविना दुष्यन्तमुखेन प्रकाशितम्—'इदं किलाव्याजमनोहरं वपुः' इत्यादिना शकुन्तलाया यथा कष्टासहिष्णुत्वमतिपेलवत्वञ्च प्रतीयते, मन्ये कविताकोटिकेनापि कविरत्नस्तथा प्रतिपादयितुं न प्रभवति। अपि च 'गच्छति पुरः शरीरम्' इत्यादिषु शकुन्तलायां राज्ञो दुष्यन्तस्य नितान्तमनुरक्तता वस्तुतो यथैव जायते प्रेमोपचर्य्याविमलोकृतहृदयानां सतां हृदयवृत्तिस्तथैवानया कवितया प्रतिपद्यते, एवमवस्थैव सञ्जायते प्रियजनसन्निधानादपरत्र गमनोन्मुखतायां सतां प्रेमिकाणाम्। सुसन्निवेशिता चेयमुपमा प्रतिपादनीयस्य शकुन्तलायां राजानुरागातिशयस्य प्रकृष्टतां कथयति, काव्यस्य महदिदं वैचित्र्यं नाम यद् गम्भीरमर्थं स्वल्पया सरलया च वाचा प्रबोधयतीति। अन्यच्च शकुन्तलाया राजपुरं प्रव्रजन्त्याः स्नेहसमाकुलान्तःकरणस्य तापसकुलपतेरपि कण्वस्य मुखात् प्रत्याययामास—"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने, भर्त्तुर्व्विप्रकृतापि रोषणतया मास्म

प्रक्षिपं गमः। भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥" इममुपदेशमुपगृह्णन्त्यः कुलस्त्रियः सर्व्वथा प्रशस्यन्ते स्वामिगृहेषु। यदत्र चानसूयां प्रियंवदाञ्च युगलतया शार्ङ्गरवं शारद्वतञ्च इवैतेन समुपस्थापयामास। तत्र केषाञ्चिदियमेव चिन्ता—यत् अनसूया प्रियंवदा च नाट्यसमालम्बनीभूतायाः शकुन्तलायाः चिरमेव सहचारिण्यौ। तत्र प्रियंवदा तपोवनसन्निवासापि प्रागल्भ्यवती, अनसूया च शान्ता आश्रमपदोपशमविग्रहा चिरमूर्त्तिमती तितिक्षा। नूनं रचनाकुशलस्य कविशिरोमणेः कालिदासस्य तादृशकल्पनाया अस्ति कश्चित् सुगूढ़ाभिप्रायः, स चायमिति मन्यन्ते—'दुष्मन्तो हि राजा सकलनीत्यर्थकुशलः कलापारदर्शी गूढ़सञ्चारजटिलचेताश्च स्वभावतो राजवृत्तत्रा विषयविशेषेषु च सुकुमारतां पूर्व्वतमामुपयुञ्जानः परां कीर्त्तिपदवीं राष्ट्रेषु समुपागत इति; तत्र यदि केवलं प्रगल्भया प्रियंवदया समुपगतामेव शकुन्तलां राज्ञः समीपे कविरुपास्थापयिष्यत्; तर्हि प्रियंवदायाः प्रागल्भ्यपरिलोकनदुर्म्मणायितो राजा दुष्मन्तः शकुन्तलायामन्यथा वा सम्भावयेत्, यतो विजने तपोवने तादृशप्रगल्भसहचरी समभिव्याहृता सच्चरित्रेति राजवृत्तिसमाक्रान्ततया कुटिलनीतिचतुरस्य तस्य कथं नाम न जायतामत्र सन्देहधारा। नैव तथा सञ्चरति केषाञ्चित् सहसा मानसेषु, अपि च अनसूयां परिहाय प्रियंवदामात्रोपस्थापने—

'अह गमिस्सं' इत्यादिकमुपक्रम्य न तथा रसविकाशः सम्भवेत्; प्रियंवदां परिहाय गम्भीरायाः यथार्थतपोवनवासयोग्यभावाया अनसूयाया उपस्थापनेऽपि कविवाञ्छितशृङ्गाररसनिष्पन्दः स्यात्, सुतरां मुख्यतया स्वल्पेन वा प्रकारेण नैव प्रकाशते प्रियंवदायाः प्रागल्भ्यमेव मूलं शकुन्तलायास्तथा तथा रसविकाशस्य। तथा च—'अत्तणो जोव्वणारम्भं उवालहस्स' इत्यादि न खलु तादृशी कथा कदापि अनसूयाया मुखाद् बहिरगमिष्यत्। एवमेव मनसि कृत्य काव्यसामञ्जस्यरक्षार्थं अनसूयां गम्भीरां प्रियंवदाञ्च प्रगल्भां समुपस्थापितवान् कविकुलशिरोमणिः श्रीमान् कालिदासः। शिष्यद्वयस्यापि एकस्य कठोरस्य अपरस्य च कोमलस्य समुपस्थापने कारणम्। कण्वो हि मुनिस्तपोवनवासी कुलपतिरपि संसारदृशा निःस्पृहोऽपि स्नेहसमाकुलान्तःकरणः तत्त्वप्रकाशो निरञ्जनोऽपि शकुन्तला-विरहचिन्तासमुद्विग्नान्तरात्मा इति व्यवस्थापितं कविना। तदुपयोगिभावविकाशश्च तस्य प्रयोजनीय इति, अन्यथा कल्पने कवेः किञ्चिन्न्यूनतापत्तिः। तस्य च शिक्षासु कोऽपि सन्देहोऽपि प्रवर्त्तते, तथा च बहुकालं दुष्मन्तेन परिणीता शकुन्तला, स च यथा शकुन्तलाया नगरप्रवेशस्य कालं निर्द्दिश्य राज्ये प्रस्थितः, तथाकालान्तरे न प्राहिणोत् पौरजनान् शकुन्तलां नेतुं, तन्नूनं कश्चिदेव संवादः, येन राज्ञस्तथा-चरणव्याघातः। अपि च गुप्तमेव शकुन्तलां अविजानतो

लोकस्य दुष्कन्तः परिरिणनाय, सा चेयमापन्नसत्त्वा प्रस्थाप्यते नगरे तत्र कश्चिदेव सहगामी प्रयोजनीयः, यो बहुधा निबोध्य राजानं दैवनिबन्धेनास्वीकुर्व्वन्तमपि शकुन्तलास्वीकारोन्मुखं विधातुं शक्नुयादिति। स च राजागमेन शङ्कितो वा निर्ज्जन-वासाभ्यासाच्च जनसंसर्ग समागमेन समुत्त्रस्तो वा सा तावत् कार्य्यं विनाशयेदिति नानाविधविचारविशारदो मुनिः कण्वः शार्ङ्गरवं अप्रशान्तभावं वचनप्रयोगकुशलं संप्रेषितवान् शकुन्तलासाहाय्येन। तत्रैवमपि परिचिन्त्ता तस्य यत् शार्ङ्गरवो हि समुद्धतो यदि केवलमौद्धत्यमेव विधाय कार्य्यहानिं जनयेत् तन्नूनमतिदुःखं सम्पत्स्यते, तत् प्रशान्तोऽपि शारद्वतो दीयतामिति शारद्वतस्य प्रेषणम्। गौतमी च राज्ञः कथञ्चि-दन्यथाशङ्काव्याघातमेव जनयितुमुपस्थापितेति। ततश्च राजपुरे समुपस्थाय यथायथं कण्वेन समाशङ्कितं, तथा तथैव वृत्तभागः समजनि। राज्ञो धैर्य्यं महत्त्वं धर्म्मपरायणत्वं परतः कथञ्चिदुन्मेषितस्मृतित्वेन कृतानुतापः अङ्गुरीयकस्य तथा वैचित्रेण समागमः। सप्तमाङ्कादौ च मारीचाश्रमभागे शकुन्तलातनयसर्व्वदमनक्रीड़ा राजशङ्कानिराकरणयौक्तिकञ्च पातिव्रत्यकथासमाशंसनमित्यादि नानाविधरसविशेषपूता विजयते कालिदासलेखनी सुधामयी, तत्र मिश्रकेशीकथावरण-प्रभृतिकं नूतनभाववमयमिव समादधाति हृदयेषु नवीना-लोकधारां यया पूतम्मनराः काव्यसम्पर्कमतिमधुरं सकलसारं

मनग्रमानाः पुराणा अपि निरालम्बमाना अपि रसेषु निमज्जन्तीति कृतमधिकवाग्गुम्फनप्रयासेन ।

अभिज्ञानशकुन्तलस्य संक्षिप्तेतिवृत्तम् ।

काव्यस्यास्य प्रथमेऽङ्के—मृगानुसारिणो राज्ञो दुष्यन्तस्य तपोवनगमनम्, तत्र सहचरीभ्यां प्रियंवदानसूयाभ्यां समं शकुन्तलायाः सन्दर्शनम्, तस्याः परिचयाधिगतिः, अन्योऽन्ययोरागाभिव्यक्तिश्च । द्वितीये—विदूषकमाधव्येन सह शकुन्तलासम्बन्धिकथोपकथनम्, तापसानां यज्ञविघ्ननिराकर्त्तुं नृपतेर्दुष्यन्तस्य आश्रमपदगमनञ्च । तृतीये—मीनकेतनायत्तचित्तयोः शकुन्तलादुष्यन्तयो र्मेलनम्, नेपथ्ये तयोर्विच्छेदार्थं सङ्केतोक्तिः, शान्त्युदकहस्तेन गौतम्या आगमनञ्च । चतुर्थे—अनसूयाप्रियंवदयोः कुसुमचयनम्, शकुन्तलां प्रति दुर्व्वाससः शापः, विष्कम्भके प्रभातोपवर्णनम्, कण्वस्य शकुन्तलागर्भवृत्तान्तश्रवणम्, शकुन्तलायाः राजभवनगमनवेलायां कण्वस्योपदेशकथनम्, शकुन्तलायाः दुष्यन्तालयगमनञ्च । पञ्चमे—राज्ञः शकुन्तलाप्रत्याख्यानम्, अप्सरोभिः शकुन्तलायास्तिरोधानञ्च । अङ्कावतारे—धीवरादङ्गुरीयकप्राप्तिः । षष्ठे—अभिज्ञानाङ्गुरीयकदर्शनेन स्मृतवृत्तस्य दुष्यन्तस्य अनुतापः, विरहानुभवः, पुरन्दरसारथे-

मातलेः समागमः, दुर्जयासुरनिर्ज्जिताय तस्य त्रिदिवगमनञ्च । सप्तमे—तस्मादेव स्वर्गादाकाशवर्त्मना समागतयोर्मातलिदुष्मन्तयोः कथोपकथनम्, मरीचेराश्रमावतरणम्, तत्र शकुन्तलाया अङ्गजेन च साकं भूयः सम्मिलनम्, कश्यपादीनामाशीःशंसनञ्चातिहृद्येन वर्णितमिति ।

अभिज्ञानशकुन्तलस्य नायकादिसिद्धान्तः ।

[अस्य खलु नायको दुष्मन्तो धीरोदात्तः, नायिका च शकुन्तला स्वकीया मुग्धालम्बनविभावौ, चन्द्रचन्दनसुगन्धिककमलकुसुदवसन्तकुसुमादीनुद्दीपनानि, अन्योऽन्यचक्षुरादिक्रिया अनुभावाः निर्व्वेदादयो व्यभिचारिणः, रीतिः स्थायी, सम्भोगशृङ्गाररसोऽङ्गी, हासकरुणप्रवासविप्रलम्भाख्यशृङ्गारादयोऽङ्गरसाः, विदूषकाद्याः सहायाः, रीतिः पाञ्चाली, गुणो माधुर्य्याख्यः, प्रस्तावनावलगिताख्येति ।]

मालविकाग्निमित्रस्य समालोचनम् ।

'नाटकं ख्यातवृत्तं स्यात्' इत्युक्तेर्नाटकस्यास्य नाटकत्वे सन्दिहते केचन सभ्याः, तत्तु तेषां प्रमादिका धारणेति वक्तुमलं स्मः ; यतो भागवतविष्णुपुराणादिषु पुराणनिबन्धेषु

राज्ञोऽग्निमित्रस्य कथांशस्य लभ्यत्वेन तथात्वप्रतीतिर्न श्रद्धेया। विस्तरतश्चैतदेतन्नाटकस्य व्याख्यानावसरे उपपादित-मस्माभिः नेहोक्तं विस्तरभयात्। एतन्निबन्धस्य पुनः कालिदासप्रणीतत्वमप्यङ्गीकर्त्तुं नाभिलषन्ते केऽपि विद्वन्मन्या-स्तत्तु हेयं प्रमाणाभावात्। न च वर्णनाशैल्यमत्र प्रमाणमिति वाच्यम्; अस्य खलु कालिदासप्रणीतत्वेऽपि तस्या एव प्रमाण-त्वात्। कालिदासकल्पनास्मृते नैतादृक् कल्पना सम्भवतितरा-मन्येषां कल्पनाकुशलानाम्। तथा च—प्रथमतः चेत्याः कौमुदि-कायाः हस्ते नागमुद्राङ्किताङ्गुरीयकं कल्पयित्वा केतकीकुसुम-कण्टकशैलेनापविद्धेन विदूषकेण सर्पदन्तजक्षतं व्यपदिश्य तेनैव सारभाण्डभूगृहतः धारिण्या निरुद्धायाः मालविकायाः मोचण-मतिशयकौशलेन भावपरिशुद्धसंयोजनपद्धतिधारया च प्रतिपादितम्। तथा "वामं सन्धिस्तिमितवलयं न्यस्तहस्तं नितम्बे" इत्यादि सरलवर्णनं, अन्यत्र 'मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः। पङ्कच्छिदः फलस्येव निकषेणाविलं पयः॥" इत्यादि सरलकवितानामपि यदत्यर्थमलङ्कारसमलङ्कृतत्वञ्च तदत्यद्भुतं नाम महाकवेः काव्यमार्गे साधयति परमुत्कर्षं; दृश्यते हि प्रायेणान्यकविप्रबन्धेषु सकलकवितानामलङ्कारपरि-हीनता, क्वचित् क्वचित् नानालङ्कारसमलङ्कृतत्वञ्चेत् पदबन्धे भाव-बन्धे वाप्यतिकाठिन्यं, किन्तु कालिदासकविताः सुतरां सारल्यविजृम्भिता अपि समलङ्क्रियन्ते विपुलालङ्कारैः। अलङ्कारस्य

समलङ्कृताः कविताः वनितास्तस्य कविकुलललामतां समुपस्थापयन्ति। "पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनाम्॥" इत्यादि स्वभावसुन्दरभावनिवहोपवर्णनपद्यं प्रमाणयति, कालिदासस्य कृतिविषयेऽतिमात्रानुकूलताम्। तथाच 'गृहीदक्षिणोह्मि। किं तु मेहावलोणिरुद्धा जोण्हा विअ पराहीणदंसणा तत्तहोदी' इत्यादि विदूषकवाक्ये यत् राज्ञस्तात्कालिकावस्था सरलभावनिबन्धेन अलङ्कारसन्निवेशेन च प्रतिपादिता, तदतिशयहृद्यं सहृदयानाम्। काव्यस्योपक्रमोपसंहारयोरप्यद्वितीयकवेः कालिदासस्यानन्यसाधारणीं प्रतिभामुद्योतयति प्रत्येकांशसन्निवेशनचातुर्य्यम्। 'क्व वयं क्व परोक्षमन्मथः' इत्यादि शाकुन्तलस्थकवितापाठेन यादृगेव मनोवृत्तिः सज्जनानामुपपद्यते, 'क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम्। मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि॥' इति कवितापि तदनुरूपार्थभावनिवहं वर्णयोजनपद्धतिञ्चोद्बोध्य एकस्यैव रचयितुर्महाकवेः कालिदासस्य विश्वविश्रुतोपस्थापिन्या महाशक्त्या आनन्दधारामुपस्थापयति सचेतनानां चेतसि। अपि च प्रथमत एव परस्परप्रतिपक्षयोः गणदासहरदत्तयोर्नाट्याचार्य्ययोर्विदूषकेण कलहं जनयित्वा यत् निगूहितामपि मालविकाम् अभिनयगृहमानाय्य राज्ञोऽग्निमित्रस्य तस्यामतिशयितं भावाभिनिवेशप्रकटनं, परतश्च तस्यामेव मालविकायामनुरागाभिव्यक्तिः, यत्र

यत्र यया दिशा व्यज्यत कविना तदतितरां हृद्यम्। तथा प्रकोपिताया इरावत्याः पादयोः पतित्वा राज्ञः प्रसादनञ्च नायकानां दाक्षिण्याभिव्यञ्जकं तत् काव्यस्य नापकर्षसूचकं, तथा कल्पनमाचार्य्यैरभिहितत्वेन श्रद्धेयं सहृदयानाम्। तथाहि दशरूपके—'दानं व्याजेन भूषादेः पादयोः पतनं नतिः' इत्युक्तेः प्रकोपितायाः पादपतनं न नीतिमार्गविमुखपरिकल्पनं कवीनाम्। पञ्चमेऽङ्के काव्यस्यास्य पुत्रविजयवार्त्ताश्रवणोत्सुकां धारिणीं भर्त्तुः प्रियकारिणीमुज्ञाप्य राज्ञे मालविकां समर्पयन् तस्याः हृदयस्य परमौदार्य्यं तामपि च निखिलरमणीजनादर्श-भूतां राजमहिषीं व्यजिज्ञपत् सकलकविगुणोपचीयमानः श्रीमान् कालिदासः। इत्यलं बाहुल्येन।

मालविकाग्निमित्रप्रतिपाद्यम्।

एतस्य नाटकस्य प्रथमेऽङ्के—चित्रशालायां धारिणीचित्रित-पटस्यान्ते निगूहितायाः मालविकायाः प्रतिमूर्त्तिं वीक्ष्य राज्ञो-ऽग्निमित्रस्य तां प्रति प्रेमाभिनिवेशः। द्वितीये—विदूषकेण नाट्याचार्य्यहरदत्तगणदासयोः कलहं जानयित्वा तां मालविका-मानाय्य रङ्गभूमिं, राज्ञे समवलोकनं, ततश्च राज्ञस्तस्यामनु-रागाभिव्यक्तिश्च। तृतीये—विदूषकेण मालविकामभिलषतो राज्ञो मनोभावं मालविकायाः प्रियसखीं बकुलावलिकां अव-गमय्य यथा तयोः मेलनं घटेत,तदुपायमुज्ञाप्य प्रमोदवने राज्ञा

सह मालविकाया मिलनम्। भोगिन्या इरावत्या तदीक्षणम्, तेन क्रुद्धायाः तस्या राज्ञा प्रसाद्यमानायाः अपि तस्मात् बहिर्गमनम्। चतुर्थे—इरावती राजा मालविकामभिलषतीति धारिण्यै विज्ञाप्य सवयस्यां मालविकां देव्या धारिण्या निगड़यित्वा भूनिम्नगृहे निवेशयामास। ततश्च केतकीकुसुमकण्टकेनात्मानं विध्य सर्पदंशनं व्यपदिश्य धारिणीतः सर्पविषहरमङ्गुरीयकं लब्धा तदभिज्ञानं नियमनगृहद्वारिणि दर्शयित्वा विदूषकेण सवयस्यायाः मालविकायाः मोक्षणम्। पञ्चमे—धारिण्या मालविकार्थेऽङ्गीकृतार्थप्रतिपादनाय परिव्राजिकया नेपथ्यविधानेन मालविकां सज्जीकृत्य ताभ्यां सह प्रमोदवनगमनम्। तत्र परिव्राजिकया मालविकायाः निगूहनकारणवर्णनम्, पुत्रविजयवार्त्ताश्रवणेन धारिण्या राज्ञे मालविकायाः पारितोषिकत्वेन प्रदानम्; सुष्टु वर्णितमस्तीति।

नायकादि-सिद्धान्तः।

अत्र नायको विदिशाधिपतिरग्निमित्रो धीरोदात्तः, नायिका च मालवदेशाधिपतेः माधवसेनस्य स्वसा मालविका मुग्धा। धारिणी राज्ञः कृताभिषेका महिषी, भोगिनी चेरावती तस्याः

प्रतिनायिका प्रगल्भधीरा एभिरालम्बनैः वसन्तवातादिभिरुद्दीपनविभावैः शर्म्मिष्ठाकृतिच्छलिकप्रबन्धाभिनये मालविकायाः भ्रूक्षेपादिभिरनुभावैर्विषादौत्सुक्यस्मृत्यादिभिर्व्यभिचारिभावैरास्वादपदवीमारूढ़ो रत्याख्यः स्थायिभावः आलेख्येक्षणात् समुद्रगृहे मालविकोपगमनं यावत् विप्रलम्भशृङ्गारस्य पूर्व्वरागाख्यो भेदः। ततश्च संभोगशृङ्गारः। हासकरुणादयोऽङ्गरसाः, विदूषकाद्याः सहायाः, रीतिः पाञ्चाली, गुणो माधुर्य्याख्यः, प्रस्तावनावलगिताख्या॥

मेघदूतकाव्यस्य समालोचनम्।

मेघदूतं नाम खण्डकाव्यं श्रीमन्महाकवेः कालिदासस्य निरवद्याया लेखन्या मुखनिःसृतम्। बहुशः प्रशंसन्ते काव्यमिदं सर्व्वसम्प्रदायानां संस्कृतभाषाविदः काव्यरसरसिकाः। वर्त्तते तत्र काचिदत्युत्कृष्टतमा नवीनता, यया वैदेशिकज्ञानवृद्धाः पाश्चात्यसभ्या अपि परमानन्दधारामधिगच्छन्तः कथयन्ति, यत् कालिदास एव कवीनामुपरिचरः सेक्सपीयरसमानतामवाधमविवादमधिगच्छतीति। इदं तावत् सर्गद्वयघटितमतिसुन्दरं परमहृद्यञ्च। अस्य खलु रसः शृङ्गारः,रचना मन्दाक्रान्ता-

वृत्तघटिता नितान्तमानन्दमुत्पादयति। सुस्थानकल्पित-यतिविन्यासैः परस्परं मैत्रुयपगतैरिव वर्णैः समुचितनिर्भररसनम्र इव मन्दं मन्दं नुदति भावधारामेकैकशः श्लोकः। तथाहि—"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्, वामश्चायं नदति मधुरं चातकस्ते सगन्धः। गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः, सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥" इति श्लोकेन काव्यगुणान् कविः स्वयमेव प्रकटयति। यथा—'मन्दं मन्दं नुदती'त्यनेन मृदुवर्णनाप्राशस्त्यम्, 'अनुकूल' इत्यनेन पदानां मैत्राभावं, "नदती"त्यनेन ध्वनियुक्तत्वं मधुरमित्यनेन द्राक्षापाक-वत्त्वं, 'सगन्ध' इत्यनेना'ह्लादकतां' क्षणपरिचयादित्यनेन सकृत् पठनमात्रेण मनोमोहनत्वं "नयनसुभग"मित्यनेन प्रति-पाद्यस्यार्थस्य पुरोवर्त्तित्वञ्च सूचयन् काव्यस्य सर्व्वेन्द्रियाह्लाद-कत्वं प्रथमं लक्षणमिति प्रकारान्तरेण प्रपञ्चयति सकौशलमेष कविवरः। अपि च "आशाबन्धः कुसुमसदृशं प्रायसो ह्यङ्गनानां सद्यःपाति प्रणयिहृदयं विप्रयोगेरुणद्धि" अत्र सरलभावेन कवेर्यथा अलङ्कारसन्निवेशन-चातुर्य्यं तदतिमनोरमं। आशा हि नाम हृदयबन्धनं चेतनानां, तथा च सर्व्व एव प्रायः समोद्यन्ते आशयैव समुज्जीवितान्तरात्मानः कठोरदुःखेष्वपि जीवन-मवलम्बन्ते पुत्त्रशोकेष्वपि समुपस्थितेषु कथञ्चन भाविपुत्त्ररत्न-माशंसमाना वर्त्तमानपुत्त्राणां मङ्गलचिन्तया वा स्थापयन्ति चित्तेषु धैर्य्यम्। पतिविरहवती च प्राप्तकठोरवेदनाभ्यर्द्दितान्तः-

करणा पुत्रादिभ्यः सम्भविष्यदेव सुखमाशंसमाना शोकं परिहरति। एवमेव नियमो जगतां। एवं हि नाम भावनिवहं सर्व्वं एवानुभवन्ति; तच्च सर्व्वानुभवविषयीभूतं भावं कविः प्रसङ्गेन काव्यरसधारया समासिक्तवचनविन्यासेन परिकल्पयामास "आशाबन्धः" इति। तथाच भूमण्डलस्य नानास्थानवेदित्वं विज्ञानपाण्डित्यञ्च बहुधा ज्ञापयामास। 'धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः" इत्यादिना परमा खल्वभिज्ञता प्रतिपाद्यते। प्रायश एव कवीनां प्रतिपत्तिर्यत्—'मेघाः पदार्थान्तराणि वासवाधिकृताः' इति, अपिच मेघस्य यन्निर्द्दिष्टपथवर्णनावसरे भूखण्डस्य नानास्थानानि वर्णितानि यथाक्रमम्। तेन सकलार्थसारकल्पद्रुमो ह्ययं विजयते काव्यकलासु श्रीमान् कविकुलविभाकरः कालिदासः। यद्यप्येतदेव काव्यं निर्म्माय कल्पनाकुशलेन कविना विरतिरालप्स्यत, तथापि तस्य महाकविनाम जगति प्रथितमभविष्यत्। एतस्य कवितापर्य्यालोचनेषु प्रत्येकमेव पदबन्धेषु भावसमावेशेषु च तथा तथा प्रतिभासते, यत् कालिदासो लेखनीमुपक्रम्य लेखान्नविरराम। नापि चिन्तावसरमङ्गीचकार; तथा तस्य सरलया कवितया सरलभावनिवहेन च प्रतिपद्यते, यन्नासीदस्य समानः स्वाभाविककाव्यरसनिपुणः कश्चिदपरः कविरिति कृतं पल्लवितेन।

मेघदूतप्रतिपाद्यविवरणम् ।

गुह्यकेश्वरस्य कोऽप्यनुचरः स्वाङ्गनायामत्यन्तमनुरक्ततया आत्मनियोगकर्म्मणि नितान्तमौदास्यं स्थापयन् तदर्थं न येते। तेन यक्षराट् क्रुध्यन् तस्मै वर्षमेकं प्रियाविच्छेदक्लेशमनुभूय रामाद्रौ निवसेति शशाप। ततस्तदभिसम्पातेन प्रक्षीणात्मदैवभावः स यक्षाधिपानुचरः अलकातो रामगिरौ पपात। तत्राष्टौ मासानुषित्वा दयिताविच्छेददुःखदुःखितान्तःकरणः उन्मत्तप्रायोऽभवत्। ततश्च आषाढ़स्य प्रथमदिवसे नवजलधरपटलैरुपरुद्धे नभस्तले प्रियाविरहदुःखविदूनमानसः स यक्षो धैर्य्यमपहाय दयितान्तिकमात्मोदन्तं प्रेरयितुं दौत्याय तमेव नवीनं धाराधरं प्रार्थयामास। तस्य भवन गमनपरिचये चित्रकूटादलकान्तं यावत् प्रसङ्गतः पार्श्ववर्त्तिनश्च भूखण्डस्य मानचित्रं नग-नदीप्रभृतीनाञ्च स्वरूपं व्यजिज्ञपत् मञ्जुलपदविन्यासाद्यलङ्कारनिबन्धनैः पूर्व्वमेघनामनि आदिमे सर्गे कविवरः। उत्तरमेघे तु अलकान्तर्वर्त्तिनो निजावासस्य दयितायाश्चाप्यभिज्ञानं गुह्यकाङ्गनाया विरहावस्थासमाश्वासनम् वाचिकार्थकथनञ्चातिहृद्येनालङ्कारसन्निवेशेनैव वर्णितमिति किं बहुना वाक्प्रपञ्चेन।

मेघदूतस्य नायकादिसिद्धान्तः ।

अस्य खलु नायको गुह्यकाधिपानुचरो गुह्यको धीरोदात्तः, नायिका च तदङ्गना स्वकीया मध्या विरहिण्यालम्बनविभावौ, जलधरसञ्चयादय उद्दीपनविभावाः, प्रणयापरपर्य्यायप्रकृष्टज्ञानशून्यतादयोऽनुभावाः, अवसादप्रभृतयो व्यभिचारिणः, रतिः स्थायी भावः, प्रवासविप्रलम्भशृङ्गाराख्यरसोऽङ्गी, करुणप्रभृतयश्चाङ्गरसाः, रीतिः पाञ्चाली, गुणो माधुर्य्याख्यः, दूतो जलधरः सन्देशहारकः इति ।

किरातार्जुनीयस्य समालोचनम् ।

किरातार्ज्जुनीयं तावत् तत्रभवतः कविकुलतिलकस्य भारविनाम्नो महाकवेः सुधावर्षिलेखनीप्रसूतमतिप्राचीनं महाकाव्यम् । एष ग्रन्थः श्रीमन्महाभारतस्य वनपर्व्वतः कुरुराजदुर्य्योधननिर्जितानां द्वैतवनमधिवसतां युधिष्ठिरप्रमुखपाण्डवानां तात्कालिकवृत्तान्तविशेषमवलम्ब्य विरचितः । अत्र च तेषामन्यतमस्यामोघवीर्य्यशालिनोऽर्ज्जुनस्य परिगृहीतकिरातवेशात् पशुपतेरस्त्रलाभो विशेष इति । कविकुलवरेण्येन भारविणा किरातार्ज्जुनीयमिति नाम्ना ग्रन्थोऽयं प्रथमं

पर्य्यचायि। परतश्चास्य कविसंज्ञया भारविरित्यपरमभिधानं प्रचरितम्। महाकाव्यलक्षणे च 'कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा' इत्युक्तेः कविनामानुसारेणापि महाकाव्यस्य नामकरणं नासङ्गतमेव। तथाहि शिशुपालबधं नाम महाकाव्यं 'माघ' इति कविनाम्ना रावणबधकाव्यञ्च 'भट्टि'रिति कविनाम्ना प्रख्यातमवलोक्यते।

स खलु महात्मा भारविर्भारतभूमेः क्व चन प्रदेशे पत्तने वा जननमभिलभ्य कमन्वयमलमकरोदिति ज्ञातुं सर्व्वथैव कौतुकं वर्त्तते सहृदयानां, किन्तु तन्निर्व्वचनमतीव दुःशकम्। हिमवतोऽत्यधिकवर्णनदर्शनात् अधुनातनस्य सिकिम इत्यभिधेयजनपदस्य उत्तरदिगुपान्ते यत्र इन्द्रकीलनामको हिमवदंशविशेषः आस्ते, यं सव्यसाचिनस्तपःस्थानतया कविः सविशेषं वर्णितवान्, तस्योपत्यकायामधित्यकायाञ्च शबरजातीया निवसन्ति—ये हि किरातवेशा पार्व्वतीपतेः सैनापत्यं परिगृह्य सहार्ज्जुनेन युयुधुः। एतत्सर्व्वमन्यदपि हिमवदैश्वर्य्यं कविर्यादृशं वर्णितवान्, तत्पाठेन स्वत एव चेतसि उदेति, यदपरिचितस्थानमहिम्ना दूरस्थेन केनापि तादृशं वर्णितुं न शक्यते। सुतरामिवामनन्ति कतिशः कृतिनः तत्प्रदेश एवास्य कवेरावास इति। जनश्रुतिरपि तेषामेव मतं समर्थयते। अनुश्रूयते तावत्—अध्ययनकाले गुरुकुलं निवसतो गोचारणप्रसङ्गेन हिमवदुपात्यकाधित्यकादिदेशं पर्य्यटतस्तद्विभूतिपर्य्यवेक्षणेन

कवेर्मनसि कवित्वप्रतिभा समजनि, ततोऽसौ भारतेतिहास-माश्रित्य प्रतिदिनमेकैकं पद्यं निर्म्माय भूर्ज्जपत्रे योजयामास। ततश्च तदेव गच्छता कालेन एकीकृत्य किरातार्ज्जुनीयमिति नाम्ना प्रख्यापितवान्।

"तावद्भा भारवेर्भाति यावन्माघस्य नोदयः।
उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥"

इति श्लोकं पर्य्यालोचयन्तः केऽपि भारविमाघयोः समकाल-माविर्भावमुद्भावयन्ति, तन्न समीचीनम्। यतो दृश्यते, षट्पञ्चाशदधिकपञ्चशतशकसंवत्सरे राज्ञा पुलिनकेशरिणा माघकवये प्रदत्तताम्रशासने कालिदासेन समं भारवेर्नामोल्लेख इति। तत्रोत्कलितोऽयं श्लोक :—

"येनायोजि नवेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्त्तिः कविताश्रितकालिदासभारविकीर्त्तिः॥"

अनेन ताम्रशासनानुप्रमाणेनानुमीयते,यदेष भारविनामा कविश्चतुर्द्दशशतादपि वर्षात् पूर्व्वमाविरासीदिति। सुतरां तस्यैवानुकृतं माघकविनेति कुतः सन्देहावसरस्तत्र। शिशुपालवधपर्य्यालोचनावसरे तत् सर्व्वमुपपादितं, नेहोक्तं विस्तरभयादिति। अस्य च महाकवेर्व्विरचनचातुर्य्यदर्शनेनास्मादृशां चेतसि प्रतिभासते, किरातार्ज्जुनीयं नाम महाकाव्यं कालिदासकृतकतिपय-साहित्यमन्तरेणाधुनातनास्मद्देशप्रचलितानां काव्यानां मूर्द्धनि वर्त्तत इति। इह तावत् कर्त्तव्यनिर्णयकाष्ठामधिगच्छत्

द्रौपदीभीमयुधिष्ठिराणामन्योऽन्यसुक्तिप्रत्युक्तिव्याजेन राजनीतिरत्यधिकमुत्कर्षं दर्शितवान् स खलु कविकुलतिलको भारविः। तथा इन्द्रार्ज्जुनसंवादेऽप्यतिमहतीं नीतिं पार्थस्यालोकसामान्यबलवीर्य्यवर्णनया महत्यात्मशक्तिञ्चोद्घाटयामास। चरचारित्वं राजनीतिः, सहोदरं प्रति सहृदयता, पाण्डवान् प्रति सुप्रसन्नस्य व्यासस्य सहसा समागमः, अर्ज्जुनं प्रति पाशुपतास्त्रलाभार्थमुपदेशः, देशान्तरं यियासुना स्वामिना सह पतिव्रताया व्यवहारः, शरत्समृद्धिः, हिमवद्विभूतिः गभीरवाग्विस्तरेण कविनातिमधुरपदविन्यासेन वर्णितम्। असावर्थगुर्व्वी तरलमतीनां धीपरिणमननिपुणा वाणी विद्वज्जनमनसि समधिकतरमानन्दमुत्पादयत्येव। अत एव बहिः कठोरान्तर्म्मधुराणां भावार्थसमूहानां समावेशचातुर्य्येणापि माहात्म्यमस्यानन्यसाधारणम्। उक्तञ्च तत्रभवता सूरिसत्तमेन टीकाकृता मल्लिनाथेन—
"नारिकेलफलसम्मितं वचो भारवेः सपदि यद्विभज्यते। स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्॥" इति कल्पतरोरिवास्य भारविप्रबन्धस्य मधुरफलमास्वाद्य के न खलु विमुग्धाः अत्र जगति? काव्यशास्त्रपर्य्यालोचयद्भिरमुष्मादलङ्कारलक्षणोक्तं तावत् काव्यपाठफलमत्यधिकानन्दश्च प्राप्यत इति कृतं बाहुल्येन।

किरातार्ज्जुनीयस्य संक्षिप्तेतिवृत्तम् ।

अस्य खलु प्रथमे सर्गे—द्वैतवने युधिष्ठिरसविधे दौत्यनियुक्तस्य वनेचरस्य समागमः, वनेचरेण दुर्य्योधनस्य राजनीतिनैपुण्य-वर्णनम्, गृहीतपारितोषिकस्य तस्य प्रस्थानम्, युधिष्ठिरं प्रति द्रौपद्या ओजस्विनी रणोद्दीपिनी वाणी च। द्वितीये—भीमस्य ऊर्ज्जस्वलं समरपक्षपातिवाक्यम्, युधिष्ठिरस्य च शान्तिपूर्णं वचनजातम्, भगवतो व्यासस्य समागमः। तृतीये—व्यास-स्यार्ज्जुनाय विद्यादानम्, यक्षसमागमः, द्रौपद्या उद्दीपनोक्तिः, धनञ्जयस्य हिमालयपादविशेषमिन्द्रकीलं प्रति प्रस्थानञ्च। चतुर्थे—शरत्सुषमावर्णनम्, धनञ्जयस्य हिमाद्रिदर्शनञ्च। पञ्चमे—हिमवतो वर्णनम्, अर्ज्जुनस्य हिमवतो मूलप्राप्तिश्च। षष्ठे—इन्द्रकीले सव्यसाचिनः आरोहणवर्णनम्, तस्य च तपश्चरणम्, वनेचरमुखादिन्द्रस्य अर्ज्जुनकृततपस्याश्रवणम्, तत्तपोभङ्गाय च सुरसुन्दरीप्रयाणम्। सप्तमे—गन्धर्व्वैः सहाप्सरसामिन्द्रकीले सविलासगमनादिकथनम्, तत्रागतानां तेषां शिविरसन्नि-वेशादिवर्णनञ्च। अष्टमे—गन्धर्व्वाणामप्सरसाञ्च कुसुमचयनादि विविधक्रीड़ावर्णनम्। नवमे—सन्ध्यावर्णनम्, चन्द्रोदय-वर्णनम्, सुरतक्रीड़ावर्णनम्, प्रभातवर्णनञ्च। दशमे—धनञ्जयप्रलोभनायाप्सरसामनेकधा विलासाः, तस्य च तपो-विघ्नार्थमप्सरसां प्रयासः, तासां चेष्टानैष्फल्यञ्च। एकादशे—

विप्ररूपधृगिन्द्रपार्थसंवादः, पार्थायेन्द्रस्य महेशाराधनोपदेशश्च। द्वादशे—अर्ज्जुनस्य महेशाराधनम्, तापसमुखात् शिवस्य तदुपलम्भस्तथा किरातवेशिनः शिवस्य शूकरशरीरधृतो मूकदानवस्य च प्रयाणम्। त्रयोदशे—मूकदानववधः, पार्थसमीपे शिवदूतसमागमः, तदुक्तपार्थाधिक्षेपश्च। चतुर्दशे—पार्थकृत-किरातपतेरधिक्षेपः, शिवार्ज्जुनयोर्युद्धवर्णनञ्च। पञ्चदशे—चित्रयुद्धवर्णनम्। षोड़शे—किरातवेशस्य महेशस्यानन्य-साधारणसमरकौशलसन्दर्शनेनार्जुनस्य चेतसि वितर्कः, शिवेन सहार्जुनस्यास्त्रयुद्धवर्णनम्। सप्तदशे—शिवार्ज्जुनसमागमः। अष्टादशे—अर्जुनस्य पाशुपतास्त्रलाभः, इन्द्रादिदेवानामपि भगवन्निदेशेन वरदानपुरःसरं स्वस्वास्त्रप्रदानम्, युधिष्ठिर-समीपे अर्जुनसमागमनञ्च वर्णितम्।

किरातार्जुनीयस्य नायकादिसिद्धान्तः।

अस्य किरातार्जुनीयाख्यमहाकाव्यस्य नायकोऽर्जुनो धीरो-दात्तः, प्रतिनायकश्च किरातपतिरालम्बनविभावौ, दूतमुखोच्चरित किरातपतिवाक्यानुरद्दीपनानि, नायकप्रतिनायकयोर्धनुरा-कर्षणादयोऽनुभावाः, धृत्यादयो व्यभिचारिभावाः, उत्साहः स्थायी, वीरोनाम रसोऽङ्गी, शृङ्गारादयोऽङ्गरसाः, रीतिः पाञ्चाली, गुणः प्रसादाख्यः, किरातपतिप्रतिहतदूतो निसृष्टार्थ इति।

शिशुपालवधस्य समालोचनम् ।

अस्ति किल संस्कृतभाषानिबन्धेषु शिशुपालवधं नाम महाकाव्यं परमरमणीयम्। एतत् काव्यं कविवरिष्ठेन श्रीमता माघेन कविना निर्म्मितम्। स खलु माघः श्रीधर्म्मनाभस्य राज्ञः समस्तकरणाधीश्वरस्य प्रधानामात्यस्य सुप्रभदेवस्य नप्ता, श्रीदत्तकस्य सूनुः गुर्ज्जरदेशमलंकृत्य प्रादुरासीदिति पुरातनतत्त्वान्वेषिणां कतिशः कृतीनां मतम्। तस्य कवेः श्लोकस्तु प्राचीनालङ्कारिकस्य तत्रभवतो मम्मटभट्टस्य कृतौ काव्यप्रकाशे उत्कीर्णतया मम्मटभट्टस्यापि पूर्व्वतनकाल एव कवेर्ज्जन्मसमय इति तेषां सिद्धान्तः। मम्मटभट्टस्य जीवनकालो हि खीष्टीयैकादशशताब्द्यां, सुतरां माघकवेरुत्पत्तिस्तु तत्पूर्व्वस्यां नवमशताब्द्यामुत दशमशताब्द्यां वेति प्रत्नतत्त्ववेदिनामनुमानम्।

यातु तावन्महाकविरयं यत्र देशे यस्मिन् समये जन्म परिगृह्य वा यत्कुलमलमकार्षीत्, अलं तदालोचनया, स हि कविशिरोमणिः शिशुपालवधं नाम महाकाव्यं प्रणीय कविकुलेषु अमरत्वमलभत इति सर्व्वथा वितर्कविरहितं वचः। काव्येऽस्मिन् यत् कठोरपदोपन्यासेन रचनागौरवं प्रकटितं, तत्रभवता कविना; तद्धि तस्य कृतौ शशिनो लाञ्छनमिव कियान्दोषः प्रस्तूयते समालोचककुशलैः। तथैवैकस्य सुरम्यपदविन्यासानुरोधेन एकैकशः श्लोकं निर्म्माय अप्रस्तुतवर्णनया

च काव्यस्यैतस्य प्रायेणाङ्गाङ्गमिव पुष्कलत्वं नीतम्। तेन च यद्दोषजुष्टं परिगण्यते, तच्च सोढ़व्यं सर्व्वथा सज्जनानाम्। नूनं तदन्तरितं चेत् काव्यमार्गस्य शीर्षमलमकरिष्यत् शिशुपालवधं नामेति कः सन्देहावसरस्तत्र? अपि तु गभीरतरपदयोजनया दिशा तया अर्थगौरवेण मञ्जुलतालङ्कृतोपमाद्यलङ्कारनिवहेन च रमणीयमिवैतत् सुरसपूर्णं विद्वज्जनगणमानसानन्दकरम्। एवं वासुदेवोद्धवरामाणां कर्त्तव्यमन्त्रणामिषेण परमा नीतिरालम्बिता। परन्तु भगवतो वासुदेवस्येन्द्रप्रस्थप्रयाणगिरिनदी-प्रभातादिचित्रचित्रितेन अनन्यसुलभकवित्वप्रतिभोन्मेषिता कविना।

"उपमा कालिदासस्य भारवेरर्थगौरवम्।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥"

इति यत् कविभिर्म्माघकाव्यं प्रशस्यते, तत्तु तस्यापरिमेयकवित्वशक्तेर्महान् दृष्टान्तः। परं तदमूलमतिरञ्जितं वा वक्तुं न प्रभवन्ति सन्तः। अन्यच्च भारविपदमनुगच्छतोऽस्य कृतिरिति कवितागतसौसादृश्येनानुमीयते यद्विद्भिस्तदत्र कतिपयानि तथाविधानि सादृश्यानि प्रदर्श्यन्ते—

भारविकृतौ किरातार्ज्जुनीये महर्षिवेदव्यासः पाण्डवानां समीपमागत्य कर्त्तव्यमादिदेश; शिशुपालवधे च देवर्षिर्नारदः केशवान्तिकमुपेत्य कृत्यवस्तु प्रस्तावयामास। किरातार्ज्जुनीये युधिष्ठिरादीनां यादृशी राजनीतिर्वर्णिता, शिशुपालवधेऽपि

क्षणग्लरामोद्गमानां तादृशो नोतिः समालोचिता। किराता-र्ज्जुनीये प्रख्यातवीर्य्यशालिनोऽर्ज्जुनस्य तपश्चरणार्थमिन्द्रकीलाव-स्थितिः, शिशुपालवऽधेपि हरिप्रस्थस्थितस्य हरेरैवतकशिलोच्च-याधिवासः। एकत्र यमकालङ्कृतैः श्लोकैर्हिमालयस्य विपुलै-श्वर्य्यवर्णनम्, अन्यत्र च तदलङ्कारसहकृतैस्तच्छन्दोबन्धैश्च रैवतकस्य तादृगेव वर्णना। एकत्र सुररमणीनां वनविहार-जलकेलि-नायकागमनविरहादीनां मधुस्यन्दिनी रचना ; अन्यत्र च तत् सर्व्वमेवानुपूर्व्वमवतिष्ठते। किरातार्ज्जुनीये किरातपतिः पार्थमुत्तेजयितुं दूतं प्रेरितवान्, शिशुपालवधेऽपि भगवतो वासुदेवस्य भर्त्सनार्थं चेदिपतिर्दूतं प्रेरयति स्म। एकत्र पञ्च-दशसर्गे एकाक्षर-द्व्यक्षरयमकालंकृतैः श्लोकैः समरवर्णना ; अन्यत्रोनविंशसर्गे तथालङ्कृतैस्तच्छन्दोबन्धैश्च युद्धवर्णना, किराता-र्ज्जुनीये कविना—'श्रियः कुरूणाम्' इत्यादिना श्रीशब्दोपादानेन मङ्गलमाचरितम्, शिशुपालवधेऽपि कविः—'श्रियःपतिः' इत्या-दिना तस्यैव शरणीमनुकृतवान्। तथान्त्यश्लोके प्रतिसर्गस्य कविना किरातार्ज्जुनीये लक्ष्मीशब्दप्रयोगेण यन्मङ्गलमाचरि-तम्, माघेनापि तत्र तत्र तथानुष्ठितम्। तथा च किराते— 'ततः शरच्चन्द्रकराभिरामैः' इत्यादि 'श्रियं विकर्षत्यपहन्त्य-घानि' इत्यादि 'निरास्पदं प्रश्नकुतूहलित्वम्' इत्यादि 'अनु-भावता गुरुस्थिरत्वात्' इत्यादि। माघे च—'दधानमम्भोरुह-केशरद्युतीः' इत्यादि 'हरत्यघं सम्प्रति हेतुरेष्यतः' इत्यादि

'गतस्पृहोऽप्यागमनप्रयोजनम्' इत्यादि 'न नीतमन्येन नतिं कदाचित्' इत्थमन्यान्यानि प्रभूतानि सन्ति सादृश्यानि नेहोक्तानि विस्तरभयादिति, परन्तु माघोभारवेः पदपङ्क्तिमनुसृतोऽपि दार्शनिकज्ञानं भारवितस्तस्य गरीय इति बहुभिः समालोचनविशाललोचनैर्विद्वद्भिर्विभाव्यते। भारविकृतौ विरलैव दार्शनिकी कथा। माघप्रबन्धे तु सांख्योत्तरमीमांसादर्शनस्य तथा बौद्धदर्शनस्य च नानाकथाः श्रूयन्ते। भारविकवेः काव्यं निसर्गशोभासुन्दरम्। माघस्य तु गभीरगवेषणायाससफलीकृतमिव काव्यहृदयमित्यलं पल्लवितेन।

शिशुपालवधस्य संक्षिप्तेतिवृत्तम्।

अस्य हि प्रथमे सर्गे—देवर्षिनारदस्य द्वारकायां श्रीकृष्णसमीपागमनम्, तत्र श्रीकृष्णनारदयोः कथोपकथनम्, कृष्णाय महेन्द्रानुरुद्धस्य देवर्षेः शिशुपालोपद्रवकीर्त्तनार्थमेव आगमनख्यापनम्, कृष्णस्य च तद्विनाशाङ्गीकारः; द्वितीये—कृष्णस्य रामोद्धवाभ्यां स्वकर्त्तव्यनिरूपणम्; तृतीये—इन्द्रप्रस्थयात्रा; चतुर्थे—रैवतकसम्पद्वर्णनम्; पञ्चमे—रैवतकावस्थानम्; षष्ठे—ऋतुसम्पातः; सप्तमे—तरुणतरुणीनां वनकेलिः; अष्टमे—

तासामुदकक्रीड़ा ; नवमे—सायाह्नसुषमा ; दशमे—सुरत-विलास: ; एकादशे—प्रात:श्री: ; द्वादशे—रैवतकं विहाय इन्द्रप्रस्थं प्रति हरेर्गमनम्, यमुनातरणञ्च ; त्रयोदशे—युधिष्ठिरादिभिस्तस्य समागम: ; चतुर्द्दशे—पाण्डवयज्ञक्रियाकलाप:, अर्घ्यदानावसरे भीष्महितकथनया केशवायार्घप्रदानञ्च; पञ्चदशे—दोषैकदृशा चेदिपतिनाभिहित: कृष्णभीष्मपाण्डवानामधिक्षेप:, शिशुपालं प्रति भीष्मस्य गुरुगम्भीरं सदर्पवचनम्, युद्धोद्योगार्थमेव चेदिपतिप्रभृतीनां तत्स्थानतोनिर्गमनञ्च ; षोड़शे—शिशुपालधन्देशहरवर्णितं ललितपौरुषोभयार्थद्योतकावचनम्, सात्यकिनाभिहितं तदुत्तरम्, भूय एव दूतोक्तिं प्रतिपक्षतर्ज्जितञ्च ; सप्तदशे—यदुवंशीयानां सैन्योद्योगसंरम्भादिचेष्टा ; अष्टादशे—युद्धप्रकार: ; ऊनविंशे—विविधबन्धै: स एव, विंशे—चेदिपतिशासनादिवर्णितमिति ।

शिशुपालवधस्य नायकादिसिद्धान्त: ।

अस्य खलु शिशुपालवधाख्यमहाकाव्यस्य श्रीकृष्णो नायको धीरोदात्त:, प्रतिनायक: धीरोद्धत: शिशुपालश्चालम्बनविभावौ । आत्मवाक्यानि तथा दूतव्याहृतानि च शिशुपालवचनादीन्युद्दीपनविभावा:, धृत्यादयो व्यभिचारिण:, उत्साह: स्थायी,

वीररसोऽङ्गी, अङ्गरसाः शृङ्गारादयः, रीतिर्गौड़ी, ओजोनाम-गुणः, चेदिपतिप्रेरितसन्देशहरो निसृष्टार्थः इति ।

नैषधचरितसमालोचनम् ।

नैषधचरितं नाम महाकाव्यं चिन्तामणिमन्त्रोपासकेन पण्डितश्रीहीरसूनुना श्रीमता श्रीहर्षेण कविना प्रणीतम् । अयमेव कविः खीष्टत्रयोदशशताब्द्याः प्रारम्भे प्रादुर्भूय कालेन वाराणसीनरेशस्य राज्ञो जयचन्द्रस्य परिषदि मुख्यविपश्चितः पदमलभत । तेन कविना प्रथमत एव खण्डनखण्डखाद्यं नाम परमरमणीयं न्यायपदार्थघटितं सूक्ष्मविचारपद्धतिशुद्धं दार्शनिकभावनिबद्धं प्रकरणं प्रणीय राज्ञे उपायनीकृतम् । स भूपतिस्तदधीत्य निरतिशयां प्रीतिमनुभवन् कमपि काव्य-ग्रन्थं निर्म्मातुं तमेव कविमनुरुरोध । ततो राजप्रसादमनु-भुञ्जमानेन कविना उत्तरत एतल्ललितपदावलीसमालिङ्गितं शब्दालङ्कारबाहुल्यतया श्रुतिमधुरञ्च काव्यं निर्म्माय तस्य राज्ञो मनस्तुष्टिरकारि । एतच्च काव्यं श्रीमन्महाभारतस्य वन-पर्व्वान्तर्गतं निषधदेशाधिपतेः पुण्यश्लोकस्य नलस्य विदर्भराज-नन्दिन्याः सतीकुलललामभूताया दमयन्त्याः पाणिग्रहणादि-वृत्तघटितम् । अत्र चार्थालङ्काराणामतिशयोक्त्यादयः कतिपयेऽ-

लङ्कारा बाहुल्येनावतिष्ठन्ते। इह तावत् नगनगरवापीतडागारामजनपदादीनां दमयन्तीनलयोर्धैर्य्यमाधुर्य्यगाम्भीर्य्यशपथस्थैर्य्यसारल्यादीनामप्यतिशयवर्णनावसरे, सुललितपदोपस्थापितमतिनैपुण्यम् अद्भुतभावविकाशपाटवं, हंसादीनामुक्तिप्रत्युक्तौ अनन्यसाधारणं वाकपाटवञ्चातिशोभनं प्रकटितम्। अयमेव ग्रन्थः अभिनवभावसद्भावात् मधुरपदसन्निबन्धाच्चाचपादपद्मोपजीविभिस्तार्किकमुख्यै रतिमात्रं प्रशस्यते, बहु मन्यते च तैरन्यमहाकविप्रबन्धतः। किन्तु भारविमाघकाव्ययोरधःस्तरे प्रतिष्ठाप्यते अलङ्कारशास्त्रोक्तदोषदूषणादिकारणतया काव्यरसरसिकैः सहृदयैरेवातितराम्। वर्त्तते तावदेतत् सम्बन्धिनी कापि जनश्रुतिः—काव्यस्यास्य रचयिता श्रीमान् श्रीहर्षः एतदेव काव्यं निर्म्माय स्वमातुलाय काव्यप्रकाशनिर्म्मात्रे मम्मटभट्टाय पर्य्यालोचयितुं पर्य्यर्पयत्। स तु ग्रन्थमिममाद्योपान्तमधीत्य तमकथयत्—'अयि वत्सक, यद्येतत् किञ्चित् पूर्व्वं मदीयकरतलगतमभविष्यत्, तर्हि प्रभूतमेव मे श्रमलाघवमजनिष्यत्। यतो हि मया विपुलायासेन दुरवगाह्यकाव्यनीरधिं समवगाह्य मद्विरचितालङ्कारग्रन्थस्यान्तर्गतदोषपरिच्छेदस्य उदाहरणानुग्रञ्चितानि तानि चैकत्र त्वत्काव्ये अक्लच्छ्रलभ्यानि' इति। वस्तुतस्तु ग्रन्थस्यास्यालङ्कारिकदोषाधिक्येन महाकविर्भारविर्माघस्य च प्रबन्धतः किञ्चिदपकर्षं समालोचयन्ति काव्यसमालोचनकुशलाः। किन्तु तथापि आमनन्ति

ते मुक्तकण्ठं यदेतस्य रचनापद्धतिरभिनवा, रचनाविधौ च कविना कस्यापि पूर्व्वतनस्य कवेर्भावनिवहादर्शो न समकारि। एष हि ग्रन्थोऽनुपदमेव श्रुतिमधुरपदसद्भावेन प्रणयति काव्य-मार्गसंशीलयतोऽतिमात्रमानन्दम् । तथा दमयन्तीनलयोः पुण्यमयकथाकीर्त्तनेन कविरसाधारणात्मशक्तिं स्फुटीकृत्य दार्शनिकभावसंश्लिष्टकाव्यपीयूषधारया समाप्लावयति भृशं विपश्चितां मानसक्षेत्रम्। यस्याः सद्गुणनिवहवशीभूतानि सतीकुलानि। नामधेयानि यस्याः शिथिलपुण्यकलामभि-प्रसूय हृदयादपसारयति कलङ्करेखाम्। या विमुग्धविवेकेन कलिप्रभावप्रतिहततेजसा महाराजनलेन विसर्जिता कान्तारे कठोरभावमुपगत्य पातिव्रत्यविध्वंसनार्थमुपसर्पतो व्याधान् पातिव्रत्यानलेन भृशं ज्वलता प्रददाह। पुनः पातिव्रत्यबले-नव इतराभिरनाकलितेन शुभमयम् आनन्दमयम् पुण्यमयञ्च पतिसमागमं समालब्धवती। तस्याः प्रसङ्गमतिरमणीयपद-निवहोपस्थापनेन जगतां शिक्षणीयतां नयन् नितरां विजयते कविः काव्यदिशाच जगति किं तत्र विकल्पावसर इत्यलं दमयन्तीनलसम्बादसंवाहिन्या गौरविन्या गिरा।

नैषधचरितस्य संक्षिप्तेतिवृत्तम् ।

अस्य तावत् प्रथमे सर्गे—निषधाधिपतेर्नलस्य गुणकीर्त्तनम्। अधिगतदमयन्तीगुणविमुग्धस्य तस्य मारविकारः, प्रमोदवनगमनम्, तस्मिन् तेन हंसधारणम्, तस्माच्च करुणपरिदेविनो हंसस्य परित्यागः। द्वितीये—हंसमुखात् नलस्य विदर्भराजनन्दिन्या दमयन्त्याः रूपवर्णनश्रवणम्, हंसस्य कुण्डिनपुरप्रेषणञ्च। तृतीये—भैमीहंससम्वादः, हंसमुखात् तस्या नलरूप-गुणाकर्णनम्, तस्मिन् राजनि भावाभिनिवेशश्च। चतुर्थे—दमयन्त्या विरहविकारः, तस्याः जनयितुर्भीमस्य तदवगतिः। पञ्चमे—दमयन्त्याः स्वयम्बरोद्योगः, इन्द्रनारदसंवादः, नारदमुखान्महेन्द्रस्य स्वयम्बरसंवादाधिगतिः, निसर्गसुन्दरीं भैमीमभिवाञ्छतां पुरन्दरानलयमवरुणानां कुण्डिनपुरयात्रा, अध्वनि नलसमागमः, तस्य च देवदौत्यग्रहणम्, इन्द्रात् तिरस्करणीविद्याधिगतिश्च। षष्ठे—नलस्य भीमराजसदनप्रवेशः,दमयन्तीक्षणञ्च। सप्तमे—भैम्या अलौकिकरूपसम्पत्। अष्टमे—नलरूपातिशयः, तस्य दिगीशसन्देशकथनम्। नवमे—नलदमयन्तीसंवादः, अन्योऽन्यं रागादयश्च। दशमे—स्वयम्बरवृत्तान्तवर्णनं स्वयम्बरसभां द्रष्टुमाखण्डलस्य यमस्य अग्नेर्वरुणस्य चागमनम्, अपरेषां नैऋत्यादीनां दिक्पतीनां तत्रानागमने हेतुकथनम्, दमयन्तीवर्णनञ्च। एकादशे—स्वयम्बरसभास्थानां राजन्यादीनां

वर्णनम्, शाकद्वीपादीनां वर्णनं, काशीवर्णनञ्च। द्वादशे—दमयन्त्या अलीकनलसाक्षात्कारादिवर्णनम्। त्रयोदशे—लोकपालानां नलस्य च वर्णनम्। चतुर्दशे—स्वयम्बरम्, दमयन्त्या दिक्पालेभ्यो नलस्याभिज्ञानाधिगतिः, देवतानां नलाय वरप्रदानम्। पञ्चदशे—विदर्भराजेन नलानयनार्थं दूत-प्रेषणम्, दूतमुखात् भीमवचनाकर्णितेन नलेन तद्दर्शनाय गमन-प्रतिश्रुतिः, दूताय पारितोषिकदानं, दमयन्तीनलयोः पुरस्त्रीणाञ्च प्रसाधनं तासां नलदर्शनौत्सुक्यवर्णनञ्च। षोड़शे—विदर्भराजेन नलसम्भाषणं, नलाय वैदर्भीसम्प्रदानं, यौतुक-दानं, नलस्य स्वपुरगमनम्। सप्तदशे—इन्द्रादीनां द्युलोकगमन-समये पथिस्थितमेघादीनां वर्णनम्, कामादीनां स्वरूपकथनम्, प्रसङ्गतो बौद्धचार्व्वाकादीनां मतकीर्त्तनम्, तन्त्रादिशास्त्र-क्रियया मुक्तिमार्गानुसन्धित्सूनां विरिञ्च्यादिदेवोपासकानाञ्च मुक्तेर्दुर्घटत्वख्यापनम्, चार्व्वाकादीनां मतदूषणञ्च, इन्द्रस्य कलिसाक्षात्कारः, कलेर्निषधात्रस्थितिः। अष्टादशे—भैमी-नलयोः सम्भोगसौधविभूतिकीर्त्तनम्, तयोः विहारप्रकार-कथनञ्च। ऊनविंशे—प्रभातवर्णनम्। विंशे—दमयन्ती-नलयोरन्योऽन्यं रागाभिव्यञ्जकाख्यानम्, दमयन्तीसख्या कलया नलस्योक्तिप्रत्युक्तिः, वैतालिकया मध्याह्नसमयवर्णनञ्च। एक-विंशे—नलस्य पूजागृहवर्णनम्, तत्रत्यानामुपचाराणां तथा सूर्य्यस्य गिरिजापतेःविष्णोर्दशमूर्त्तेश्च वर्णनम्। नलेन दमयन्त्या

अभिभाषणम्, सायन्तनविधिविविधित्सोर्नलस्य बहिर्गमनम्। द्वाविंशे—सायंकालवर्णनम्, तमोवर्णनम्, तद्वर्णनमिषेण पुनः बौद्धमतं कणादमतञ्चाख्यापनम्, चन्द्रोदयस्तत्र तथा चन्द्रस्य च वर्णनमिति संक्षेपः।

नैषधचरितस्य नायकादिसिद्धान्तः।

एतस्य नायको नलो धीरोदात्तः, नायिका च दमयन्ती स्वकीया मुग्धालम्बनविभावौ, अन्योऽन्यचक्षुरादिक्रिया अनुभावाः निर्व्वेदादयो व्यभिचारिणः, हंसमुखोच्छ्वसितानि परस्परोच्चरितानि वाक्यानि कुसुमचन्द्रचन्दनवसन्तादयश्चोद्दीपन-विभावाः, रतिः स्थायी, शृङ्गाररसोऽङ्गी, स च प्रथमसर्गादारभ्य सप्तदशसर्गान्तं यावत् विप्रलम्भस्य पूर्व्वरागाख्योभेदः। तत्परं सम्भोगशृङ्गारः करुणादयश्चाङ्गरसाः, रीतिः वैदर्भी, गुणो-माधुर्य्याख्यः, दूतोहंसो निसृष्टार्थः इति।

कादम्बर्याः समालोचनम्।

अधुना प्रचलितकाव्यनिवहेषु कादम्बरीनाम गद्यकाव्य-मतिहृद्यं सहृदयानाम्। इदं तावत् कविकुलभूषणाचार्य्येण श्रीमता वाणभट्टेन विरचितम्। स खलु वाणः शोणनदस्य

पाश्चात्ये रोधसि प्रीतिकुटपदे वात्सायनान्वयजननस्य चित्रभानो-रौरसेन राजदेव्या जठरे निखिलकवित्वशक्तिमुपचीय समजनि। तस्य बाल्ये वयसि परलोकमुपरतायां जनन्यां जनक एव जननी-निर्विशेषेण तमतिमात्रं पुपोष। ततो विधातृविधानेन चतुर्दशे वर्षे वाणे जनकश्चित्रभानुरपि त्रिदशपुरमयात्। तेन स परमनिर्वेदमालभमानः पितृवियोगदुःखविदूनमानसः कतिचित् दिनानि स्वगृहे उषित्वा 'दुर्मनायमानस्य मे देशाटनमेव विधेयम्' इति विमृष्य तदर्थं गृहतो बहिरगात्। ततस्तेन गच्छति काले गिरि-नदी-निर्झरादीनां परमरमणीयां निसर्गजां शोभां जनपदनगरीणाञ्च सञ्चीयमानां श्रियमवेक्ष्य महत्या आत्म-कवित्वशक्तेरनुकूलोपादानानां परमसंग्रहः समकारि। ततः कतिचित् तिथावुपचिते तमात्मभवनमागतमवगम्य तद्यशो-विमुग्धो राजा हर्षदेवः मेखलनामानं सन्देशहरं प्रेरयित्वा स्वगृहमानीय स्वसंसदमलमकार्षीत्। ततः प्रभृति तत्रैव निवसन्नमन्दानन्दसन्दोहदं सकलसुधीजनमानसमरालं कादम्ब-रीनाम कथाग्रन्थं हर्षचरितं, शार्दूलविक्रीडितछन्दोपबद्ध-देवीमाहात्म्यात्मकं चण्डिकाशतकं पार्व्वतीपरिनयनाटकञ्च विरच्यामरत्वमलभत। तत् कवित्वोन्मेषितायां परमसहाय एव हर्षदेवः खीष्टीयसप्तमशताब्द्या मध्यभागे कान्य-कुब्जस्य सिंहासनमलमकार्षीत्। नितरां कवेरपि स एव प्रादुर्भावसमयः। यातु कविरयं यत्र देशे यस्मिन् काले जनन-

मभिग्टह्य यदन्वयमलमकरोत्। कृतं तद्गवेषणया तस्यानवद्यगद्यविरचितोऽयं ग्रन्थः सुवर्णसमलङ्कृतया अभिनवरसभरोद्भिन्नया भारत्या समालिङ्गितोऽनुत्तमात्मसौभाग्येनोपलक्षितो विचरति धरणीतले। इमां गुणाढ्यप्रणीतपैशाचभाषामय्या बृहत्कथायाः कथामवलम्ब्य प्रणिनाय। अत्र च शूद्रक--वैशम्पायान--हारीत-जाबालि-पुण्डरीक-कपिञ्जल-चन्द्रापीड़-महाश्वेता--श्वेतकेतु-कादम्बरी-चित्ररथ-हंस-गौरी-मदिराप्रभृतीनामन्योऽनन्यव्यवहारादिवर्णनमिषेण गन्धर्वाणामागमोक्तचतुर्द्दशकुलानामकृत्रिमानां प्रेम-स्नेहादीनामव्याहतगतिर्भगवतः कुसुमायुधस्य शासनानाञ्चालोकसामान्यया रसवत्या वर्णनया कविरत्यद्भुतायाः कवित्वप्रतिभाया अनन्यसाधारणीं शक्तिमवतारयामास। तथा च सुहृत्प्रेम्नः परमकाष्ठामलङ्काराणाञ्च निरतिशयसमावेशमनुपदमेव संलभामहे। एतस्याः कथाया अभिनवेन भावेन केषां न सहृदयानां हृदयमाह्लादकल्लोलिनयामतिमात्रं नाप्लाव्यते। केषां न वा सुखयन्ति आप्यायन्ते च वर्णयोजनस्थितिगतिरीतिपद्धतयः। तथा चातिमात्रमधुरं शुकनासोपदेशमधीयानैः का नाम नीतिर्दुर्लभा? दुःशीलायाः स्वभावलोलायाः श्रियः वारवनिताया इवासद्वृत्तकथनेन च विद्यासाफल्यमेव कविमुख्येन प्रतिपादितम्। किं बहुना गीर्वाणवाणीं परिसंशीलयतोऽतिमात्रमेतस्याः प्रत्येकांश एव मोहयत्यत्र

जगति। हन्त! किं नाम दुर्भाग्यं सारस्वतमन्दिराधिष्ठितानां साहित्यालङ्कारशास्त्रनिसेविनां, यदेतस्याः निरवद्यायाः कथायाः पर्य्यवसानमन्तरा कविस्त्रिदशपुरमभिययौ। परतस्तदवशिष्टांशस्तु तदङ्गजेन पितृपदपङ्क्तिमनुसृत्य नानाभावादिकाव्यगुणनिचयेन निर्म्मातुं परमयत्नोऽकारि। किन्तु जनकसदृशी रचनाशक्तिस्तस्य नासीत्; अत्र तु तदधीयाना आचार्य्यवर्य्या एव प्रमाणम्। तथा च तत् कथायाः आदिमांशपाठेन यावन्ति सुखान्यादद्दते लोका न तथापरांशपाठेन। इत्यास्तां विस्तृतिः कादम्बरीकथासमालोचनप्रसङ्गेषु।

कादम्बर्य्याः सङ्क्षिप्तेतिवृत्तम्।

एतस्मिंस्तावत् काव्यकथामुखे प्रथमतो राज्ञः शूद्रकोपाख्यानम्, तस्य रूपवर्णनञ्च। तत्समीपे चाण्डालपुत्त्र्याः शुकानयनम्, शुकशूद्रकसंवादः, शुकस्यात्मवृत्तान्तादिकथनप्रसङ्गे जावालिना समागमः,जावालेः शुकप्राक्तनजन्मकथारम्भश्च; कथारम्भे तु नृपतेस्ताड़ापीड़स्य तदामात्यस्य शुकनासस्य च सुतोत्पत्तिः, चन्द्रापीड़-वैशम्पायाननाम्नोश्च, तयोर्व्विद्याभ्यासः, शुकनासादुपदेशोपलब्धिः, दिग्विजयप्रयाणम्, चन्द्रापीड़स्य किन्नरमिथुनानुसरणम्, अच्छोदसरोवर्णनम्, तत्र महाश्वेतया

संलापश्च, महाश्वेताकथाप्रसङ्गे तु तस्याः विरहेण पुण्डरीकस्य मरणम्, तद्देहस्य च सोमलोकाधिगतिः, कपिञ्जलस्य तदनुसरणम्, सिद्धपुरुषसमाश्वासनमवगम्य महाश्वेतायाः प्रत्याचारपरिग्रहश्च। चन्द्रापीड़स्य कादम्बरीसमागमः, परस्परावलोकनविमुग्धयोस्तयोः कादम्बरीचन्द्रापीड़योः भावाभिव्यक्तिः, कादम्बर्य्याः विरहः, पत्रलेखायाः सविधे कादम्बर्य्याः खेदोक्तिरित्यादि सुष्ठु वर्णितम्। अपरांशे तु महाश्वेतायाः सौन्दर्य्यविमुग्धस्य वैशम्पायनस्य तदभिशापेन पञ्चत्वप्राप्तिः, शुकयोनिसमागतिश्च तदुपश्रुत्य चन्द्रापीड़स्यापि मरणम्; अशरीरिणीवाणीसमाश्वासितायाः कादम्बर्य्याः अपि ब्रह्मचर्य्यावलम्बनम्, कपिञ्जलप्रत्यागतिरिति जावालेः कथोपसंहरणम्, पुण्डरीकचन्द्रापीड़ावतारभूतयोः शुकशूद्रकयोरनलप्रवेशः, चन्द्रापीड़स्योज्जीवनम्, चन्द्रलोकतः पुण्डरीकस्याधिगमः, तयोश्च स्वस्ववल्लभाधिप्राप्तिः, आत्मनिलयगमनञ्च वर्णितमित्यलमधिकवाक्योपन्यासेन।

कादम्बर्य्याः नायकादिसिद्धान्तः।

अस्याः खलु नायकश्चन्द्रापीड़ोधीरोदात्तः, नायिका च कादम्बरी स्वकीया मुग्धालम्बनविभावौ, इन्दु-चन्दनान्योऽन्योक्तादय उद्दीपनविभावाः, परस्परचक्षुरादिक्रिया अनुभावाः, निर्व्वेदप्रभृतयोव्यभिचारिभावाः, रतिः स्थायी, करुणविप्रलम्भा-

स्वप्रशृङ्गाररसोऽङ्गी, करुणादयोऽङ्गरसाः, रीतिर्गौड़ी, गुणो-माधुर्य्याख्यः, गद्यमुत्कलिकाप्रायमिति ॥

दशकुमारचरितस्य समालोचनम् ।

काव्यमितन्नीतिरसपूर्णं गद्यमयाख्यायिकेति प्रस्तूयते काव्य-रसरसिकैर्विपश्चिन्मुखैः । एतस्य तावत् रचयिता सकला-लङ्कारशास्त्रपारंगतः श्रीमान् पण्डितकुलभूषणाचार्य्यो दण्डी नाम कविः । स किल कं देशं कं वा कालमधिकृत्य प्रादुरासी-दिति विज्ञानमतिदुःशकम् । समीच्य तस्य दण्डीति नाम न शक्यते तदेव तस्य नामेति वक्तुं यतश्चतुर्थाश्रमवासिनं सन्न्यासिन-मेवानेनैवोपनाम्ना विशेषयन्ति सन्तः, नितरामिषोऽपि तदाश्रमीय इति सहृदयानां हृदयम् । परं कवेरस्य कलापरिच्छेद-छन्दो-विचिति-काव्यादर्श-दशकुमारचरितादीनामालोचनया दण्ड्या-चार्य्यमन्तरेण किमपि विशेषवृत्तमवगन्तुं नार्हति । काव्यादर्शे वैदर्भीरीतेर्भूयसीप्रशंसादर्शनाद् आमनयन्ति केऽपि पुरातत्वज्ञाः सोऽयमपि कविर्दाक्षिणात्यप्रदेशीयविदर्भजनपदवासीति । भवतु स यद्देशवासी किमु सन्न्यासी अथवा गृहस्थाश्रमवासीति, कृतं तदालोचनया, तस्य काव्यमिदमधुना प्रचलितकाव्यनिबन्धेषु काव्यमार्गाननुशीलयन्तं सन्नीतिपथं सविशेषमुन्नयतीति किमूह-

स्यावसरस्तत्र। परं तस्य सन्दर्भपाठे स्फुटमेवैतत् प्रतिभाति यत् कवेरनन्यसुलभः कोऽप्यनिर्व्वचनीयो भावनिवहः सुगूढ़ं विद्यते लेखनीगत इति। वर्त्तते तावदेतद्ग्रन्थविषयिणी कापि प्रवादवार्त्ता—'श्रुत्वा तु भुवनवृत्तान्तम्' इत्यारभ्य 'इत्याकलय्य योगानन्दतिष्ठम्' इत्यन्तमेवाचार्य्यपादानां लेखनीप्रसूतम्। पूर्व्वापरांशौ नापि तल्लेखनीविनिर्गताविति प्रवादवाक्यस्य वीजोद्घाटनमतीवासम्भवम्। मन्यामहे 'नह्यमूला जनश्रुतिः' इति चलितकथासमालम्बिनो वयं, कविना पूर्ण एव ग्रन्थो निर्म्मित आसीत्, परतो येन केनापि कारणेन तदंशौ विनाश-मुपगतौ। न चेदाद्यन्तचरितद्वयं कथमसम्पूर्णं स्यात्। कथं वा सप्तकुमारचरितवर्णनेनैव दशकुमारचरितमिति नाम विहितमार्य्यमिश्रैः। साभिनिवेशं पर्य्यालोचितेन भागत्रयाणां न रचनासाम्यं प्रतीयते; सुतरां पूर्व्वोत्तरभागनाशानन्तरं तत्शिष्यवर्गाणां येन केनापि तदंशौ निर्म्मितौ। भोजराज-समये दण्डिनामधेयः कश्चन दण्ड्याचारपरिग्रहपरः कश्चित् कृतिवर आसीत्। सएव वा दशकुमारचरितवर्णनमिषेण तदानीन्तनराजनीतिं लोकाचारं समाजिकनानादोष-गुणाख्यानं महत्यात्मकवित्वशक्तिं प्रसङ्गतो लोकानां हित-कथनञ्च विचित्ररचनाकौशलेन जगति प्रकटितवान्। याश्चात्र च्युतसंस्कृतयः परिलक्ष्यन्ते, तासु काश्चित् लिपिकरकरप्रमादजाः का अपि वा महामहीयसां कवीनां निरङ्कुशतया प्रयुक्ता इति

अस्माकं हृदयम्। ये तावदात्मनि दृढ़सत्यसन्धाः करतलामलकवदतिदुष्कराण्यपि कार्य्याणि ते साधयितुं प्रभवन्तीति सुव्यक्तमेवास्मिन् परिलक्ष्यते। अपि च वसुरक्षितविहारभद्रयोरनुकूलप्रतिकूलवाक्याभ्यां महानुपदेशो धूर्त्तप्रतारणप्रकाराधिगमस्य शोभनं दर्शितः कविना। स्थूलत इयन्त एव प्रतिपाद्यविषयाः, पुनरप्यस्यातिसूक्ष्मभावेन नीतिगुणाख्यानपूर्व्विका पर्य्यालोचनातिबाहुल्यसापेक्षा कृच्छ्रसाध्या च, अतएवास्माभि गौरवभिया दिङ्मात्रं प्रदर्शितम्। आशास्महे काव्यरसरसिकानां पुरातत्त्वगवेषणप्रेप्सनाञ्च यथाकथञ्चिदपीयं प्रत्युपकारमातन्वीतेति किं बाहुल्येन।

दशकुमारचरितस्य संक्षिप्तेतिवृत्तम्।

काव्यस्यास्य पूर्व्वपीठिकायां राजहंसस्य मानसारेण सह युद्धम्, निर्जितस्य राजहंसस्य विन्ध्याटव्यावस्थानम्, तस्मिन्नेव राजवाहनस्य जन्म, अपरकुमाराणामधिगमः, तैः सह राजवाहनस्य दिग्विजयप्रयाणम्, ब्राह्मणोपकारार्थं तस्य रसातलप्रवेशः, तत्र क्षुत्पिपासाहरस्य मणेः प्राप्तिः, अपरेषां कुमाराणां तदन्वेषणाय दिग्विदिक्षुगमनम्, पातालगतेन राजवाहनेन सोमदत्तपुष्पोद्भवयोः समागमः, तयोरात्मचरितकीर्त्तनम्,

राजवाहनस्यावन्तिसुन्दर्याः समागमः, इयन्तं यावत् वर्णितम्। अपरपीठिकायां प्रथमोच्छ्वासे—राजवाहनस्य नियमनम्, चम्पा-नगरानयनम्, तत्रैव बन्धमोक्षः, सुरतमञ्जरीशापवृत्तान्तस्यात्मनो बन्धविवरणस्य च समाकर्णनम्, दशकुमारमिलनम्, द्वितीयो-च्छ्वासात्—अष्टमोच्छ्वासं यावत् अपहारोपहारवर्म्मार्थपाल-प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुतानां कुमाराणां यथाक्रमं स्वस्व-वृत्तान्तवर्णनम्, विश्रुतराजवाहनयोश्चरितोपसंहारः; राजहंसस्य राष्ट्राधिगतिश्च।

सोमदत्तः—सत्यवर्म्मणो गर्भ्यामुत्पन्नः, कालीनाम्न्या विमात्रा सरित्स्रोतसि धात्र्या सह क्षिप्तः, दैवगत्या स्रोतसा नीय-मानं काष्ठफलकं प्राप्य तत्रारोप्य तया त्रातः, काष्ठफलकलग्न-सर्पदंशनेन उपरतायां धात्र्यां वामदेवशिष्येण बालं प्राप्य राज्ञे राजहंसाय उपायनीकृतः। चरितेऽस्मिन् सोमदत्तस्य मणिप्राप्तिः 'चौर' इति तस्य कारारोधः, तत्र बन्दिभिर्म्मानपालकटकं समागत्य युद्धेन जित्वा मत्तकालं परिणीतया चञ्चललोचनया महाकालं गच्छतः अध्वनि राजवाहनेन समागमोऽभूत्।

पुष्पोद्भवः—कालयवननाम्नि द्वीपे कालगुप्तोनाम वणिजः कन्यां सुवृत्तां परिणीय कालक्रमेण भ्रातृविलोकनकुतूहलेन रत्नोद्भवः श्वशुरालयात् निजदेशागमनसमये यानभग्नान्नि-मग्नयापि धात्रीत्रातया सुवृत्तया वनभूमौ प्रसूतः, वारणभीताया धात्र्याः अङ्कच्युतः सोमदेवशर्म्मणा प्राप्तः राजहंसाय दत्तश्च।

चरितेऽस्मिन् वह्निगिरिभ्यां पुष्पोद्भवस्य मातापित्रोस्त्राणम्, अन्योऽन्यपरिचयः, चन्द्रपालबन्धुपालाभ्यामालापः, दारुवर्मणो गुप्तहननम्, बालचन्द्रिकालाभः, राजवाहनेन समागमः।

उपहारवर्म्मा—प्रियंवदायां प्रहारवर्म्मणः उत्पन्नः, राज्यच्युते काननमार्गेण पलायमाने पितरि शार्दूलत्रस्तया उपमातुर्हस्तात् स्खलितः, दैवगत्या मृतकपिलाशवस्य क्रोड़लीनः किरातैः संप्राप्य देव्युपहारीक्रियमाणः, तापसेन च्छलेनानीय राज्ञे राजहंसायोपहृतः। चरितेऽस्मिन् उपहारवर्म्मणः उपमातुर्मुखात् पित्रोर्व्यसनाकर्णनम्, पुष्करिकामुखेन च कल्पसुन्दर्याः पत्यौ द्वेषोत्पादनम्, अलौकिकरूपलिप्सोः विकटवर्म्मणो गूढ़हननम्, राज्याधिगतिः, सिंहवर्म्मसाहाय्यार्थं समुपस्थितस्य तस्य राजवाहनेन सह मेलनम्।

अपहारवर्मा—भूपतिरेकदा तीर्थस्नानाय गच्छन् शवर्य्याः क्रोड़े राजलक्षणयुक्तं बालकं वीक्ष्य अर्थादिना तां शबरीं परितोष्य बालकं गृहीत्वा महिष्यै समर्पितवान्। अयमपि प्रियंवदायां प्रहारवर्म्मणो जातः। चरितेऽस्मिन् राजवाहनदर्शनमभिलिप्सोरपहारवर्म्मणो महर्षिमरीचेराश्रमगमनम्, तस्य सविधे तद्वेश्यासंसर्गेण स्वतपःस्खलनविवरणाख्यानम्, विरूपकस्य वेश्यासक्त्या आत्मधनक्षयकथनम्, अपहारवर्म्मणो द्यूतक्रीड़ा, चौर्य्यम्, पथि कुलपालिकया समागमः, उदारकभवने तस्या नयनम्, भूयोऽपि कुबेरदत्तावासे चौर्य्यम्, अर्थपतेस्तोरणभङ्गः, राग-

मञ्जर्य्यामनुरक्तिः, चर्म्मभस्त्रिकया तज्जननीस्वसारौ प्रलोभ्य तदुपयमनम्, राजद्वारेऽभियुज्य सापवादमर्थपतिनिर्व्वासनम्, प्रमत्तस्यापहारवर्म्मणः कारारोधः, तस्मिन् काराध्यक्षं कान्तकं रागमञ्जर्य्याः सेविकया शृगालिकया राजतनयालाभाय विसृज्य तस्याज्ञाक्रमेण कारातः सुरङ्गां विधाय कान्तकं निहत्य तेनैव सुरङ्गापथेनान्तःपुरप्रवेशः, राजदारिकायामम्बालिकायामनुरक्तिः, चण्डवर्म्मणाम्बालिकायाः हरणम्, अपहारवर्म्मणो वधस्तत्र राजवाहनाधिगमश्च ।

अर्थपालः—कान्तिमत्यां कामपालाज्जातः, मात्रा श्मशाने परित्यक्तः, तस्मात् विमात्रा यक्षिण्या तारावल्या वसुमत्य उपायनीकृतः । चरितेऽस्मिन् अर्थपालस्य पूर्णभद्रमुखात् जनकस्य अक्ष्युद्वारादेशव्यसनाकर्णनम्, स्वप्रयुक्ताहिगरल-विचेतनस्य तस्य मृतव्यपदेशेन मात्रा गृहानयनम्, विषप्रकोपो-पशमनम्, सिंहघोषबन्धनार्थं सुरङ्गाखननम्, भूगर्भे च मणि-कर्णिकाकन्यकाप्राप्तिः, सिंहघोषबन्धः सिंहघोषसाहाय्यार्थं समागतस्य तस्य राजवाहनेन समागमः ।

प्रमतिः—मन्त्रिसुमतेर्जातः, तरोरधः प्रसुप्तस्य तारावल्या प्रसादानीतस्य तस्य नवमालिकासमागमः, अन्योऽन्यानुरागबन्धः, तयैव भूयः पूर्व्वतरुमूलानीतस्य सुप्तोत्थितस्य तस्य निर्व्वेदः, तारावलीमुखात् कुमारीवृत्तान्तश्रवणम्, नवमालिकाप्राप्त्यर्थं श्रावन्तीयात्रा, अध्वनि पञ्चालशर्म्मणा संलापः, श्रावन्त्यां सखी-

सुखादात्मनि नवमालिकानुरक्तिश्रवणम्, पाञ्चालशर्म्मकन्याव्यपदेशेनान्तःपुरप्रवेशः, स्नानव्यपदेशेन च अपसर्पणम्, पाञ्चालशर्म्म-जामातृमिषेण भूयः समुपस्थितिः, न्यस्तकपटद्विजकुमारी-विनिमयेन राज्ञो नवमालिकासमर्पणम्, सिंहवर्म्मार्थसमागतस्य प्रमतेः राजवाहनेन समागमः।

मित्रगुप्तः—सुमित्राज्जातः, तस्य च दामलिप्तनगरे बाह्यो-द्यानप्रवेशः, तस्मिन् कोषदासेन समागमः, चन्द्रसेनोपस्थितिः, सर्व्वेषां कन्दुकवत्याः क्रीड़ासन्दर्शनम्, मित्रगुप्तकन्दुकवत्योः अन्योऽन्यानुरागाभिव्यक्तिः, भीमधन्वना मित्रगुप्तस्य जलधि-निक्षेपः, नाविकानामुद्धारः, पोतयुद्धेन मित्रगुप्तस्य भीमधन्वावग्रहः कस्मिंश्चिद्द्वीपे ब्रह्मराक्षससमागमः, तेन किं क्रूरं, किं गृहिणः प्रियहिताय, कः कामः, किं दुष्करसाधनमिति पृष्टम्, तेषामपि प्रश्नानाम्—स्त्रीहृदयम्, दारगुणाः, संकल्पः, प्रज्ञा, इत्युत्तरमिषेण धूमिनीगोमिनीनितम्बवतीनामाख्यानोप-वर्णनम्, अपरराक्षसचोरितायाः कन्दुकवत्या ब्रह्मराक्षसेन मोचनम्, दामलिप्तनगरागमनम्, कन्दुकवत्या उद्यमनम्, सिंहवर्म्मप्रसङ्गेन राजवाहनेन समागमः।

धूमिनी—त्रिगर्त्तजनपदे महति दुर्भिक्षे समुपगते भक्ष्याभावपीड़ितैः श्वशुर्य्यैर्गवां यूथं दासीदासजनमपत्यानि ज्येष्ठमध्यमभार्य्ये च क्रमेण भक्षयित्वा कनिष्ठभार्य्या धूमिनी भक्ष्यतया परिकल्पितेति धन्यकेन भर्त्रा तस्मादपनीय त्राता

तत्पोषितं कमपि विकलपाणिपादकर्णनासिकं विकलाङ्गं कामयमाना तृष्णार्त्तं भर्तारं कूपे निक्षिप्य तमेव विकलाङ्गं स्कन्दमारोप्य देशान्तरं गता, कदाचित् सार्थवाहव्रातं धनाकम-वलोक्य 'एष हि मन्नाथाङ्गवैकल्यकृत्' इति राजद्वारि अभियुज्य तस्य प्राणदण्डाज्ञामकारयत्। ततः स पङ्गुः कृतज्ञान्तःकरण-तया तस्याः दुश्चरितवर्णितवान्। तस्माच्च क्रुद्धेन राज्ञा सा कुक्कुरपाचिका कृता।

गोमिनी—द्राविड़ेषु काञ्चिनामनगर्यां शक्तिकुमारं श्रेष्ठि-सुतं शालिप्रस्थेनैव निष्पन्नं भक्ष्यमभोजयत्। तेन च परितुष्टेन श्रेष्ठिपुत्रेण सा ऊढ़ा। जातु पतिं वाररमणीसंसक्तं ज्ञात्वाप्यरुष्टा पत्युर्बहुमता आनन्दमाससाद।

निम्बवती—सौराष्ट्रजनपदे वलभीनाम नगर्याम् बलभद्रनाम्ना वणिक्पुत्रेण परिणीता, तया रहसि रभसविघ्नितसुरतसुखो झटिति द्वेषं बबन्ध। ततः सा भर्त्तुरनभिमता परिव्राजिका-मन्त्रणया कनकवतीनाम गृहीत्वा भर्त्तुर्बहुमता देशा-न्तरमगात्। तत्र क्रुद्धया चेष्टया 'परनारीहारी' इति पौरेषु अभियुक्तेषु भर्त्तरि 'साहम्' रत्नवतीति रहस्यं प्रकाशयामास।

नितम्बवती—अवन्तिपुर्यामनन्तकीर्त्तिनाम्नः स्थविरसार्थ-वाहस्य भार्या सातिशयपतिपरायणा, तत्कामुकेन कलह-कण्टकनाम्ना शूद्रपुत्रेण श्मशानकृतावासेन श्रमणिकया पुत्रार्थं प्रलोभ्य प्रतार्यमाणा हृतपादाङ्गदा चतारमूला सप्रमाणं

'पिशाची' इति प्रख्यापिता। पत्या परित्यक्ता च। सा मर्त्तुकामा कलहकण्टकेन स्वायत्तीकृता।

मन्त्रगुप्तः—मन्त्रिसुमन्त्रादुद्भूतः, स कदाचिद्रात्रौ वनावनौ शयानः श्रुतकिङ्कराक्रन्दनमनुसरन् कर्द्दमकन्यकां कनकलेखां बलिमभिलषन्तं तापसं निहत्य किङ्करैः कन्या-वरोधं नीतः, तत्र गूढ़ं विचरन् जयसिंहेन सागरतीरोद्यानगतेन जनकेन समपहृतजायाशोकविधुरः वर्णिलिङ्गी आन्ध्रं यात्वा शाठ्येन जयसिंहं सरोमध्ये गूढ़ं हत्वा स्वयं नवीनरूपधृक् जयसिंहोनाम गृहीत्वा प्रजापालनसुखमनुभवन् सिंहवर्म्म-प्रसङ्गेन चम्पामागत्य राजवाहनेन मिलितः।

विश्रुतः—सुश्रुतादुत्पन्नः, बिन्ध्यारण्ये विचरतस्तस्य भास्करवर्म्मणा संलापः, कूपपतितस्य नालीजङ्घस्य उद्धरणम्, तस्य मुखात् अनन्तकीर्त्तिदुर्नीतिवसन्तभानुराज्याधिगमवसुन्धरा-कामुकामित्रवर्म्मप्रसङ्गादिसमाकर्णनम्, भास्करवर्म्मनाली-जङ्घाभ्यां भक्ष्यार्पणम्, आत्मनोऽपि भोजनम्, विषमालाप्रयोगेन वसुन्धरया मित्रवर्म्मवधः, देवीविग्रहमूलात्, भास्करवर्म्मणो विश्रुतस्य च उद्गमनम्, वसन्तभानुं विजित्य भास्करवर्म्मणः जनकपदप्रतिष्ठापनमिति दशकुमारचरितवस्तु-संक्षेपः।

दशकुमारचरितस्य नायकादिसिद्धान्तः ।

अस्त्यत्र काव्ये मगधाधीशस्य राजहंसस्याङ्गजो राजवाहनो नायकः । स च धीरोदात्तः, नायिका च मालवराजपुत्री अवन्तिसुन्दरी, सा स्वकीया मध्या चालम्बनविभावौ, चन्द्र-चन्दनवसन्तादय उद्दीपनविभावाः, अन्योऽन्यानुरागबोधक-चक्षुरादिक्रिया अनुभावाः, निर्वेदादयो व्यभिचारिणः, रतिः स्थायी, सम्भोगशृङ्गाराख्यरसोऽङ्गी, वीरप्रभृतयोऽङ्गरसाः, रीतिः वैदर्भी, गुणः प्रसादः, चूर्णकं गद्यमिति ।

रघुवंशसमालोचनम् ।

इह तावत् यावन्ति सन्ति महाकाव्यानि तेषु कविकुल-भास्करस्य श्रीमतः कालिदासस्य सुधास्राविणीलेखनुरुद्गतं भगवतो वैवस्वतोऽन्वयकीर्त्तनात्मकं रघुवंशाख्यं महाकाव्यं तृष्णाविशुष्ककण्ठस्य जलमिव, मध्यन्दिनोत्तापितस्य छायेव, विरहगुरुकस्य प्रियसङ्गम इव, प्रोषितभर्त्तृकाया दयिताधिगम इव, शिशोः प्रथमोच्चरिता गीरिव, अङ्कुरितयौवनायाः अपाङ्गदृष्टिरिव आप्याययतितरां चेतनानां चेत इति अखण्ड-नीयो वादः । प्रथमतः काव्येऽस्मिन् भूयिष्ठानि रसवन्ति नीतिप्रतिपादकानि धर्मबोधकानि वस्तुस्वभाववर्णनानि च

समाकर्षन्ति निभृततरमखिलविबुधचेतांसि अतिमात्रम्। कविरप्यत्र पूर्व्वंक्तैर्ग्रन्थैरस्तमितशब्दत्वेणोऽर्थप्राधान्यसमासक्त-चित्तः करिष्यमाणस्य काव्यस्य तादृसं गौरवमुद्भावयन् आदौ 'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥' इत्येतेन समप्रधानेऽपि शब्दार्थेऽर्थस्य परमेश्वरदृष्टान्तवर्णनेनार्थमेव प्रधानतरं मन्यत इति स्फुटत एव दृश्यतां सभ्यैः। तथा दिलिप-रघु-अज-दशरथादीनां वर्णनोपक्रमे साधारणानवेदयत् कविः यदिह शाश्वतिकं यशः समधिगम्य जिगमिषूणां त्यागस्वीकारः, वंशमुन्नमयितुमभि-काङ्क्षतां ज्ञानादीनामधिगमः, परहृदयजिगीषूणां विनयः, प्रभू-कल्याणाधिगन्तुमनसां गुरुषु गरीयाननुरागः, एवमात्मजीवन-त्यागमुत्साहेन परहितसाधनप्रयोजनम् समाधेयम्, गुरूणा-मतिकठोरापि शासनपद्धतिः अविचारितैव सर्व्वथा पालनीयेति कविः सविशेषं न्यवेदयत्। एवमपि च यत् प्रजानामनुरञ्जन-समर्थ एव राजपदेनाभिधेयः। विनश्वरे जगति सत्यमेव परमो धर्मः, सत्यानुशीलनपरा स्वमङ्गलञ्च जिहासितुमपि प्रभ-वति। पितृवचनपरिरक्षणाय तनयः देवैरपि वाञ्छितं राज-सिंहासनं तुच्छोपलखण्डवत् सानन्दं परित्यक्तुं समर्थोऽस्ति। एवमपि पितॄणां तृप्तये यत् किमपि संसारसुखसाधनं परिहाय काननावनीमभिगच्छति पुत्रः। वर्त्तमाने गुरुकठोरे कर्त्तव्यता-ज्ञाने स्वीयहृत्पिण्डं स्वहस्तेन छित्वा करणीयतायाश्चरणेषु

उपायनीकर्त्तुमिव समर्थयते कर्त्तव्यतारुणदीप्तो जितेन्द्रियः। स्वाधीनचित्तानां भूदेवानां समक्षं प्रासादतलविलासिनो भूपतयः तथा पर्णकुटीरोदरशायिनो भिक्षामात्रोपजीविनस्तुल्य-मूलरमिव समादधातितराम्। इत्थमेव समाजहितसाधन-शरणीमभिव्यस्य तच्चरितादीनां सुसमावेशेन विकाशयति अनन्यसुलभां प्रतिभां कविकालिदासः। एवमपि च विपुल-समृद्धिशालिनं साम्राजंर सुखमयोऽपि संसारश्मशानभस्मत्वेन यथैव परिणस्यति, तथा तथा परस्परविरुद्धभावानां समावेशेन विजयते कविः, तस्य रघुवंशाख्ये महाकाव्ये अतिमात्रम्। दर्शयति च यत् वैवस्वदन्वयोद्भवानां पूर्व्वपूर्व्वतनानां नृपाना-मधस्तने क्रमश एव अयोध्याधिपतीनां प्रातरुद्यदादित्यतो निदाघमध्यन्दिनोस्त्रपरिपूर्णस्य सहस्रदीधितेरिव दशरथ-शासनात्यये अयोध्यासाम्राज्याधिपस्य पुष्कलो विकाशः। परतश्च रामचन्द्रस्य पर्य्यवसाने नीलनीरदैरुपनिबद्धभास्वरमण्डलमिव परवर्त्तिनां कुशादीनां भूपालानामाश्चर्य्यपरिणतिरधिगता। यथैव च दिवावसाने प्रक्षीणापि खद्योतिकाद्युतिः द्योतयति तमिस्रात्मसमसीं किञ्चिन्मात्रम्। काव्येऽस्मिन् आदितः समाप्तिं यावत् प्रतिपदमेव प्रसादमाधुर्य्यगुणयोः सुसमावेशः। उपमेयोपमेययोः साधर्म्म्यं तरलमतयो बालका अपि अप्रयासेन प्रतिपत्तुमर्हन्ति ; न केनचिदप्रसिद्धेन पदार्थेन वा समसुपन्यस्तं शाद्दश्यं कविना कालिदासेन। साकेतनगरस्य वर्णनमिन्दुमती-

वियोगप्रयुक्तराजविलापवर्णनञ्चातितरामाकर्षयति सहृदयहृदयस्तलम्, तथाहि—'शशिनं पुनरेति शर्व्वरी दयिता द्वन्द्वचरं पतत्रिणौ। इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहे॥' 'स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्' इत्यादि श्लोकैः यथैव भावनिवहमुपस्थापयति कविः मन्ये कविताशतकेनापि कविरन्यः तथात्वं प्रतिपादयितुं न प्रभवति। अपि च 'दूरादयश्चक्रनिभस्य तन्वि! तमालतालीवनराजिनीला। आभाति वेला लवनाम्बुराशेर्धारानिबद्धेव कलङ्करेखा॥' 'विचेयतारका शशिनेव शर्वरी' इत्यादि श्लोकाधिगतार्थाः के न मुह्यन्ति सहृदयाः? वस्तुतः यादृगेव सरलपदोपन्यासपुरसरं भावनिवहं तथा अलङ्कारसन्निवेशनञ्च सारल्येन कविरुपस्थापयति रघुवंशे काव्यमुख्ये तादृग्भावविशुद्धं पद्यं सारस्वतभाण्डारसंगृहीतमञ्जुलकवित्वपूर्णप्रबन्धपुञ्जेषु द्वित्राण्यपि सन्ति किं नवेति मामकानां हृदयम्। किन्तु काव्येऽस्मिन् अश्वघोषप्रणीतबुद्धचरितस्य कतिश्लोकेन समं समानपदयोजनादिभावनिवहान् तुल्यान् समीच्य मन्यन्ते केऽपि काव्यकलासमालोचकाः यत् एकेनापरस्याहृयते काव्यगठनपद्धतिः। यथाहि बुद्धचरिते—'वातायनेभ्यस्तु विनिःसृतानि परस्परोपासितकुण्डलानि। स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि॥' रघुवंशे—'तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम्। विलोलनेत्रभ्रमरैर्गवाक्षाः

सहस्रपत्राभरणा इवासन् ॥' बुद्धचरिते अश्वघोषः—'ततः कुमारः खलु गच्छतीति श्रुत्वा स्त्रियः प्रेष्यजनात् प्रवृत्तिम्। दिदृक्षया हर्म्यतलानि जग्मुः जनेन मान्येन कृताभ्यनुज्ञाः ॥' रघुवंशे—'ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु। बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्य्याणि विचेष्टितानि।' इत्यादि कवितां पर्य्यालोच्य बुद्धचरितसंस्करणकर्त्तृप्रमुखाः इ. वि. काउलप्रभृतयो विद्वांसः मन्यन्ते कालिदास एव बुद्धचरितादपहृयते भावनिवहं रघुवंशे, तत् प्रमाणयितुञ्च तस्य काव्यस्य पातनिकायामसकृदेव काव्यसंस्करणकर्त्ता काउल्महोदयः अवतारयति युक्तिजालम्। किन्तु सविशेषं पर्य्यालोचिते बुद्धचरिते तस्य सर्व्वापि चेष्टा विफलतामेवाधिगतेति मन्यामहे, यतस्तत्काव्यस्य विषयवर्णनमेवेदं प्रत्याययति चेतनानां चेतांसि, यत् कालिदासस्यैव भावपटलं समादधाति मायादेवीसूतचरित्ररचयिता कविः श्रीमान् अश्वघोषः। येन स कालिदासस्वकपोलकल्पितस्य कुमारसम्भवस्य मारभस्मीकरणव्यापारं संचिनोत्यविकलमात्मीये काव्यमुख्ये यथाहि—'शैलेन्द्रपुत्रीं प्रति येन विद्धो देवोऽपि शम्भुश्चलितो बभूव। न चिन्तयत्येष तमेव बाणं किं स्यादचित्तो न शरः स एषः ॥' इति कविता एव स्मारयति सविशेषमश्वघोषस्य पूर्व्ववर्त्तित्वं कालिदासस्य नितरामश्वघोष एव कालिदासस्य भावापहारीति पूर्व्वापरयोः पूर्व्ववर्त्तिनोऽदृष्टसन्दर्भात्। अपि च उत्कीर्णादि-

विविधोपायेन सुसमाहितं यत् शकाधिपस्य कनिष्कस्य धर्म्मोपदेष्टा एव शाक्यसिंहचरितरचयिता अश्वघोषः। शकपतेः कनिष्कस्य च खीष्टप्रथमशकाब्दग्रामेवाविर्भावकालः, नितरां धर्म्मगुरोरश्वघोषस्यापि स एव समयः। कालिदासस्य तु खीष्टप्रथमशकाब्दितोऽग्रे जन्म इति कालिदासशीर्षके प्रबन्धे सप्रमाणं प्रपञ्चितमस्माभिर्नेहोक्तं पुनरुक्तिभयात्। एतावता कालिदासस्य वृद्धत्वप्रमाणेनायमेव प्रतिपन्नः, यत् कालिदास एव बुद्धचरितरचयितुरादर्शः, न कालिदासस्य सः। वस्तुत काव्यकलारचनपद्धतौ कविकालिदासस्य यादृगेव पाटवमस्माभिः परिलक्ष्यते, न तादृशमन्येषामेव कवीनामिति कृतं विस्तरेण।

रघुवंशस्य संक्षिप्तेतिवृत्तम्।

प्रथमसर्गे—कवेरहङ्कारपरिहारः। तत्प्रसङ्गे समासेन रघुवंशीयानां चरितवर्णनम्। वैवस्वतमनुवंशे दिलीपस्य जन्म, तच्चरित्रवर्णनञ्च। पत्न्या सुदक्षिणया सह राज्ञो दिलीपस्य वशिष्ठाश्रमगमनम्। तदाश्रमवर्णनम्। दिलीपस्य सुतप्रतिबन्धकसुरभिशापश्रवणम्। नन्दिन्याः आगमनम्। नन्दिनीमाहात्म्यवर्णनम्। नन्दिनीदर्शने दिलीपस्य भाविपुत्रलाभाशंसा। दिलीपेन वशिष्ठादेशस्याङ्गीकारः। ब्रह्मचर्य्यावस्थितस्य राज्ञः मुनिकल्पितायां पर्णशय्यायां शयनम्। ततः निशावसाने

तदीयशिष्याणां वेदाध्ययनध्वनिना दिलीपस्य निद्राभङ्गश्च। द्वितीयसर्गे—प्रभाते दिलीपस्य पत्नीप्रतिग्राहितगन्धमाल्यायाः स्वेच्छानुगामिन्या नन्दिन्या अनुगमनम्। नन्दिन्या शुश्रूषा-वर्णनम्। राज्ञो वनोपशोभादर्शनवर्णनम्। दिनावसाने नन्दिन्या सह राज्ञः पुनराश्रमप्रत्यावर्त्तनम्। सपत्नीकेन पार्थिवेन दोहावसाने न्यस्तवलिप्रदीपायाः नन्दिन्याः शुश्रूषणम्। अष्टमदिवसे नन्दिन्याः सिंहाक्रमणवर्णनम्। सिंहं हन्तुकामस्य नृपतेर्भुजावष्टब्धता। नन्दिनीप्रदानेनात्मरक्षार्थं दिलीपं प्रति सिंहस्योपदेशः। तत्प्रत्याख्यानवर्णनम्। आत्मविनिमयेन नन्दिनीमुद्धर्त्तुकामं दिलीपं प्रति नन्दिन्याः प्रसन्नता। नृपतेः पुत्रवरप्राप्तिः। सिंहस्यान्तर्द्धानम्, नृपमस्तके स्वर्गतः पुष्पवृष्टिः। नन्दिनीं प्रति प्रार्थना। नन्दिन्या सह राज्ञः पुनराश्रमप्रत्या-वर्त्तनम्। गुरोः पत्न्याश्च समीपे राज्ञः नन्दिनीप्रसन्नतावर्णनम्। वशिष्ठाज्ञया तस्य नन्दिनीदुग्धपानम्। अयोध्यां प्रति प्रस्थानम्। सुदक्षिणाया गर्भधारणञ्च। तृतीयसर्गे—सुदक्षिणाया दोहृद-लक्षणवर्णनम्। तस्याः गर्भदर्शने राज्ञो मनस्तुष्टिः। पुंसवनादि-क्रियानुष्ठाने विविधगर्भपोषणसामग्रीप्रदाने च राज्ञश्चेष्टावर्णनम्। राज्ञः पुत्रोत्पत्तिः। तेन राज्ञः धनरत्नादिवितरणम्। राज्ञः पुत्रमुखदर्शनम्। पुत्रस्य "रघुः" इति नामकरणम्। ततः उपनयनसंस्कारवर्णनम्। विद्याशिक्षा। रघोर्विवाहः। एकोनशतमखस्य राज्ञः पुनरश्वमेधोद्यमः। अश्वरक्षणे रघो-

नियोगः अश्वचोरेण पुरन्दरेण सह रघोः युद्धं। रघुं प्रति इन्द्रस्य प्रसन्नता। अप्रत्यर्पणेनापि अश्वस्य इन्द्राज्ञया शताश्वमेधसमाप्तिवर्णनम्। रघोरभिषेकः। दिलीपस्य वाणप्रस्थावलम्बनञ्च॥ चतुर्थसर्गे—रघोः प्रजापालनवर्णनम्। शरदवसाने राज्ञो दिग्विजयोद्योगः। युद्धयात्रा। रघोर्यात्राकाले लाजवर्षणादिविविधशुभानुष्ठानम्। सेनासन्निवेशः। हिमवतः समुद्रोपकण्ठं यावत् समन्तात् सुह्मवङ्गकलम-उत्कलकलिङ्ग-पाण्ड्यताम्रपर्णीपारसीकयवनहूणकाम्बोजप्रग्ज्योतिषकिरातादि जनपदजयवर्णनम्। सर्वस्वदक्षिणविश्वजिद्यज्ञानुष्ठानम्। यज्ञावसाने सचिवानुमोदनेन रघोः पुरप्रवेशः। पञ्चमसर्गे—विश्वजिद्यज्ञे निःशेषविश्राणितकोषजातस्य राज्ञः समीपे लब्धविद्यस्य गुरुदक्षिणार्थिनः कौत्सस्य आगमनम्। वरतन्तुशिष्यस्य कौत्सस्य पूजादिनातिथिसत्कारः। मुनेः कुशलजिज्ञासा। राज्ञः प्रशंसापूर्वककुशलविज्ञप्तिः। गुरुदक्षिणाधनपरिमाणकथनम्। शरीरमात्रस्थितस्य नृपतेस्तादृग्धनदानाभावचिन्तनम्। वशिष्ठमन्त्रप्रभावेण भातकुबरस्य विनापि युद्धं तद्गृहे धनवृष्टिः। कौत्साय तत्समस्तदाने रघोरादेशः। कौत्सस्य गुरुदक्षिणां विना धनग्रहणे अनिच्छा। उष्ट्रवाहितयानेन तद्धनस्य मुनेराश्रमे प्रेरणम्। पुत्रवरप्रदानानन्तरं कौत्सस्य आश्रमं प्रति गमनम्। रघुपत्नीगर्भधारणम्। रघोरनुरूपपुत्रप्राप्तिः। "अजः" इति तस्य नामकरणम्।

विदर्भराजदुहितुरिन्दुमत्याः स्वयंवरवर्णनम् ।ससैन्यस्य अजस्य स्वयंवरसभागमने उद्योगः । पथि करिरूपधारिणा गन्धर्वतनयेन प्रियंवदेन सह अजस्य युद्धम् । अजस्य प्रियंवदतः सम्मोहननामकाजेयास्त्रप्राप्तिः । भोजराजधान्यां कदाचिन्निद्रागतस्य अजस्य सूतमागधकृतस्तोत्रवर्णनम् । वन्दिकृतस्तोत्रेण व्यपगतनिद्रस्य अजस्य स्वयंवरसभागमनञ्च । षष्ठसर्गे—सभागतस्य अजस्य शोभावर्णनम् । अजस्य विक्रमदर्शने सभासदामन्येषामवनीपालानामवस्था । स्वयंवरसभायामिन्दुमत्या आगमनवर्णनम् । सुनन्दया कार्त्तवीर्य्यप्रमुखाणां राजकुमाराणाम् "इमं वरय" इत्यादिकोपदेशप्रदानम् । अतिक्रान्तनिखिलावनीपालाया इन्दुमत्याः अजगले वरमाल्यदानम् । नवदम्पत्योस्तात्कालिकशोभावर्णनम् । सप्तमसर्गे—भोजराजाङ्गजसमभिव्याहारेण अजस्य इन्दुमत्याः सह भोजपुरप्रवेशनम् । इन्दुमतीमलभमानानामन्येषां हतोद्यमानां राजकुमाराणां स्वशिविरगमनम् । अजस्य इन्दुमत्याः पाणिग्रहणम्, गृहीतानुमतेरिन्दुमत्या सह अजस्य अजोध्यां प्रति प्रस्थानम् । इन्दुमत्याः स्वयंवरे विमुखैर्महीपतिभिः सह अजस्य युद्धम् । गन्धर्वदत्तसम्मोहनास्त्रेण नरपतीनां पराजयः । अजविजयश्रवणेन रघोरानन्दप्रकाशः । अजस्याभिषेकः । रघोर्गृहस्थाश्रमपरित्यागोद्योगश्च । अष्टमसर्गे—निखिलपितृगुणविभूषितस्य अजस्य राज्यपालनवर्णनम् । रघोर्वनगमनोद्योगः । अज-

प्रार्थनेन तस्य ग्रामोपकण्ठे वासः। रघोः स्वर्गारोहणम्। अजस्य पित्रर्थे शोकः। सचिवानामुपदेशप्रदानम्। नगरोपकण्ठे इन्दुमत्या सह अजस्य विहारः। इन्दुमत्याः पुत्रप्राप्तिः। "दशरथः" इति तस्य नामकरणम्। अन्तरिक्षतो देवर्षेर्नारदहस्तात् मालापतनम्। तद्दर्शने इन्दुमत्याः मृत्युः। राज्ञो विलापः। वशिष्ठस्य शिष्यमुखे सान्त्वनाप्रदानप्रसङ्गेन तृणविन्दुशापविवरणवर्णनम्। इन्दुमत्याः प्रतिकृतिस्थापनेन राज्ञः शोकापनोदनम्। दशरथस्य राज्याभिषेकः। अजस्य प्रायोपवेशनावलम्बनम्। तस्य स्वर्गप्राप्तिः। नवमसर्गे—दशरथस्य राज्यरक्षणम्। दिग्विजयः। अश्वमेधानुष्ठानम्। वनविहारवर्णनम्। वसन्तवर्णनम्। मृगयावर्णनम्। मृगयामाचरतो दशरथस्य तमसातीरगमनम्, तमसातीरे तस्य शब्दभेदिवाणनिक्षेपः। तेन सह क्रन्दनशब्दश्रवणम्। तदनुसरतो दशरथस्य मुनिपुत्रदर्शनलाभः। तस्य परिचयजिज्ञासा। प्राप्तपरिचयस्य दशरथस्य तत्समभिव्याहारे तदीयपित्रोः समीपागमनम्। स्वकीयाज्ञानकृतकर्मविज्ञप्तिः। दशरथं प्रति मुनेः पुत्रशोकप्राप्तिरूपशापप्रदानम्। तयोरन्धदम्पत्योरन्त्येष्टिक्रियानुष्ठानम्, राजधान्यां प्रत्यावर्त्तनञ्च। दशमसर्गे—किञ्चिदूनायुतवत्सरराज्यपालनानन्तरम् ऋष्यशृङ्गेण दशरथस्य पुत्रेष्टियागकरणम्। अत्रान्तरे रावणोद्वेजितानां देवानां विष्णोः समीपागमनम्। विष्णुस्तुतिः। देवान् प्रति विष्णोः प्रसन्नतावर्णनम्। राक्षस-

विनाशाय दशरथपुत्ररूपेण विष्णोरवताराङ्गीकारः। दशरथस्य पुत्रेष्टियागसमापनान्ते चरुकरस्य दिव्यपुरुषस्याविर्भावः। कौशल्याकैकेयीभ्यां यज्ञीयचरुप्रदानम्। ताभ्यां पुनः सुमित्रायै स्वस्व-चरोरंशप्रदानम्। चरुभक्षणेन तासां गर्भसञ्चारः। महिषीणां स्वप्नदर्शनम्। राज्ञः समीपे स्वप्नवृत्तान्तकथनम्। कौशल्यातः रामरूपेण कैकयीतो भरतरूपेण सुमित्रायाः लक्ष्मणशत्रुघ्नाविति द्वैतरूपेण विष्णोराविर्भावः। तेषामाविर्भावे राजस्य शुभलक्षणवर्णनम्। एकादशसर्गे—यज्ञरक्षार्थं विश्वामित्रेण दशरथसमीपे रामस्य यज्ञभूमिगमनप्रार्थना। गमनसमये विश्वामित्रात् रामलक्ष्मणयोः तारकाबधः। रामलक्ष्मणयोर्मुनीनां यज्ञशालागमनम्। रामास्त्राघातेन राक्षसबधः। विश्वामित्रेण सह रामलक्ष्मणयोर्मिथिलायज्ञभूमिगमनम्। पथि अहल्याया मुक्तिः। हरधनुर्भङ्गः। दशरथस्य विदेहराजधान्यागमनम्। सीतोर्मिलाकुशोदरीश्रुतिकीर्त्तिभिः सह यथाक्रमं रामलक्ष्मणभरतशत्रुघ्नानां परिणयः। पुत्रैः पुत्रवधूभिश्च सह दशरथस्य अयोध्याप्रत्यावर्त्तनसमये पथि जामदग्न्यसंरम्भः। जामदग्न्यपराभवः। दशरथस्य अयोध्यापुरप्रवेशनञ्च। द्वादशसर्गे—दशरथस्य रामाभिषेकाभिलाषः। कैकय्या दशरथसमीपे पूर्वप्रार्थितवरद्वयप्रार्थनम्। रामनिर्वासनम्। दशरथस्य मृत्युः। नन्दिग्रामतः भरतस्यानयनम्। भरतविलापः। रामानयनार्थं भरतस्य चित्र-

कूटयात्रा। रामादेशेन भरतस्य राज्यपालनम्। रामेण विराधबधः। अगस्त्यादेशेन रामस्य पञ्चवटीगमनम्। तत्र शूर्पणखाया नासाकर्णच्छेदनम्। स्वर्णमृगरूपधारिमारीच-सहायेन रावणेन सीताहरणम्। सीतान्वेषणम्। जटायुषा सह रामस्य साक्षात्कारः। ततः सीतासंवादप्राप्तिः। जटायुषः अन्त्येष्टिः। कबन्धोपदेशेन सुग्रीवेण सह रामस्य सौख्यम्। बालिबधः। हनूमता सीतान्वेषणम्। हनूमतो लङ्कापुरीदर्शनम्। अक्षयराक्षसबधः। सीतायै रामस्याभिज्ञानप्रदानम्। विभीषणस्य रामपक्षावलम्बनम्। सागरवेलायां रामस्य सेनासन्निवेशः। सेतुबन्धनम्। रावणेन सह रामस्य युद्धारम्भः। राक्षसमायाकल्पितराममस्तकदर्शने सीताविलापः। त्रिजटया तस्याः सान्त्वना। रामादीनां नागपाशबन्धनम्। गरुड़ागमनेन तन्मूक्तिः। लक्ष्मणस्य शक्तिशेलम्। हनूमदानीतया सञ्जीवन्या पुनः रामादीनां जीवनप्राप्तिः। कुम्भकर्णबधः। रावणबधः। सीताया अग्निपरीक्षा। राक्षस-राजेत्र विभीषणस्याभिषेकः। सीताहनूमत्सुग्रीवविभीषणैः सह रामस्य अयोध्यायां प्रत्यावर्त्तनञ्च। त्रयोदशसर्गे—विमानारोहणेन प्रयातस्य रामस्य सीतासमीपे समुद्रविभूति-कीर्त्तनम्। राममित्रस्य गुहस्य आवासदर्शनम्। सुमन्त्र-विलापः। सरयूदर्शनम्। वशिष्ठप्रमुखेण सह भरतेन रामादीनां प्रत्युद्गमनम्। भरतेन सुग्रीवादीनामभिनन्दनम्।

भरतेन रामसीतयोश्चरणवन्दना। मन्दीभूतजवेन पुष्पकेण रामादीनामयोध्योपवनगमनञ्च। चतुर्दशसर्गे—ससीतयो रामलक्ष्मणयोर्मातृसमीपे गमनम्। कौशल्यादीनामाशीर्वाद-प्रयोगः। सीतायाः खेदोक्तिः। श्वश्रूभिस्तस्याः परिसान्त्वनम्। रामाभिषेकः। विभीषणादीनामातिथ्यवर्णनम्। सीतायाः स्वहस्तविनिर्मितपुरष्कारदानेन सुग्रीवादीनां स्वदेशानुगमनानु-मोदनम्। रामस्य प्रजापालनम्। सीताया गर्भोत्पत्तिः। गर्भपरिपुष्टिकामेन रामेण सीतायाः स्पृहणीयजिज्ञासा। सीतायाः पुनस्तपोवनदर्शनाभिलाषविज्ञप्तिः। इत्यवसरे रावण-चोरितायाः सीतायाः समन्ततो निन्दाप्रचारः। तपोवन-दर्शनव्याजेन वाल्मीकेराश्रमे सीताया निर्व्वासनम्। सीताया वाल्मीकेराश्रमागमनम्। वाल्मीकेरुपदेशेन सीताया आश्रमो-चिताचारावलम्बनम्। रामेण सीतायाः प्रतिकृतिनिर्माणम्। अश्वमेधानुष्ठानञ्च। पञ्चदशसर्गे—रामस्य समीपे लवण-पीड़ितानां तपस्विनां समागमः। रामादेशेन लवनबधार्थं शत्रुघ्नस्य अभियानम्। युद्धयात्राप्रसङ्गे शत्रुघ्नस्य वाल्मीकेराश्रम-गमनम्। सीतायाः पुत्रजन्म। लवणबधः। मधुपुरे लक्ष्मणस्य राज्यस्थापनम्। वाल्मीकिना सीतापुत्रयोः 'लवः कुशश्च' इति नामकरणम्। लवकुशयोः रामायणगानशिक्षा। शत्रुघ्नस्य रामसमीपे गमनम्। रामप्रश्ने शत्रुघ्नस्य वाल्मीकेरादेशेन सीतायास्तनयजन्मगोपनम्। मृतपुत्रस्य कस्यचिद् विप्रस्य

रामसमीपागमनम्। तत्तनयस्याकाले मृत्योः कारणानुसन्धानार्थं रामस्यारण्यगमनम् तत्र शूद्रकतपस्विदर्शनम्, तस्य शिरश्छेदः मुक्तिश्च। ब्राह्मणकुमारस्य जीवनप्राप्तिः। अश्वमेधार्थं यज्ञीयाश्वमोचनम्। यज्ञे निमन्त्रितानां मुनिमहर्षीणां यज्ञसभायां लवकुशाभ्यां रामायणगानम्। रामप्रदत्तपारितोषिकग्रहणे कुशलवयोरनिच्छा; सीतानयने वाल्मीकेः समीपे रामस्याङ्गीकारः। सपुत्रसीताया रामसमीपागमनम्। पुनरग्निपरीक्षार्थं सीतां प्रति रामस्य निर्देशः। सीताया वसुन्धरागर्भाश्रयणम्। युधाजितादेशेन भरताय सिन्धुदेशप्रदानम्। भरतपुत्रयोस्तक्षकपुष्कलयोः तक्षकपुष्कलस्याधिपत्यग्रहणम्। लक्ष्मणतनययोरङ्गदचन्द्रकेत्वोः कारापथाधिपत्यनिर्वाचनम्। मुनिवेशधारिणः कृतान्तस्य रामसमीपागमनम्। निषिद्धेऽपि गृहे दुर्वाससः प्रवेशनम्। लक्ष्मणस्य स्वर्गारोहणम्। कुशलवयोः कुशस्थलीशरावत्योः प्रतिष्ठा। अनुजैः सह रामस्य उत्तरपथप्रस्थानम्। अयोध्यावासिनां रामानुगमनम्। रामस्य स्वमूर्त्तौ प्रवेशश्च। षोड़शसर्गे—रामनिर्वाणानन्तरं कुशलवयो राज्यपालनम्। रात्रौ स्वप्नयोगे कुशस्य दिव्यनारीदर्शनम्। तस्याः समीपे हीनप्रभस्य अयोध्यापुरस्य विविधामङ्गलश्रवणम्। वेदविद्ब्राह्मणसमीपे राज्ञः स्वप्नवृत्तान्तज्ञापनम्। ब्राह्मणानामुपदेशेन कुशस्य पुनरयोध्यागमनम्। सौधादीनां संस्कारेण पुनरयोध्यायाः संस्कारसाधनम्। देवालये विविधबलिप्रदानम्,

कुशलवयोर्गमनेन अयोध्याया विविधसमृद्धिसाधनम्। जलकेलि-समये अगस्त्यप्रदत्तरत्नालङ्कारदर्शनम्। धीवरेण रत्नान्वेषणम्। अप्राप्तरत्नस्य नृपतेर्गरुड़ास्त्रग्रहणम्। कुशास्त्रभीतेन कुमुद-नागेन भगिन्या सह तस्मै आभरणप्रदानञ्च। सप्तदशसर्गे—कुशमहिष्या कुमुद्वत्या गर्भे अतिथेर्जन्म। कुशनृपस्य पञ्चत्वप्राप्तिः। कुमुद्वत्याः पत्यनुगमनम्। सचिवैरतिथे राज्याभिषेचनम्। बालनृपतेरतिथेराज्यपालनम्। अतिथे-रश्वमेधानुष्ठानञ्च। अष्टादशसर्गे—अतिथेरनन्तरं निषधतो अग्निवर्णपर्य्यन्तं रघुवंशीयानां, ये राजानो राजत्वमपालयन् संक्षेपेण तेषां चरितवर्णनम्। ऊनविंशसर्गे—विलासिनः अग्निवर्णस्य राजत्वपालनम्। तस्य व्यसनासक्तिवर्णनप्रसङ्गेन विविधरतिवर्णनम्। राज्ञः क्षयरोगः, तेन पञ्चत्वप्राप्तिः। अग्निवर्णस्य महिष्या राजत्वप्राप्तिश्च।

कुमारसम्भवस्य समालोचनम्।

एतत् खलु कुमारसम्भवं नाम काव्यं शैवाभिधमहापुराणस्य प्रथमखण्डीयनवमध्यायत ऊनविंशाध्यायपर्य्यन्तं प्रतिपाद्य-तारकासुरबधमाश्रित्य श्रीमता कालिदासेन निर्म्मितम्। एष ग्रन्थः कालिदासस्य प्रथमे वयसि रचित आसीदिति प्रमाणेना-

वतारितं प्रमाणकुशलैः। अत्र यत् पार्व्वतीतपस्यानन्तरं पार्व्वतीं प्रति प्रसन्नेन हरेण स्वयम्बरविधानकर्त्तव्यतया उपदेशः, सप्तर्षिमण्डलस्य च तत् प्रार्थनार्थं हिमवन्तं प्रति प्रेषणं, तत् सर्वं कविकल्पितं न तु पुराणान्तर्गतमिति। अस्मिंश्च यत् भूधरराजपार्व्वतीमेनाकवसन्तरतिविलापसमाधिवर्णनादि विद्यते,तदतीव हृद्यं। तथाहि—'अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना। नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ॥' अपिच—'शशिना सह याति कौमुदी सह मेघेन तड़ित् प्रलीयते। प्रमदाः पतिवर्त्मगा इति प्रतिपन्नो हि विचेतनैरपि॥' इत्याद्यैः श्लोकैः कविना यत् काव्यस्याङ्गं व्यरचि, तदतीव सहृदयहृदयेषु प्रमोदमभिवर्षति आकर्षयति च काव्यमधीयानानां मनांसि अतिमात्रम्। किञ्च—'पर्य्याप्तपुष्पस्तवकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः। लताबधूभ्यस्तरवोऽप्यवापुर्व्विनम्रशाखाभुजबन्धनानि॥' इत्यादि वर्णनापारिपाट्यमलङ्कारमलंकृतं वचः विना कालिदाससुभाषितेन सम्भवतितरामन्यत्र केषामपि कविवाक्येषु कदापि। अत्र तावदस्ति काव्यनिर्म्माणविषयिणी सुमहती विप्रतिपत्तिः विदुषां, केऽपि मन्यन्ते सप्तदशसर्गावधि तारकासुरबधपर्य्यन्तमेव कालिदासेन प्रणीतम्। अपरे अष्टमसर्गपर्य्यन्तमेव निर्म्मितमिति। एतत् किल पक्षद्वये उत्तरपक्ष एव ज्यायानिति मामकानां हृदयम्। यतः काव्यजलधेरुत्तुङ्गमहोर्म्मिसंक्षोभितमानसानां हृदवर्म्म-

बद्दितमिव व्याख्यातृपुङ्गवेन तत्रभवता मल्लीनाथसूरिणाष्टमसर्ग-पर्य्यन्तमेव व्याख्यातम्। अपि च कौमुद्यां भट्टोजीदीक्षितेन—'सार्व्वरस्य तमसो निषिद्धये नूनमुन्नमति यज्वनां पतिः। पुण्डरीकमुखि पूर्व्वदिङ्मुखं कैतकैरिव रजोभिराहृतम्॥' इति कालिदासकृतत्वेन प्रकटितम्। उणादिवृत्तावुज्ज्वलदत्तेन तु—'रवः प्रगल्भो हृतभेरिसम्भवः' इति कुमारसंभव इति परभागावस्थितेन कुमारसंभव इति व्यवहृतम्, नतु कालिदास इति। एवमपि नवमसर्गप्रभृति काव्यं न प्रथमांशवत् प्रशस्ततमं कालिदासान्नान्येनैव केनापि कविना निर्म्मितमिति शैलीविचारेण सुकरमवगन्तुम्। यथाहि पञ्चदशसर्गे—'संग्रामं प्रलयाय सन्निपततो वेलामतिक्रामतो, वृन्दारासुरसैन्यसागरयुगस्याशेषदिग्व्यापिनः। कालातिथ्यभुजो बभूव बहलः कोलाहलः कोशलः, शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिम्भरिः॥' इत्याद्यनेके निरसाः श्लोकाः वर्त्तन्ते तत्रांशे, नितरां प्रागुक्तसिद्धान्तितं मतं नाम्रेडयं प्रच्छावताम्। अनेन कुमारसम्भवेन ब्रह्मपुराणशिवपुराणयोः समं विषयस्य तथानेकशः श्लोकस्य च साम्यात् केऽपि मन्यन्ते विद्वांसः * कालवशेन पुराणद्वये विनाशमुपगते कालिदासादधस्तनेन केनापि कविना कुमारसम्भवादाकृष्य तत्तदंशजातं वेदव्यासनाम्ना प्रक्षिप्त-

* Vide History of aucient literature by the venerable professor F. Makmuller K. M.

मिति। तत्तावतामंशानां सूक्ष्मासूक्ष्मविचारणं समयसापेक्षं बाहुल्यमयञ्च समीक्ष्य प्रोज्झिताः क्षुद्रतमेऽस्मिन् प्रबन्धे, आशास्महे यदत्र उद्धृतम्, तेनैव यथाकथञ्चित् परिज्ञानमेष्यति सभ्यानां। तथाहि कालिदासः कुमारसम्भवे—'प्रसन्नदिक्पांशुविविक्तवातं, शङ्खस्वनानन्तरपुष्पवृष्टि। शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव॥' शिवपुराणे—'दिशः प्रसेदुः पवनः सुखं ववौ, शङ्खं निदध्मुर्गगणेचरास्तथा। पपात मौलौ कुसुमाञ्जलिस्तदा, बभूव तज्जन्मदिनं सुखप्रदम्॥' कुमारे—'तां पार्व्वतीत्याभिजनेन नाम्ना, बन्धुप्रियां बन्धुजनो जुहाव। उमेति मात्रा तपसो निषिद्धा, पश्चादुमाख्यां सुमुखी जगाम॥' शिवपुराणे—'तां पार्व्वतीत्याभिजनाच्च नामतो, जुहाव तद्बन्धुजनः स्वभावतः। मात्रा निषिद्धा तपसे यदा तु सा, ययावुमाख्यां भवभक्तिभाविनी॥' इत्यादि पुष्कलमत्र वयमुदासीनाः पुरातत्त्वविशेषज्ञा एव प्रमाणम्। मन्यामहे कवेरपरिपक्वलेखनसमये रचितमेवेदं काव्यम्। तेनादर्शीकृतस्य पुराणद्वयस्य बहुलांश एवात्र पतितः, अथवा विषयसाम्यात् एकस्य श्लोकोऽपरस्मिन् शिष्यपरम्परया उन्नीत आसीदिति किं बाहुल्येन।

कुमारसम्भवस्य प्रतिपाद्यस्थूलविषयाः ।

प्रथमसर्गे—हिमालयवर्णनम्, दाक्षायणीशरीरत्यागेन पार्व्वत्याः जन्मग्रहणम्, शिवस्य हैमवतसानौ तपश्चर्यावर्णनम्, पितुरुपदेशात् पार्व्वत्यास्तपश्चरणम् । द्वितीये—ब्रह्मणस्तुतिः, तारकासुरवधप्रार्थनम्, शिवपुत्रस्योत्पत्त्या तारकवध इति ब्रह्मणा उपदिष्टे तदर्थं कन्दर्पस्मरणम् । तृतीये—शिवस्य ध्यानभङ्गार्थं मदनप्रेषणम्, रतिवसन्ताभ्यां सह मदनस्य शिवाश्रमे गमनम्, वसन्तवर्णनम्, शिवेन स्मरभस्मीकरणम् । चतुर्थे—रतिविलापः, मरणार्थं रत्या वसन्तं प्रति चितायाः प्रार्थनम्, अशरीरीवाण्या रत्याः समाश्वासनम् । पञ्चमे—पार्वत्या पित्राज्ञया सखीभ्यां सह तपस्यार्थं गौरीशिखरगमनम्, तपस्तुष्टेन शिवेन ब्रह्मचारिवेशेन पार्व्वतीं प्रति तपश्चरणप्रयोजनस्य प्रश्ने पार्व्वत्या सखीमुखेन तदुत्तरदाने ब्रह्मचारिणा महेशस्यानुपादेयतायाः प्रतिदानम्, तेन क्रुद्धायाः पार्व्वत्याः तमुपालभ्य स्थानान्तरगमनोद्योगः, तेन प्रसन्नेन हरेण निजरूपालम्बनेन पार्व्वत्याः हस्तग्रहणम्, हरं प्रति पार्व्वत्या स्वदानाय पितुः प्रार्थनाया उपदेशः । षष्ठे—सप्तर्षीणां हरेण स्मरणम्, पार्व्वतीप्रार्थनार्थं तेषां हिमवति प्रेषणम्, त्रिदिनोत्तरं पार्व्वतीविवाहस्य दिनस्थिरकरणम्, सप्तर्षीणां स्वस्थानगमनम् । सप्तमे—हरपार्व्वत्योर्व्वैवाहिक-

नेपथ्यादिरचना, वरयात्रिकाणामोषधिप्रस्थे गमनम्, विवाह-क्रियासमाधानम्, देवप्रार्थनया स्मरं प्रति हरस्य प्रसादः, पार्व्वत्या सह हरस्य कौतुकागारे गमनम्, इयन्तः समासतः एव वर्त्तन्ते विषयाः। अष्टमसर्गादीनां विषयाः बाहुल्यभयादुज्झिताः इति।

कुमारसम्भवस्य नायकादिसिद्धान्तः।

अस्य तावन्नायकः षड़ाणनः, ताड़कासुरस्तु प्रतिनायकः। वीररस एवाङ्गी, करुणादयोऽन्ये रसाः यथासम्भवमङ्गानि।

भवभूतिकालिदासयोः।

समालोचयन्ति काव्यरसरसिका यदभिज्ञानशकुन्तलमुत्तररामचरितं नाम नाटकद्वयं नाट्यनिवहेषु निरवद्यमिति। एतयोरुत्तररामचरितालोचनावसरे कालिदासकल्पितेन राज्ञा दुष्मन्तेन समं श्रीकण्ठपरिकल्पितस्य श्रीरामचन्द्रस्य तुल्यतेति तेषां परिगणना। एतयोर्नायकयोरुत्कर्षापकर्षसूक्ष्मातिसूक्ष्म-

विचारणे नोपपद्येत ईदृशी चिन्ता, यत् नायकगुणेन यथा यथा समुपस्थापितो राजा दुष्मन्तः श्रीमता कालिदासेन, न तथा श्रीरामचन्द्रमुपस्थापयितुं शशाक कविमुख्यस्तत्रभवान् श्रीकण्ठ इति। केऽप्येवमेवञ्चाहुः—यदभिज्ञानशकुन्तलापेक्षया भूयसा गुणनिवहेनालङ्कृतमुत्तररामचरितमिति, तथा च 'अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःख्यान्यपोहति। तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥' 'दलति हृदयं गाढ़ोद्वेगो द्विधा न तु भिद्यते'इत्यादौ च कवेर्यथा भावगाम्भीर्य्यं सुभगा च रचनावली न तथा कालिदासस्य प्रबन्धेषु प्रतिपद्यते। 'वसने परिधूसरे' इत्यादि कालिदासकल्पितविरहवेदनोपवर्णनस्य 'परिपाण्डुदुर्ब्बलकपोलसुन्दरम्' इत्यादि भवभूतिपरिकल्पितविरहवर्णनापेक्षया निकृष्टतेति। तथा च 'वसने परिधूसरे' इत्यादिना कविर्यथार्थमेवार्थं वर्णितवान्, न तत्रालङ्कारचातुर्य्यम्, नापि वा काव्यदिशा मनोहारित्वम्। 'करुणस्य मूर्त्तिरथ वा शरीरिणी विरहव्यथेव वनमेति जानकी' इत्यनेन च सीताया विषमता पवित्रता कथञ्चिदलौकिकता च प्रतीयते, तत्तत्स्थानीयरचनासु च कवीनामादर्शभूता प्रतिविषयमेव कविश्रीकण्ठस्यास्ते नवीना प्रतिभा। कालिदासस्य तु प्रायः प्रतिविषयं रचनासु तारतम्येन न दृश्यते गभीरता। शृङ्गाररसविकाशावसरे च अश्लीलतादिदोषदूषणम्। केवलं सरलया दिशा भावं विकाशयितुमतिमात्रं शक्तिमाधत्ते श्रीमान्

कालिदासः। अपिच एवमेवमपि ते विचारयन्ति यत् भवभूतिः यत्र यत्र यया यया दिशा भावनिवहं प्रकाशयितुं यतते, तत्र तत्र तथैव निष्पाद्य प्रणयन्ति मानसमतिमात्रं। तथाच उत्तररामचरितस्य प्रथमे रामचन्द्रस्य सीतायामत्यर्थः प्रणयः, उत्तरतः तस्या विरहेण विमनायमानत्वम्, स्थाने वीरवृत्तप्रकाशनम्, वनदेवताया अपि वासन्त्याः सीतार्थं असामान्यविषादविकाशनम्, बालानामपि कुशलवचन्द्रकेतूनां चत्रजनोचितवीररसातिरेकनिबन्ध इति।

न चैतत्तेषां वचः प्रमाणयितुं वयं किञ्चनप्रमाणमुपलभामहे युक्तिविरहितः प्रवादो न श्रेद्धेय इति नियमेनैव तां वाचं शिथिलतया कल्पयामः। तथाच प्रथमतः स्थूलतमेयं वार्त्ता पुराणकिंवदन्ति च 'काव्येषु माघः कविकालिदासः' 'कालिदासकविता, नवं वयः, माहिषं दधि सशर्करं पयः। एनमांसमबला च कोमला सम्भवन्तु मम जन्मजन्मनि॥' इति आवृद्धवनिताभ्यः साधारणानामेव हृदये जनयति काञ्चिदनन्यजननीयामानन्दधाराम्। सरलभाषानिबन्धनेन च तस्य जायते सर्व्वेषामेव काव्यरसाविर्भूतिर्म्मानसेषु। 'वसने परिधुसरे' इत्यादि कालिदासवर्णनामुपलभ्य वयं सतीप्रधानाया एव नियमपालनमधिगच्छामः। समाजशिक्षैकप्रवणस्य महाकवेः कालिदासस्य रचनाभिः सरलपदनिबद्धाभिः सरलभावनिवहनिरन्तराभिश्च यथा जायते सुतरां समाजशिक्षा न तथा गभीरकल्पनानिपुणस्य

कवेर्भवभूतेर्निबन्धात् । तथा च यदि कवीनां वचनार्थमधिगन्तुं प्रथमत एव जायते महान् प्रयासस्तर्हि उत्तरतस्तद्गतनिरतिशयापि भावधारा न सुखाय प्रभवति सामाजिकानाम् । शाकुन्तले दुष्मन्तस्य तथात्वकल्पनेन समाजशिक्षायां सर्व्वोपरि विजयते कविवरः श्रीमान् कालिदासः । तथा च प्रथमत एव कान्तारे मृगयाप्रसक्तं दुष्मन्तम्, उत्तरतः प्रशान्ततपोवनप्रवेशेन प्रशान्त-मानसं शकुन्तलायाञ्चातितरामनुरक्तं परतः शकुन्तलोन्मुख-मानसमपि तापसानां यज्ञवाधानिवारणोद्यतं विस्मृतशकुन्तलञ्च शकुन्तलोपस्थानेन तस्यां सुनीतिप्रयुञ्जन्तं परिहरन्तं पुनरुद्बुद्धस्मृतिश्चाङ्गुरीयकसमागमेनाधैर्य्यम् शकुन्तलार्थमनुतप्तं विरहविदूनमानसमपि मातलिना विदूषकस्य निपीड़ने तत्प्रति-काराय यतमानम्,ततो दानवपरिध्वंसेन प्रख्यातविक्रमं स्वर्गावत-रणकाले संप्राप्तशकुन्तलं शान्तञ्च संलभेमहि । अतएव शकु-न्तलाविरहावस्थायां यथा तस्य धीरावस्था यथा च कर्त्तव्यनिष्ठता प्रतिभासते,न तथा भवितुमर्हति साधारणस्य 'येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना स स पापादृते तासां दुष्मन्त इति घुष्यताम्॥' 'किं नाम असापि सत्त्वैरभिभूयन्ते गृहाः', इत्यादिस्थलेषु तथा प्रतीतिः । यथा यथा च शकुन्तलार्थं शोकप्रकाशः सम-जनि स च धीरतां वा नीतिकलां वा नाक्रामतिस्म, तथा च 'इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।' इत्यादिषु 'धौताश्रुशेकमुदकं पितरः पिबन्ति,'

इत्यादिषु च परिव्यक्तम्। अपि च दुष्मन्तः यदा यत्र प्रवर्त्तते तदा तदेव कर्त्तव्यविषयं स्मरतीति कालिदासनिबन्धे। भवभूतिपरिकल्पितो रामचन्द्रोऽपि नानागुणालङ्कृतः सविशेषमेव राजवृत्तिमव्याहतां परिपालयति, तस्य च वृत्तं साधारणानामेव शिक्षणार्हं,तच्च तस्यैव निबन्धतः स्फुटमेव प्रतिभाति। रामचन्द्रः सीताविरहेण नितान्तव्याकुलहृदयो यदेव कर्त्तुं व्रजति, यदेवमभिकाङ्क्षति तत्रैव समुपतिष्ठते सीताविरहगुरुका वेदना, कर्त्तव्यसंसाधने वा नियतकार्य्यानुशीलने वा सर्व्वत्रैव तस्य सीतास्मृतिः। तथाच शम्बुकसमाक्रान्तं ब्राह्मणदारकं परिरक्षितुकामो राजवृत्तया यदा कानने समुपतस्थे रामचन्द्रः,तदापि असमाहितकर्त्तव्य एव कर्त्तव्यसाधनोद्यमे शस्त्रप्रयोगावसरे सीताविरहवेदनासमाकुलितत्वं समालम्बते। प्रतिभासते चात्यर्थं तृतीयाङ्के रमणीजनस्येव प्रियजनविरहेण विलापो रामचन्द्रस्य। तथाहि—'रे हस्त दक्षिण, मृतस्य शिशोर्द्विजस्य' इत्यादि श्लोके शूद्रसूनौ कृपाणक्षेपणस्यापि वीरवृत्यस्य सुतरां सीताविरहवेदनावार्त्तासमाश्लिष्टतया रामस्य नायकगुणापकर्षः। तथाहि दुष्मन्तः तत्र तत्र नायकगुणानामिव मूर्त्तिपरिग्रहः प्रकर्षमादधाति बहुधा, अयञ्च गाम्भीर्य्यपरिहीणचेता इव प्रतीयमानस्तरलहृदयतया तस्मादङ्गीकरोति गुणापकर्षं, ततो दुष्मन्तचरिताङ्कने कालिदासः श्रीरामचन्द्रचरितरचयितुर्भवभूतितः प्रकृष्ट इति किमस्ति वक्तव्यम्, तेन

च विजयते भवभूतिकल्पनातो महामहिम्नो महाकवेः कल्पना कालिदासस्य। तथा च कालिदासः सरलया भाषया सरलेन च भावनिवहेन साधारणानामेव हृदयेषु श्रीकण्ठात् प्रतिभासते समुत्कर्षेण। केऽप्येवमपि च समालोचयन्ति यत् श्रीकण्ठस्य चित्रपरिदर्शनकल्पना छायाङ्कश्च नवीनकल्पना कालिदासस्यैव मिश्रकेशीकल्पनां शकुन्तलाचित्रपरिदर्शनञ्चानुकृत्य विस्तरेण विवृत्तेति कुशलवयोश्चन्द्रकेतुश्च वीरवृत्तप्रकाशः सुतरां बालकानां सर्व्वदमनस्यावस्थामनुकरोतीति। यतः कालिदासो हि षष्ठशताब्द्यां प्रादुर्भूत इति पुरातत्त्वान्वेषिणां मतम्। श्रीकण्ठस्तु अष्टमशताब्दीयः, सुतरां तेन जायते कालिदासतः श्रीकण्ठकवेरपकृष्टता, काव्यकलासु आविष्कृते पथि शक्नुवन्ति सर्व्व एव प्रयातुं, स एव तत्र सुदुर्लभत्वमाधत्ते यो नूतनं मार्गमाविष्करोतीत्यल्पवाचां परिशेषः।

सीताशकुन्तलयोः।

सीता नाम भारतीयानामनन्यसाधारणं परमाद्भुतमतिहृद्यं वस्तु। तादृशी रमणीकुलललामभूतातिपवित्रा कुलबालाजनमभिलभ्य नाद्यापि पुनाति कामप्यात्मनो जातभूमिम्। न प्रख्यापयति च सेव कदापि कापि कामिनी

परिजनेषु कर्त्तव्यम्। स्वासीमक्लेशं विदधती दिक्तो दिगन्तरं देशतो देशान्तरं वा पतिभक्तिम्। या हि मूर्त्तिमतीव सकलसद्वृत्तिः स्वच्छतमेव गङ्गोत्तरीयसलिलधारा, विग्रहवतीव पुण्यकला, वपुष्मतीव मन्दारकुसुमदामसौरभपरम्परा, निर्म्मितेव सुकुमारतया परिहृता च कर्कशभावेन। ग्रथितेवाकुटिलतया, समाराधितेव निखिलसद्गुणधारया। यैवाखिलकर्त्तव्यकर्म्मैकायनीभूतं पतिमेव सर्व्वसमालम्बनं मन्यमाना तदनुसरणमेव सकलकर्त्तव्यादधिकतममवबुद्धते स्म। या हि चरित्रे वा लावण्ये वा सरलतायां वा कोमलतायां वा समाजगाम दृष्टान्ततां कुलवधूनामिह जगति। पुराणकथासु तस्या एव पुण्यवार्त्ता नितरां प्रसरन्ती प्रस्थापयति हृदयमलं पुण्यतोया जाह्नवीव सहृदयानाम्। जनश्रुतिषु तस्या एव चरित्रपद्धतिः समुपदिशति साधुविशुद्धं चरित्रं लोकान्। समाजशिक्षासु च तस्या एव पातिव्रत्यं संयमयति कलुषविषयात् कामिनीसमूहान्। किं बहुना तस्या अश्रुतपूर्व्वा गुरुजनेषु भक्तिः, वयस्यासु प्रेमप्रवणता, नीचजनेषु दया, पत्यौ प्रीतिश्च केषां सहृदयानां न प्रमदयन्ति मानसमतिमात्रं, न परिलोकयामास तस्या विरक्तमानसं कश्चित् सुखेषु वा दुःखेषु वा कथञ्चनापूर्व्वभावसमाराधितान्तःकरणा सा धैर्य्यमयीव अवस्थानुकारिणी च समवर्त्तत। तस्या सत्त्वगुणमयं मानसं संसाधयति सकलहृदयेषु सात्त्विकभावम्। नितरां

वनदेवतापि वासन्ती तस्यामनुरक्ता जातेति कवेः श्रीकण्ठस्य वाक्यतः स्फुटमिवावगम्यते। सा हि वासन्ती देवतानां सकलेषु समानभावमयी प्रीतिरिति नियमेनापि यदत्यर्थं सीतायामनुरक्ता, तत्र हि तस्या गुणातिरेक एव हेतुः, तदर्थमेव तस्या विलापः, तथा धीरस्यापि रामस्य तामुद्दिश्य नारीजनस्येव रोदनातिरेकः, प्रजानां तत्र एकान्तानुरागः, मुनिकुलप्रधानाना मपि वशिष्ठादीनां तत्र देवीभावसंस्थापनम् इत्यादिबहुल- मेवास्ति सतीकुलललामभूतायाः सीतादेव्याः प्रशंसाकारणम्। प्रतिपादितं तावदुत्तररामचरिते कविकुलकुशलिना श्रीमता श्रीकण्ठेन, यन्नारीकुलेषु राघवकुललक्ष्मीः सीतैव दृष्टान्तभूतेति, तथा च प्रथमत एव वैदेह्याश्चरित्रशुद्धिप्रकाशकं वाक्यम्—'देव्यामपि हि वैदेह्याम्' इत्यादि। ततः सीताया रामेण सह परमस्निग्धभाव उत्तरतः स्वजनविरहविधुरा सीता रामोपदेशमुपश्रुत्य 'जाणामि अज्जउत्त, जाणामि' इत्यादि- सन्दर्भेण रामान्तिके अतिमात्रं सरलतां प्रकटयति स्म। वशिष्ठादेशस्य स्वीकारावसरे यदा रामः—'स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि' इत्यादि प्राह, ततश्च सीता—'अदो ज्जेव राहवकुलधुरन्धरो अज्जउत्तो' इति। न चैषा साधारणी वाणी, न चानन्यसाधारणं महत्त्वं, यत् स्वामिनः स्वपरित्यागसङ्कल्पमाकर्ण्यापि वैदेह्यास्तादृशी वचनप्रवृत्तिः। अकठोरता च तस्या हृदयस्य लक्ष्मणकथायां प्रवर्त्तमानायां

लक्ष्मण :—'एषा पञ्चवट्यां सूर्पणखा।' सीता—'हा! अज्ज-उत्त, एत्तिअं ज्जेव दंसणं" इति ख्यातमपि पूर्ववृत्तं प्रत्यक्षवत् समवलोक्य विक्लवग्रस्ता वैदेही उन्मनायितेव वेपथुमती सञ्जाता। ततश्च रामेण 'चित्रमेतत्' इति वादेन सीतायाः परिसान्त्वनम्। प्रणयविकाशोऽप्यस्या अत्यर्थमेव, तथा हि सीता—'अज्जउत्त, तुम्हेहिं वि तहिं गन्तव्वं' इति। आसक्ति-विषयमपि तपोवनं रामविरहेण सीता न सुखजनकमनुभवति। रामेण समं सा काननेऽपि सौधाधिवाससुखं मन्यते। रामः सीतां निर्दोषामपि अग्निपरिशुद्धामपि सकलगुणशालिनीमपि विसर्जयामास केवलं प्रजारञ्जनार्थमेवालीकलोकापवाददूषित कान्तारे। सा चेयं तथावृत्तान्तेनापि नाराधयामास लेशतोऽपि पत्यौ विरक्तिम्। परं पूर्वापेक्षया विरहेण विमलोकृत इव प्रेमसंवादः समधिचकार तस्या हृदयकेन्द्रं, प्रतिक्षणं प्रतिवचनञ्च रामार्थं विलापः, प्रतिपदञ्च रामार्थे विषण्णता, रामस्य क्षणं दर्शनेनापि सुधास्नानतृप्तिमनुमन्यते। तथा च छायाङ्कोपसंहारे तस्य साकल्येन प्रमाणम्। तमसा—'कथं वा गम्यते? यस्यास्तव प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः। मर्म्म-च्छेदपरैर्यत्नैराकर्षो न समाप्यते॥' सीता—'णमो णमो अपूव्वपुण्णजणिददंसणाणं अज्जउत्तचरणकमलाणं" (इति मूर्च्छति)। तमसया नितान्तमनुरुद्धापि सीता चेष्टमानापि नार्हति प्रतिनिवर्त्तयितुं दृष्टिम्। सन्ति कानने हृद्यान्यपि

गिरिनिर्झरादिमनोमुग्धकराणि श्यामविटपादीन्यसंख्यानि वस्तूनि। तत्सर्व्वमेव श्रीरामचन्द्रविरहेण लावण्यहीनमवगच्छति। न कुत्रापि शान्तिः प्रसरति सीतादेव्याः। सर्व्वमेवाशान्तिजननं, केवलं शान्तिमयं प्रमोदमयं सद्वृत्तिमयञ्च श्रीरामचन्द्रदर्शनमिति निश्चिन्वन्ती कथमिव प्रतिनिवर्त्तयतु दृष्टिं रामचन्द्रात्।

कालिदासपरिकल्पितशकुन्तलापेक्षयापि नायिकागुणैर्वैदेही प्रकृष्टेति समालोचनावसरे प्रायेणाङ्गीक्रियते विद्वद्भिः। तथा च दुष्मन्तपुरमुपस्थिता हि शकुन्तला राज्ञा विस्मृतिसूचकं वाक्यचयमुपश्रुत्य रोषातिशयदूषिता प्राह—'अणज्ज, अत्तणो हिअआणुमाणेण किल सव्वं पेक्खसि' तथा गुणवानपि स्वामिपदे समधिष्ठितोऽपि राजा दुष्मन्तः शकुन्तलया 'अणज्ज' इत्यादिवादेन यत् भर्त्सितः, स एव तस्या वैदेह्यपेक्षया अपकर्ष इति मन्यामहे। अपरेषु विषयेषु प्रायः सौसादृश्यं सीताशकुन्तलयोः, किन्तु चरित्रांशे अयमसौ तयोर्महान् प्रभेद इति।

सीता नाम जगदादर्शभूता पतिव्रता गुणवती नारीति नाधिकवचनावसरः। सा रामे ईदृगेव विमुग्धा, यत् रामेण समुत्पादितं कष्टकरमपि विषयं न मन्यते कष्टाय, परं रामदर्शनेन निखिलकष्टमपि ब्रह्मानन्दाय परिकल्पते। न जातु श्रोतुमभिशक्नोति रामस्य निन्दालेशं, वज्रपातमिव हि तत् तस्याः तुदति श्रवणयुगलं, व्यथयति च नरकज्वालेव तस्य

कष्टलव:। तथा हि वासन्ती—'अयि देव, किमिति दारुणो दारुण: खल्वसि?' सीता—'सहि वासन्दि, किं तुमं वि एव्वं वादिणी, पिआरहो सव्वस्स अज्जउतो विसेसदो मम पिअसहीए' अपि च वासन्ती—'तत् किमकार्य्यमनुष्ठितं देवेन?' सीता—'सहि वासन्दि, विरम विरम' अन्यच्च वासन्ती—'अयि कठोर, यश: किल ते प्रियं किमयशो ननु घोरमत: परम्। किमभवद्विपिने हरिणीदृश: कथय नाथ कथं बत मन्यसे॥' सीता—'तुमं जेव्व सहि वासन्दि, दारुणा कठोराअ, जा एव्वं विलवन्ती पदीरेसि अज्जउत्तं' इति। अन्यत्र रामसीतयोरनन्यसाधारणदाम्पत्यभाव:—'प्रकृतैव प्रिया सीता रामस्यासीन्महात्मन:। तथैव राम: सीताया: प्राणेभ्योऽपि प्रियोऽभवत्॥' अहो! धन्या सीता, धन्यञ्च तस्या: पातिव्रत्यं, मानवीनामेवं न खलु सम्भवति धरण्याम्। पातिव्रत्य-शिक्षार्थमेव तस्या: जननपरिग्रह:, जननेन च धन्योऽयं पुण्यमयो भारतवर्ष: इत्यस्तु तत्सम्बादसम्बाहिनी सुविशुद्धा भारती स्वल्प व परिणामिनीति दिक्।

महाकविकालिदासस्य।

इह खलु वसुधायां ये तावत् प्राचीनतमा: सारस्वतभाण्डार-संगृहीतमञ्जुलकविल्वपूर्णप्रबन्धपुञ्जरचनापटव: सामाजिकानाञ्च

सुकुमारमतीनां मानसानि रसभावादिभिरनुरञ्जयन्ति, निखिलविबुधजनानां काव्यशास्त्रप्रणेतारः कवय एव, तेषु तावत् कवीनामग्रसरोऽयं कालिदासनाम्ना महाकविः अस्मिन् देशे विदितवैभवो यूरुपादिदेशविस्तीर्णयशःपटलो भवद्भिरपि सम्यक् विदितगुणगणोऽपि मया समुपश्लोकितः साम्प्रतमानन्दमनवधिमुत्पादयेद्भवतामिति समुपन्यस्यते तद्‌गतवृत्तान्तजालम्। किन्तु परितापकरोऽत्र यन्महाकवेरवितथोदन्त इदानीमपि नाविष्कृत आसीदिति। स खलु कदा कस्मिन् पत्तने सम्बसथे वा कर्हि जन्मना कमन्वयमलमकरोत्, को वा स महात्मा य ईदृगतुलनीयं सुतमाससाद, इत्येतावन्तः कविविषयकवृत्तान्ताः नितान्तदुर्लभतया प्रतिभान्ति। परं जानीमहे क्लेशेनासादितस्य गाढ़तरतिमिरमयगिरिगह्वरप्रदेशविचुरतस्य महारत्नस्य उद्धारप्रयास इव रत्नान्वेषिणाम्; महाकवेरस्य चरितवर्णनप्रयासोऽस्माकं विफलतामुपगमिष्यतीति। तथापि आधुनिकानां पुरातत्त्वान्वेषिणां मतमनुसरन्तो विविधकिंवदन्तीनामाकलय्य सारं यथायथं वयमिदानीमाकलयिष्यामस्तस्यामलकीर्त्तेरितिवृत्तम्।

अनुश्रूयते तावत्, पुरा मालवदेशमध्युवास कश्चित् ब्राह्मणसुतः। अविज्ञातलोकतत्त्वो गोरक्षणेन निर्व्वाहयामास संसारयात्राम्। तस्मिन् देशे काचित् परमा विदुषी कन्या विद्यावतीनाम विवाहार्थं पित्रा समानीतान् पात्रीभूतान् द्विजान् वाद-

विचारेण पराजिग्ये । एवमागत्यागत्य तत्सकाशात् विचारतः पराजयमुपगच्छत्सु परं प्रतिनिवृत्तेषु बहुषु राजकुमारेषु पराजयभयात् यदान्ये राजकुमाराः विवाहार्थं नागच्छन्ति, तदा तत्पिता विचाराभावेनैवागतमानाय तनया देयेति प्रतिज्ञाय पूर्व्वपूर्व्वागतानामादानेन विफलकामेन चतुर्द्दिक्षु पुनर्व्वरानयनार्थं दूताः प्रेषिताः । ते च स्वावलम्बनीं तरुशाखां कृन्तन्तमेकं ब्राह्मणवटुमपश्यन्, दृष्ट्वैव च एषोऽल्पबुद्धिस्तस्याः पण्डितंमन्यायाः अनुरूपो वर इति विनिश्चित्य बलादेव तं भयविकलचेतसं तत्सकाशमानिन्युः । ततश्च तयोर्व्विनिवृत्ते पाणिग्रहे तमत्यन्तमरसिकमत्तकुलशिखामणिं ज्ञात्वा सा विद्वत्तमा रहसि आकार्य्य निर्व्वूढ़ं भर्त्सयित्वा गृहतोऽपसारितवती । सोऽपि तादृशापमानात् मर्त्तुकामः काननमेत्य उद्बन्धनेन प्राणान् त्यक्तुमिच्छन् दर्भमयीं रज्जुं गललग्नमकरोत् । दैवगत्या तस्मिन्नेव क्षणे तस्य अनतिदूरवर्त्तिन्याः तत्रत्यदैत्यदलदलनगलद्रुधिरानुरञ्जितायाः हरगलगरलनीलिमाश्लिष्टाम्बिकायाः चरणयुगलं तस्य दृष्टिपथपर्त्तितया मरणात् प्रतिनिवृत्तिमनयत् । तदमरीकवरीभारसंसृष्टचरणकमलं सेवितुमिच्छन् तस्माच्च प्रतिनिवृत्तत्र बहुतिथिं कायक्लेशादिभिः दुष्करकर्म्मानुचरन् कथमपि भगवतीमाराधयामास । सा च दीनदयालुस्तमेकस्मिन्नहनि प्रत्यक्षमभ्येत्य—'अयि भूसुर, त्वत्परिचर्य्यया प्रसन्ना सांप्रतम्, गच्छ निजायतनं, स्फुरतु ते निखिलकवि-

जनसुलभा प्रतिभेत्यभिधाय अन्तर्बभूव। स तु तेन परमां प्रीतिमालभमानः पुरं गत्वा भवनद्वारि तिष्ठन् रुद्धार्गलत्वेन असक्तत् "द्वारं देहि द्वारं देही"ति व्याजहार। सा तु तदाकर्ण्य पतिरित्यवधार्य 'अस्ति कश्चिद् वाग्विशेषः' इति तमुक्तवती। सोऽपि तथेत्युक्त्वा भवनान्तः प्रविश्य तत्रैव 'अस्त्युत्तरस्यां दिशि देवतात्मा' इत्याद्यैः श्लोकैः कुमारसम्भवं महाकाव्यम्, 'कश्चित् कान्ता विरहगुरुणा' इत्यादिपद्यैः मेघदूताख्यं खण्डकाव्यम्, 'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये' इत्यादिगाथाभिः रघुवंशं महाकाव्यञ्च प्रणीतवान्। पश्चात् पौरवा एतत् कवितोपभोगसुखमनुभुञ्जमानाः सातिशयविस्मयमुपगताः यथायथं तन्निखिलमुदन्तं ज्ञात्वा च कालीप्रसादाल्लब्धविद्यत्वेन कालिदास इति नाम्नाजुहुवुः। एतदैवैतिह्यं वचः न विश्वसनीयं प्रज्ञावताम्। तस्य अद्भुततमां कवितां वाग्वैभवञ्च समीक्ष्य जनैरुपनिबद्धेयं विचित्रतमाख्यायिकेति मामकानां हृदयम्। अवगम्यते च तस्य काव्यपाठेन सर्वथायं कविः मेधावी, रामायणादिप्राचीनतमान् ग्रन्थान्, तथा अन्यानपि अधीत्य सकलशास्त्रेषु तथा लोकाचार समाजप्रचलितव्यवहारविषयेषु निखिलभूधरकन्दरतीर्थादिज्ञानविज्ञान-भूगोल-खगोलादिकेषु च परं प्रावीण्यमुपागमदिति। तथा हि विरहविधुरस्वभाववर्णनमधुरे मेघदूते काव्योत्तमे रघुवंशे च सकलभुवनभूधरकन्दराणां सिद्धकिन्नरयक्षगन्धर्वादीनां

त्रिदशानामपि स्वस्वधामवर्णनपाटवं तथा मानचित्रप्रदर्शनञ्च समीक्ष्य न केषां श्रुतिविवरं मधुनाप्याययतितराम्। अनयत्र सोमवंशप्रसूनस्य हृतदितिजशरकिणलाञ्छनस्य पुरुरवसो देवाङ्गनया उर्व्वश्या समं प्रीतिप्रवणसंस्थापनया नवीनया दिशा आलोचयितॄणां चेतसि प्रद्योतयति कविः कामपि स्वर्गीया-लोकधाराम्। कुमारसम्भवे भूधरराजपार्व्वतीमेनाकवसन्त-रतिविलापसमाधिवर्णनादिसौषेण नानाभाववसुसमावेशिततया विजयते कविरनेग्रभ्यः सर्व्वथा कविप्रतिभया नानाशास्त्रज्ञान-सम्पन्नतया च। अभिज्ञानशकुन्तले नाट्यकलासंसृष्टौ यादृशी कल्पना कविकालिदासस्य तादृशी भावपरिशुद्धा कल्पना सुदुर्लभा ऋते कालिदासलेखनीं नास्यजगति। यथा हि प्रथमतः शकुन्तलां दुष्मन्तदर्शनप्रसङ्गे उक्तिप्रत्युक्त्या उभयोः परस्परमनु-रागाभिव्यक्तौ घटनापारम्पर्य्येण मत्तवारणमवतारणया तादृक् प्रगाढ़प्रणयाभिव्यक्तमध्येऽपि निर्मिषेण तयोर्व्विच्छेदमुत्पाद्य प्रक्रमोपसंहारयोश्च सामञ्जस्यं रचयित्वा अङ्कावतारं विदधानः कल्पनाकुञ्जकोकिलः श्रीमान् कालिदासः। मन्ये तादृक्-कल्पनामन्तरेण तादृशव्यापारे सुष्ठु भवितुमन्यत् प्रभवति किमपि कल्पनाकल्पितविषयेषु अन्यदिति। इत्थमेव नाटकस्य सर्व्वाङ्ग-मननुभूतभावनिवहधारया संप्लाव्य विजयतेतरामत्र जगति कविकुलविभाकरस्य सर्व्वत्रोन्मुखिनी प्रतिभाशक्तिः। एतत्तावत् शकुन्तलासमालोचनावसरे सविशेषमुपपादितमस्माभिः पुनरुक्ति-

दोषशङ्कया तेषां दिङ्मात्रमवतार्य्य, समुपन्यस्यति संप्रति कविप्रादुर्भावसम्बन्धिनो सु हतो विप्रतिपत्तिः। दृश्यते यद्वि विक्रमादित्यस्य परिषदि नव ान्यासन्, तेषु एवं कालिदास इति प्रसिद्धिः। तथाहि 'धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघट-कर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥' इति, अत्र तावत् यो हि विक्रमशब्दः समुपलभ्यते, तस्येयमर्थः प्रतिपाद्यते प्रसिद्धसंस्कृतग्रन्थपर्य्यालोच-केन सार् उइलियम् इत्यभिधेयेन, यत् बहूनां नृपाणामिवानेनो-पाधिना समुपपत्तिः दृश्यते, अतः विजयितॄणां भारतीयभूपाला-नामेव इयं ञ्ज ेति, य एव पराक्रमे सहस्रदीधितिसमः स एव विक्रमार्कः। एवमपि सम्पद्यते जनपरम्परागता काचित् वार्त्ता, यत् मालवेन्द्रो भोजराज एव विक्रमार्कः तस्यैव परिषदि नवरत्नान्यासन्। ख्रीष्टीयैकादशशतके वर्त्तते तस्य राज्ञो विद्य-मानतेति यथायथं सुमहता प्रमाणेन प्रमाणीकृतं केनचिच्छिला-लेखकेन। केचिदेव कर्णाटके राजसेवकत्वेन यवनिका-प्रसङ्गात् तस्यानतिप्राचीनतां दर्शयन्ति। तत्र विद्यमाना प्राकृतभाषापि तमेवार्थं प्रत्याययति। एवमपि च कविकाल-निर्णयव्यापारेषु प्रसिद्धतमेन वीवरनाम्ना केनचित् विदुषा कालिदासस्य ख्रीष्टीयचतुर्थशतकतमेव आविर्भावकाल इति प्रत्यादिष्टम्। इङ्ग्लिङ् नामा कश्चिदपरो विद्वान् पञ्चाश-दधिकपञ्चशततमे वत्सरे तस्य जीवनकाल इति प्रमाणेनाव-

ततार। नितरां बहुपण्डितैर्बहुधा चिन्तितत्वात् तस्य कालनिर्णयोऽप्यसुकर एव संवृत्तः। परं ज्योतिर्व्विदाभरणे 'काव्यत्रयं सुमतिकृद्रघुवंशपूर्व्वं जातं यतो ननु कियच्छ्रुतिकर्म्मवादः। ज्योतिर्व्विदाभरणकालविधानशास्त्रं श्रीकालिदासकवितो हि ततो बभूव॥ वर्षे सिन्धुरदर्शनाम्बरगुणैर्याते कलौ सम्मिते। मासे माधवसंज्ञकेऽत्र विहितो ग्रन्थक्रियोपक्रमः॥' इत्यादिभिर्यत् कालनिर्णायकं शास्त्रं कविना कालिदासेन प्रणीतं प्रतिभाति, तत्र च यत् कालोल्लेखोऽस्माभिरुपलच्यते, स एव उज्जयिनीपतेर्व्विक्रमादित्यस्य समयं सविशेषं प्रत्यादिशति। यथा हि—'यद्राजधानुज्जयिनी महापुरी। सदा महाकालमहेशयोगिनी॥ शङ्क्वादिपण्डितवराः कवयस्त्वनेके ज्योतिर्व्विदः समभवंश्च वराहपूर्वाः। श्रीविक्रमस्य बुधसंसदि प्राज्यबुद्धेस्तैरप्यहं नयसखः किल कालिदासः॥' इति किञ्च अष्टषष्ठ्युत्तरत्रिसहस्रसंख्यके कलेरब्दवृन्दे याते तद्ग्रन्थप्रणयनम्। तेन इतः पूर्व्वं द्व्यधिकनवशतोत्तरैकसहस्रपरिमितात् वर्षगणनात् पूर्व्वं ज्योतिर्व्विदाभरणं, तत्पूर्व्वञ्च रघुवंशादिकं निर्म्मितमिति प्रतिपद्यते। किन्तु दृश्यकाव्यानां ज्योतिर्व्विदाभरणे नोल्लेखतया तत्परवर्त्तित्वं वक्तुं युज्यते, येन तत्तद्ग्रन्थे प्रस्तावनायां—'आर्य्ये, इयं हि रसभावविशेषदीक्षागुरोर्व्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत्। अस्यां च कालिदासग्रथित वस्तुना…' इत्यादि। अत्र तावत् वाक्यकदम्बकेषु विक्रमा-

दित्यस्य परिषदि यत् कालिदासस्य नामोल्लेखः समोच्यते, तेन तस्य कवेः राज्ञः समानकालत्वं स्फुटत एव प्रतिभाति। तन्नरपतेस्तु विद्यते 'संवत्' नाम्नी वत्सरगणना, इदानीं तु खीष्टीयपञ्चदशाधिकोनविंशशताब्दी। संवत्सरसंज्ञयैव द्विसप्ताधिकोनविंशशताब्दी। अतः खीष्टजन्मनः सप्तपञ्चाशत्वर्षात् पूर्व्वं विक्रमादित्यस्य जीवनकालः, सुतरां तदीयसभासदः कालिदासस्यापि स एव समयः। अपि च पदवाक्यप्रमाणपारावारीणपण्डितवर्य्यभाश्रोजींादिः ब्रह्मगुप्तप्रणीतस्य खण्डखाद्यस्य टीकातः प्रमाणयति, यत् नवरत्नानामेकतमस्य रत्नस्य आचार्य्यपादस्य वराहस्य सप्ताधिकपञ्चाशत्शकाब्दयां मृत्युरभूदिति नितरां सप्ताधिकपञ्चाशतशकाब्द नवरत्नस्य सत्त्वाकाल एव अभ्रान्तमविसंवादितञ्च। यातु गवेषणकारिणां कथा, तस्य कविकुलयशस्तिलकस्य श्रीमतः कालिदासस्य नाटकादिग्रन्थपरिशीलनपरैरस्य वाक्पाटवं रचनावैदग्ध्यं वृत्तिसौष्ठवमर्थगौरवञ्च समालोक्य भवभूतिभट्टनारायणादिकविमुख्यादूर्द्ध्वतने काले तस्य महाकवेरुत्पत्तिरिति स्पष्टमुदीर्य्यते, अवाधमव्याहतमुपपद्यते चेति सर्व्वथाविरुद्धं वचः। कवेरन्यतः कालिदासस्य कथं प्राधान्यं, किं तस्य हेतुरित्यादिसकारणं तस्य ग्रन्थालोचनावसरे प्रमाणीकृतमस्माभिः। नेहोक्तं सन्दर्भगौरवभीत्येति कृतं पल्लवितेन।

भवभूतेरितिवृत्तम् ।

कष्टं भोः, कष्टम्!! श्रीमन्महाकवेर्भवभूतेरितिवृत्तं नूनं न क्वापि पर्य्याप्तं बह्वायासेनापि संलभामहे। केवलं तद्रचितमहावीरचरित-मालतीमाधवोत्तररामचरिताख्यरूपकत्रयस्य प्रस्तावनासुयत् किञ्चिन्मात्रमवगतिर्घटेत। पुरा किल दक्षिणापथे विदर्भेषु पद्मपुराभिधेये नगरे केचित्तैत्तिरीयाः काश्यपा उदुम्बरोपाभिधाना ब्रह्मवादिनो द्विजा ऊषुः। तेषामन्वयसम्भवो महाकविर्नाम कोऽपि वाजपेययाजी विप्र आसीत्। तस्मात् पञ्चमः पुरुषो भवभूतिः। तस्य पिता नीलकण्ठः, जननी च जातुकर्णीनाम, पितामहो भट्टगोपालः, गुरुश्च ज्ञाननिधिः। अधीतवानयं तर्क-व्याकरण-पूर्वोत्तरमीमांसादीनि शास्त्राणि। अस्य पितृकृतं नाम श्रीकण्ठ इति। "तपस्वी कां गतोऽवस्थामिति स्मेराननामिव। गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ॥" इति पद्यकरणोत्तरं तस्यैव भवभूतिरिति नामान्तरं जातम्। आर्य्यासप्तशत्या अनन्तपण्डितकृतटीकायाम्—"भवभूतेः संबन्धात्" इत्याद्यार्य्याव्याख्या, तथैव प्रतीतिं स्मारयति। वीरराघवविरचितायां महावीरचरितटीकायामप्येवमेव स्यात्। परन्तु तत्र "साम्बा पुनातु भवभूतिः पवित्रमूर्त्तिः।" इत्यलमधिकप्रमाणवाग्विघट्टनेन। एतेनैव नाम्नायं कविर्जगति प्रसिद्धिमास्थाय तनोत्यतिमात्रं विद्वज्जनगणमानसमननप्रसुलभकविप्रतिभया।

राजतरङ्गिणीतः कान्यकुब्जाधिपतेर्यशोवर्म्मणः परिसदि भवभूतिरासीदिति प्रमाणमस्माभिरुपलभ्यते। यथा—

"कविर्वाक्पतिराजश्रीर्भवभूत्यादिसेवितः।
जितो ययौ यशोवर्म्मा तद्गुणस्तुतिवन्दिताम्॥" इति

अस्य भूपतेर्यशोवर्म्मणः समयश्च खृष्टसप्तमशताब्दीपूर्व्वार्द्धे आसीत्। नितरां कवेर्भवभूतेरपि समयो निरुक्तसप्तमशतकमिताब्दे एवेत्यर्व्वाचीनानामूहः किमत्र तर्कावसरलवोऽपि।

तच्च यशोवर्म्माणं काश्मीरपतिर्ललितादित्यः चतुर्विंशत्युत्तरसप्तशततमखृष्टाब्दे एकविंशदुत्तरसप्तशततमखृष्टाब्दे वा पराजिग्ये। तदयं यशोवर्म्मणः सभासत् भवभूतिस्तात्कालिक इति निःसन्दिग्धम्। प्रबन्धकोषकर्त्ता राजशेखरस्तु यत् जैनसन्न्यासी वप्पभट्टिर्यशोवर्म्मणः सुतममरराजं त्रिपञ्चाशदुत्तरसप्तशततमखृष्टाब्दे जैनधर्म्मे दीक्षितमकरोत्, सुतरां तदा यशोवर्म्मणः मरणमन्तरेण तदङ्गजस्य राज्याभिषेको न सम्भवतीति। अत एव तत्समानकालोत्पन्नतया कवेर्भवभूतेरमरराजपूर्व्ववर्त्तित्वं तत्राज्याभिषेकसमानकालिनत्वं वा वक्तुं समायुज्यते। अपरञ्च हर्षचरिते बहूनां कवीनां नामानि सन्निबद्धानि कविमुख्यो वाणः, किन्तु भवभूतेरनुल्लेखत्वात् तत्परवर्त्तित्वञ्च कैर्विभाव्यते, तत्तु हेयं प्रज्ञावतां। यतः एकादशशताब्द्यां सन्निबद्धे काव्यप्रकाशे अभिनवगुप्तस्यालङ्कारग्रन्थे च वामनाचार्य्यस्य नाम समुपलभ्यते तस्यैवालङ्कारसूत्रवृत्तौ दृश्यते

भवभूतेर्नाम्ना निर्देशः, अतएव अष्टमशताब्द्यां भवभूतिरासीदिति समवधारयितुं शक्यते। किं च त्रिनवत्युत्तराष्टशततमाब्दे महेन्द्रपालः कान्यकुब्जे राजसिंहासनाधिष्ठितः आसीत्, तत् सभामलंकुर्व्वतो राजशेखरस्य ग्रन्थे भवभूतेर्नाम समुपलभ्यते। एवं नवपञ्चाशदुत्तरनवशततमाब्दे सोमदेवविरचिते यशस्तिलके चतुःसप्तत्युत्तरनवशततमाब्दं पञ्चनवत्युत्तरनवशततमाब्दञ्चान्तरा स्थितस्य मालवराजमुञ्जसभापण्डितस्य दशरूपककारस्य धनञ्जयसोदरधनिककवेर्दशरूपके च दृश्यते, भवभूतेर्नाम, सुतरां तत्पूर्व्ववर्त्तित्वमस्य कवेरिति किं तत्र विकल्पः। अतएव मन्यन्ते बहुशः कृतिनः यदष्टमशताब्दो एव तस्य जीवनकाल इति।

अदः कविराजकृतिषु महावीरचरितमालतीमाधवोत्तरचरिताख्यं रूपकत्रयमपहायान्यः कोऽपि प्रबन्धोऽस्माभिः सुबहुचेष्टयापि न क्वापि लभ्यते। केवलं शार्ङ्गधरपद्धतौ तु—

"निरवद्यानि पद्यानि यदि नाट्यस्य काङ्क्षतिः।
भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत्॥" इति।

गदाधरभट्टसंकलिते रसिकजीवने च—

"अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीम्।
मृगमदपरिमललहरीं समीर किं पामरेषु रे किरसि॥
किं चन्द्रमाः प्रत्युपकारलिप्सया
करोति गोभिः कुमुदावबोधनम्।

स्वभाव एवोन्नतचेतसां सतां
परोपकारव्यसनं हि जीवितम् ॥"

इत्येतानि पद्यानि भवभूतिप्रणीतत्वेनोपलभ्यते। किन्त्वन्यस्य कस्यापि भवभूतिनाम्नः कवेः सुभाषितान्येतानि, उतान्येन केनचित् कविना प्रतिपातानेतानि उत्तररामचरितादिकृतो भवभूतेर्नाम्ना प्रक्षिप्तानि, तन्निर्णयोऽतीवासम्भव इति।

अस्ति तावत् कविकृतावेका प्रचलिता वार्त्ता, रामायणं हि बालचरितवीरचरितोत्तरचरितेति त्रितयाख्यया विभजय निरुत्तमं नाटकत्रयं निरमायीति। ततः परमदुर्भाग्यतया गीर्वाणवाणीचरणपरिसेवकानाम्, तद्बालचरितं येन केनापि परममहिम्नः कालस्य हृदये लीनमासीत्। रोचतेऽस्मभ्यमप्येतदुदन्तं समीचीनमिति। येन तादृशकविप्रतिभापन्नो विद्वान् बालचरितमपहाय मध्योत्तरचरितं रचितवानिति वक्तुं न समीचीना युक्तिरपरा दृश्यते। "कवयः कालिदासाद्या भवभूतिर्महाकविः" इति प्राचीनपद्यांशः कियानवितथः तन्न जानीमहे। परमासन्निह जगति बहवः कवयः, आसंश्च तेषां कविगुणाः, किन्तु भवभूतेस्तुल्यः कोऽपि कविः कविगुणेन शास्त्रप्रतिभया च युक्तो भारतभूमौ प्रादुर्भूतः किं नवेति न वक्तुमलंस्मः।

काव्योपेक्षिता ।

[प्रियंवदानसूये पत्रलेखा च]

संस्कृतभाषापरिसंशीलयतां सततमेव नयनपथवर्त्तिन्यस्तिस्रस्तपस्विनः । अभिज्ञानशकुन्तले प्रियंवदानसूये, कादम्बर्यां पत्रलेखा च। एतासु प्रियंवदानसूये पतिगृहं गच्छन्त्या शकुन्तलया पथि प्रतिनिवर्त्त्यमाने एव रुदत्यौ प्रत्यावृत्ते, न पुनर्नाटकमध्ये तयोः प्रवेशः । अपरा किल संस्कृतसाहित्ये मन्दभाग्या त्यक्तादरा पत्रलेखा । तस्याः खलु विशेषमग्रे वक्ष्यामः । इदानीं श्रीमन्महाकवेः कालिदासस्य परिकल्पिते प्रियंवदानसूये समाकलय्य मनाक् विब्रोखुमः । दृश्यते हि काव्यजगति नाट्यकलासंसृष्टौ न सकलानां पात्राणां समानोऽधिकारः । दारुणः खलु कविरात्मनो नायकस्य नायिकायाश्च कृते कियतीर्नामाच्चयाः प्रतिमा विरचयन् निर्दयमेव भागिरथीतरङ्गायिते प्रबले स्रोतसि विससर्ज्ज । तत्र खलु यथायथं विचार्य्य शेषं परिकल्पयते कविः, अपि नाम तेषां तत्रैव परिशेष इति मामकानां हृदयम् । राजसंसदुपस्थितौ समुद्दीप्तरोषौ कण्वशिष्यौ शाङ्गरवशारद्वतौ अश्रुमुखी जरती च गौतमी प्रत्यावृत्तत्र समुत्सुकोत्कण्ठिताभ्यां यदा तावन्तं राजद्वारघटितं वृत्तान्तं न्यवेदन्, किं नाम न भवति तयोस्तदानीमघटतेति मूलनाटकस्य

सर्व्वथैवानावश्यकम्। किन्तु तावतैव किं तयोस्तावत्यप्रमेया दुःखवेदना तत्रैवोपाशाम्यत्। विनापि च्छन्दो विनापि च भाषां नैषा तयोर्दुःखवेदना चिरायास्मच्चेतःसु समुद्भ्राम्यति। काव्यं नामेदं हीरकमिवातिकठिनम्। यदा चिन्तयन् पश्यामि—किमिव कियद्वा प्रियंवदानसूये अभूतां शकुन्तलायाः, तदा तस्याः खलु कण्वपुत्र्याः परमदुःखसमये तयोः सख्योः सर्व्वथा नावश्यकेनापवादेन निष्क्रियो नाम भवेदपि काव्यस्य न्यायविचारितः। परन्तु तन्निरतिशयं निष्ठुरम्। शकुन्तालायाः सुखसौन्दर्य्यगौरवाभिवर्द्धनायैव ते इमे लावण्यप्रतिमे स्वसर्व्वस्वेन तामावेष्टितवत्यौ। यदा तास्तिस्रः सहचर्य्यः सेचनघटैरकालविकशिताया नवमालत्या मूले सम्मिलिताः, तदा न केवलमेको दुष्मन्त एवाप्रियत शकुन्तलायाम्। के नाम तदानीं नर्म्मकौतुकैर्नवयौवनविलोलमाधुर्य्यैश्च शकुन्तलायास्तादृशं भावं समपूरयताम्? इमे एव तापस्यौ सहचर्य्यौ। स्वयं शकुन्तला आत्मन एकतृतीयोऽंशः। अपरावंशौ प्रियंवदानसूये। ते एव भूयसा तं प्रेमालापमपूरयताम्। तृतीयेऽङ्के यत्र सह निःसहायया शकुन्तलया वर्त्तमानस्य दुष्मन्तस्य प्रणयवैयाकुली वर्णिता, कामं कविस्तत्र हीनबल इव कथमपि गौतमीमानीय स्वस्थोऽभवत्। यतो याभ्यामाव्रियमाणा शकुन्तला स्वपूर्त्तिमलभत, न ते तदानीं तत्रावर्त्तेताम्, वृन्तविच्युतस्य कुसुमस्योपरि दिवाकरप्रखरालोको न सहनीयो भवति, वृन्तपल्लवयोरीषदन्तरालेन

विना स आलोको न तत्र तथा कोमलेन भावेन निपतति। नाटकस्य तेषु खलु कतिपयेषु पत्रेषु सखीविरहिता शकुन्तला तावदतिस्पष्टं सर्व्वथानावृतभावेन निपतति नयनयोर्यथा सम्यगवलोकयतां संकोच इव कश्चित् समुदेति। अथ आर्य्याया गौतम्याः सहसाविर्भावेण सर्व्व एव पाठकाश्चेतसि शान्तिमिव काञ्चिल्लभन्ते। मन्यामहे, चराचरपालको दुष्मन्तो यत् राजसभायां शकुन्तलां न प्रत्यभिज्ञासीत्, तत्र प्रधानं कारणं शकुन्तलया सह प्रियंवदानसूये नाभवताम्। एकतस्तपोवनात् बहिर्देशः, अन्यतश्च सा विकलेति सम्भवेदपि प्रत्यभिज्ञानं दुष्करमिति। आपृच्छ्यगतायां शकुन्तलायां शून्यं तपोवनं समागतयोस्तयोः किं नाम शैशवसहचरीवियोग एवैको विषयो दुःखस्याभवत्। न तं वियोगं विना तपोवनस्यान्यत् किञ्चित्तदानीं पर्य्यवर्त्तत। अहो! भुक्तमाभ्यां बोधद्रुमस्य फलम्; विज्ञातञ्च यदासीदविज्ञातम्। तच्च न खलु काव्यनिहितायाः कल्पनोद्भाविताया नायिकायाश्चारित्रपाठेन, अपि तु स्वकीयायाः प्रियसहचर्य्या हृदयमध्येऽवतरणेन, किं नेतः प्रभृति अन्तरान्तरा विस्मरेतां ते आलवालसलिलसेचनम्। अपि नेदानीं ते अन्तरान्तरा शुष्कपत्रसञ्चलनस्वनेन चकितान्तःकरणे अशोकान्तरालस्थितस्य कस्याप्यागन्तुकस्योपस्थितिमाशङ्क्येयाताम्। अपि नाम ते मृगशिशवः पुनरपि तादृशमेव पूर्णमादरं लेभिरन्। तस्मिन् खलु तपोवने साम्प्रतं प्रियंवदाया अनसूयायाश्च जीवनकथा-

मन्विष्यामः। न ते प्रतिबिम्बस्वरूपे येन सह शकुन्तलयैव एकस्मात् दिगन्तादपरस्मिन् भवेत्तयोस्तिरोभावः। अस्ति तयोर्जीवनम्, अस्ति च मूर्त्तिः। रचितस्य काव्यस्य बहिर्भागे अभिनीतस्य च रूपकस्य नेपथ्यभूमौ जाता तयोर्वृद्धिः। अतिपिनद्धेनापि वल्कलेन तदानीं तयोस्तारुण्यभार आबद्धुं शक्यते। इदानीमनयोस्तादृशस्य स्मितमाधुर्यस्योपरि प्रत्यग्रवर्षास्वम्बरतले जलधरमालेव समुत्पन्ना काचिदश्रुगम्भीरा च्छाया। इदानीं काचिदेकैकस्मिन् दिवसे अनन्यमानसयोः शून्यहृदययोरनयोरुटजप्राङ्गणात् अकृतसत्कारा अतिथयः प्रतिनिवर्त्तन्ते। वयमपि च हन्त प्रतिनिवृत्य शून्यहृदये अपरायाः सविधे संप्रति समुपगच्छामः।

कादम्बरीकथायाः यस्मिन् स्थाने समागता पत्रलेखा विषमञ्च तत्स्थानमदृश्यत, येन किञ्चित्ततः इतः पदक्षेपणेनैव सम्भवति विपत्तिः। अस्मिन्नाख्याने पत्रलेखा यादृशेन सुकोमलेन सम्बन्धेनाबद्धा, नैतादृशो दृष्टोऽन्यत्र कुत्रचिदपि साहित्ये, सत्यप्येवं कविरतिलीलया सरलेन चेतसा ईदृशमपूर्व्वं सम्बन्धबन्धनमवतारयत्। न क्वाप्यस्य तन्तोः स्वल्पमपि संवृत्तं तादृशमाकर्षणं येन येन क्षणमपि तस्य च्छेदशङ्का आपद्येत। युवराजश्चन्द्रापीड़ो यदाप्यध्ययनं समाप्य प्रासादं प्रत्यावृत्तः, तदानीं कस्मिंश्चिदहनि प्रभातसमये कैलासो नाम कश्चित् कञ्चुकी तद्गृहं प्रविष्टः। आसीत्

किल तदा तत् पश्चात् काचिदनतियौवना कन्यका। अस्याः शिरसीन्द्रगोपकीटवत् रक्ताम्बरेणावगुण्ठनम्, ललाटे चन्दन-तिलकः, मध्ये च कनकमेखला। सेऽयं तरुणी लावण्यप्रभा-प्रभावेन परिपूर्य्य सकलभवनम्, क्वणितमणिनूपुराकलितेन चरणेन कञ्चुकिनमन्वगच्छत्। स एव कञ्चुकी प्रणम्य क्षिति-तलानिहितदक्षिणकरो व्यजिज्ञपत्—'कुमार, भवती माता महादेवी विलासवती विज्ञापयति—कन्येयं पराजितस्य कुलतेश्वरस्य दुहिता बन्दीभूता, अस्याः नाम पत्रलेखा। तामिनां राजकन्यामियन्तं कालं दुहितृनिर्व्विशेषेणाहमपालयम्। सांप्रत-मेषा तव ताम्बूलकरङ्कवाहिनी भवत्विति प्रहिणोमि। नेयं साधारणपरिजनवद्गणनीया, अपि तु बालिकेव लालनीया, स्वचित्तवृत्तिरिव निवारणीया चापलात्, शिष्येव दर्शनीया, सुहृदिव च निखिलेषु विस्रम्भव्यापारेष्वन्तरङ्गीकरणीया। किञ्च तादृशेषु कर्म्मसु इयं कल्याणी नियोजनीया, यथेयं तवाति-चिरपरिचारिका भवेदिति।' एवं कथयति कैलासे पत्रलेखा तं समुचितं प्राणंसीत्, सोऽपि चन्द्रापीड़ो निर्निमिषेण लोचनेन तां सुचिरं निरीक्ष्यावादीत्—'यथाम्बाज्ञापयति।' इति उक्त्वा चेदं दूतं प्रतिनिवर्त्तयामास। पत्रलेखा न खलु पत्नी, नवा प्रणयिनी, नापि वा किङ्करी, अपि तु पुरुषस्य सहचरी। सोऽयमपूर्व्वो भावः समुद्रयोर्म्मध्यवर्त्ती सैकततट इव, कथमिवायं रक्षेत? तरुणयो-रन्योऽन्यं प्रति यदिदं नवयौवनस्य चिरन्तनं प्रबलमाकर्षणं,

तत् खलूभयतोऽपि संचीर्णं सेतुमिव किमिति सर्व्वथा न चीर्णोति न वा लङ्घयति। कविस्तु तामनाथां राजकन्यां चिराय एवास्मिन् आश्रयेऽवासयत्। इतः खलु मर्य्यादाया रेखामात्रेऽपि बहिर्देशे जातुं तामेष आचकर्ष। दुर्भागधेयां बन्दिकन्यां प्रति कवेरितोऽपि का नामोपेचा सम्भवति ? अतिसूक्ष्माया यवनिकाया अन्तराल-गतापि सा आत्मनः स्वाभाविकं स्थानमध्यगच्छत्। सा किल पुरुषस्य हृदयपार्श्वे जाग्रतवती न त्वर्पितवती पदं तस्य मध्ये। न जातु अतर्कितागतेऽपि वसन्तसमीरणे सखीत्वयवनिकायाः प्रान्तोऽपि व्यचलत्। कविः किल कथयति—तस्मात् प्रथमदिना-दारभ्य चन्द्रापीड़स्य दर्शनमात्रेणैव समुपजातसेवारसा पत्रलेखा दिवा वा, दोषा वा अविगणय्य उत्थानभ्रमणादिषु छायेव राजपुत्रस्य पार्श्वं न पर्य्यत्यजत्। चन्द्रापीड़स्यापि ततः प्रभृति तस्यां प्रतिच्चणमुपचीयमाना महती प्रीतिरजायत। स्थित-स्तस्यामस्य प्रतिदिनं प्रसादः, कृता चासौ सर्व्वत्रैव विस्रम्भ-व्यापारेष्वभिन्ना स्वहृदयता इति। अपूर्व्वोऽयं सम्बन्धः सुमधुरश्च; परन्तु अत्र नास्ति पूर्त्तिर्नारीजनाधिकारस्य, नारीजनस्य सह नारीजनेन यो नाम निरपत्रपः सख्यसम्पर्कः सम्भवति, चन्द्रा-पीड़ेन सार्द्धं समुत्पन्नः पत्रलेखायाः सोऽयं सम्पर्कः, कादम्बरी-काव्ये जनयतीव किञ्चिदवज्ञानं स्त्रीजनमर्य्यादायाम्। अपि नाम नेदं वृत्तं विचालयत्यन्तःकरणं पाठकानाम्। किं निमित्त-मिदं विचालनम् ? नेदमाशङ्कातः, सन्देहतो वा। कविर्नाम यदि

तयोर्लेशमपि किञ्चिदसूचयिष्यन् सम्मानितं नारीत्वं पत्रलेखाया इत्यज्ञास्याम:। परन्तु तयो: किल तरुणयो: सन्देहाशङ्कात्रपाणां स्निग्धा च्छायापि नालच्यते। तेन खलु अपूर्णेन सम्बन्धेन परित्यक्तमन्त:पुरं पत्रलेखया, परन्तु सन्निकृष्टयो: स्त्रीपुरुषयो: प्रकृत्यैव यो लीलासङ्कोचसाध्वसादिभाव: समुत्पद्यते। सोऽप्यनयोर्मध्ये न दृश्यते। अतएवास्या अन्त:पुरपरिभ्रष्टाया: अन्त:-पुरिकाया: कृते दूयतेऽस्माकमन्त:करणम्। चन्द्रापीड़ेन सार्द्धं पत्रलेखाया नैकत्र्यमप्यसामान्यम्। दिग्विजययात्रायामेकस्मिन्नेव गजपृष्ठे पत्रलेखा चन्द्रापीड़ेन सार्द्धमासनमधितिष्ठति। निशायां शिविरस्थचन्द्रापीड़: यदा अनतिदूरशयाननिषण्णे वैशम्पायनेन सह संलपति, तदा सन्निधौ क्षितितलविन्यस्तकुथोपरि प्रस्वपिति सखी पत्रलेखा। अथ यदा चन्द्रापीड़स्य कादम्बर्य्यां प्रणय: सञ्जात:, तदापि पत्रलेखा तस्मिन् खलु आत्मन: क्षुद्रस्थाने तथैवाविद्यत। नारी नाम पुरुषहृदयस्य यावत् स्थानमधिकरोति, तस्यातितमामल्पमेवांशं साध्यकरोत्। अतो यदा तस्मिन् हृदये महामहोत्सवसमारम्भ: सन्निकृष्ट:, तदा पत्रलेखायास्तस्मादति-क्षुद्रादधिकारादपासारणं नावश्यकममन्यत। पत्रलेखां प्रति कादम्बर्य्या नासीदीषदपि द्वेष:। चन्द्रापीड़ेन पत्रलेखाया: सम्बन्ध इति हि सा प्रियसखीति कादम्बर्य्या परमाद्रियत। कादम्बरीकाव्ये पत्रलेखा यत् भूखण्डमधिकृतवती, न तत्र द्वेषसन्देहादीनां सद्भाव:। तत् स्थानं स्वर्गवन्निष्कण्टकम्;

परन्तु क्व नु खलु तत्रामृतबिन्दुः। चलति तस्याः पुरत एव प्रबलं प्रणयामृतपानम्। किन्तु कदाचित् एतद्घ्राणेनास्या एकस्यामपि शिरायां एककोऽपि रक्तबिन्दुर्न चाञ्चल्यमापेदे। अपि सा चन्द्रापीड़स्य छायेवानुवर्त्तिनी, तथापि राजपुत्रस्य तप्ततारुण्यस्येषदपि तापस्तां कदाचित् नास्पृशत्। यदा पत्रलेखा कति कालान् कादम्बर्य्या सहावस्थाय तद्वार्त्तया प्रत्यावृत्ता, एवमपि यदा ललितस्मितेन दूरत एव प्रीतिरसं प्रकाशयन्ती चन्द्रापीड़ं प्राणमत्, तदा सा प्रकृतिवल्लभापि कादम्बर्य्याः प्रसादलब्धं सौभाग्यमिव वल्लभतरतामगच्छत्। युवराजश्चा-दरातिशयं प्रदर्शयन्नासनादुत्थाय तामालिङ्गत्। चन्द्रापीड़स्यै-तदादरालिङ्गनवर्णनेनैव कविनियमनाद्दृता, वयन्तु नितरामिमं कविमसमानदर्शिनं वक्तुमुत्सहामहे। यदसकृत् कादम्बरीं महाश्वेतां चैकदृष्ट्या पश्यन्नयं नयनस्यान्धीभूततया बन्दीभूतां तपस्विनीमिनां द्रष्टुं नाशक्नोत्। अस्याः यत् किमपि प्रणयदृषात्तं चिरवञ्चितं हृदयमन्दिरं सर्व्वथैव व्यस्मरत् कविवरः। निरर्गला तस्य वाणभट्टस्य कृपणा कल्पना अनाथां राजदुहितरं प्रति नितरां पक्षपातदूषित एकदर्शी कविः पत्रलेखायाः हृदयस्थं गूढ़ं रहस्यं न किञ्चिदव्यञ्जासीत्। कादम्बरीं पठन्तः सभ्याः पर्य्यवेक्षन्ते अन्याः सर्व्वा नायिका अनावश्यकबाहुल्येन वर्णिताः, पत्रलेखायास्तु न किञ्चित् कथितमिति कृतं सुबहुवाचा कविं प्रत्यधिक्षेपेण।

—०—

छन्दःसमालोचनम् ।

दृश्यते हि संस्कृतकाव्यनाटकादिषु प्राय एव एकादशाक्षरवृत्तित आरभ्य समवृत्तान्तर्गतानां च्छन्दसां बाहुल्येन व्यवहारः। नितरां क्षुद्रतमेऽस्मिन् प्रबन्धे सन्दर्भगौरवभयादस्माभिरेकाक्षरादिवृत्तानां व्यवहारं विहाय एकादशाक्षरादारभ्य महाकाव्याद्यन्तर्गतानां च्छन्दसां यथाकथञ्चिदुदाहरणानि प्रियसुहृद्भ्यः उपह्रीयन्ते। एकादशाक्षरयोरिन्द्रवज्रोपेन्द्रवज्रयोः शुद्धोदाहरणमतिविरलमिव, किन्तु तयोरुपजातिस्तु कवीनामतिहृद्येति प्रतीयते। नास्ति किमपि महाकाव्यम्, यस्मिन्नेषा दृष्टिपथवर्त्तिनी भवेत्। कुमारसम्भवस्य प्रथमं सर्गम्, रघुवंशस्य द्वितीयम्, शिशुपालबधनैषधचरितयोस्तृतीयं सर्गम् इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिवृत्तेन रचितम्।

भ्रमरविलसिता—'प्रीतैर्यूनां व्यवहिततपना' शिशु ४।६२।

शालिनी—'यत् सावित्रैर्दीपितं भूमिपालैः' उत्तररामचरितम्।

दोधकम्—'इत्थममुं विलपन्तममुञ्चत् दीनदयालुतयावनिपालः॥' नैषध ११।४७।

स्वागता—वृत्तमिदं शिशुपालबधस्य दशमे, किरातार्ज्जुनीयस्य नवमे, नैषधचरितस्य पञ्चमैकविंशयोर्व्यवहृतम्।

रथोद्धता—एतदपि वृत्तं कविभिर्बाहुल्येन व्यवहृतम्। कुमारसम्भवस्य अष्टमे, रघुवंशस्य दशमैकादशयोः, नैषधचरित-

स्याष्टादशे, शिशुपालबधस्य चतुर्द्दशे, किरातार्ज्जुनीयस्य त्रयोदशोत्तरार्द्धे। द्वादशाक्षरावृत्तिषु—

तोटकम्—'स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज्ज मुनिम्।' रघु ८।९१।

वैश्वदेवी—'पद्मव्याकोशं भास्करं बालचन्द्रं वापी विस्तीर्णं स्वस्तिकं पूर्णकुम्भम्। मृच्छक।

'इष्टं कृत्वार्थं पत्रिणः शार्ङ्गपाणिः'। शिशु १९।११९।

मन्दाकिनी, प्रमुदितवदना, चञ्चलाक्षिका, गौरी वा प्रभा—'अतिसुरभिरभाजि पुष्पश्रियाम्' शिशु ५।५७। 'व्रजति शुचि पदं त्वयि प्रीतिमान्' किरा १८।२६।

जलोद्धतगतिः—'समीरशिशिरः शिरःसु वसताम्' शिशु ४।५४। 'सनाकवनितं नितम्बरुचिरम्' किरा ५।२७।

प्रमिताक्षरा—वृत्तमिदं शिशुपालबधस्य नवमे; किरातार्ज्जुनीयस्य षष्ठे यथा—'अपराह्णशीतलतरेण शनैः' शिशु ९।४। 'सुकुमारमेकमनु मर्म्मभिदाम्' किरा ६।४०।

द्रुतविलम्बितम्—शृङ्गारादावनुद्धते वाक्ये अस्य व्यवहारो यथा—शिशुपालबधस्य षष्ठे, नैषधचरितस्य चतुर्थे, रघुवंशस्य नवमे, किरातार्ज्जुनीयस्य चाष्टादशे सर्गे।

वंशस्थवृत्तम्—एतेनैव हि शिशुपालबधस्य प्रथमः, किरातार्ज्जुनीयस्य प्रथमश्चतुर्थः, अष्टमश्चतुर्द्दशश्च। नैषधचरितस्य प्रथमो द्वादशश्च। रघुवंशस्य तृतीयः। कुमारसम्भवस्य पञ्चमः सर्गः

ग्रथितः। इन्द्रवज्रोपेन्द्रवज्रयोरिव वंशस्थेन्द्रवंशयोरप्युपजातिः स्यात्। शिशुपालबधस्याष्टादशः सर्गः अनया निर्म्मितः।

जलधरमाला—'दिव्यस्त्रीणां सचरणलाक्षारागाः रागायते निपतितपुष्पापीड़ाः।' किरा ५।२३।

भुजङ्गप्रयातम्—'धनैर्दुष्कुलीनाः कुलीना भवन्ति' उद्भट।

त्रयोदशाक्षरावृत्तिषु—कुटजा, नन्दिनी वा—'कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रम् समयावनौ घनमदभ्रमराणि।' शिशु ६।७२।

कुटिलगतिः, क्षमा वा—'इह दुरधिगमैः किञ्चिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम्।' किरा ५।१८।

मत्तमयूरवृत्तम्—'दृष्ट्वा दृश्यान्याचरणीयानि विधाय' किरा १८।२८। 'हा तातेति क्रन्दितमाकर्ण्य विषण्णः' रघु ९।७५।

कनकप्रभा मञ्जुभाषिणी वा—'समयः स वर्त्तत इवैष यत्र मां समनन्दयत् सुमुखि गौतमार्पितः।' उत्तरराम। 'यदि शस्त्रमुज्झितमशस्त्रपाणयः' वेणीसं।

ओजोगुणव्यञ्जकवाक्येषु प्रहर्षिणीवृत्तम्—'त्वं ब्रह्मा पशुपतिरर्य्यमा विधाता'। रुचिरा—शिशुपालबधस्य सप्तदशः सर्गः एतेन रचितः। 'अथोच्चलत् कलकलघोषभीषणम्।' शिशु।१७

चतुर्दशाक्षरावृत्तिषु—

वसन्ततिलकम्—वृत्तेनानेन चौरपञ्चाशिका शिशुपालबधस्य

पञ्चमः सर्गः, नैषधचरितस्यैकादशत्रयोदशौ, कुमारसम्भवस्य सप्तदशः, ऋतुसंहारस्य तृतीयः सर्गश्च ग्रथितः।

पथ्या—'स्थगयन्त्यमूः समितचातकार्त्तस्वरा: जलदास्तड़ित्तुलितकान्तकार्त्तस्वराः॥' शिशु ४।२४।

कुटिला—'नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैः, आनीलाभैर्विरचितपरभागा रत्नैः॥' किरा ५।३१। पञ्चदशाक्षरावृत्तिषु—

मालिनी—वृत्तमिदं विदुषामतिसन्तोषकरम्, एतेनैव शिशुपालवधस्यैकादशः सर्गो रचितः। प्रायशः काव्यानामपि सर्गावसाने अस्य व्यवहारो दृश्यते।

पञ्चचामरम्—वृत्तमिदं स्तोत्रादौ बाहुल्येन कविभिः प्रयुज्यते। 'जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी विलोलवीचिवल्लरी विराजमानमूर्द्धणि।' शिवताण्डवस्तोत्रम्। सप्तदशाक्षरावृत्तिषु—

हरिणी—'प्रतनुविरलैः प्रान्तोन्मिलन्मनोहरकुन्तलैर्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम्।' उत्तरराम।

शिखरिणी—वृत्तमिदं हृदयस्य स्फुरणं द्रवीभावं वा जनयति। आनन्दलहरीहंसदूतादयः ग्रन्थाः एतेनैव रचिताः 'इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयोरसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः। उत्तरराम।

पृथ्वी—भावगाम्भीर्य्यद्योतकमिदं वृत्तम्। 'प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखम्।'

मन्दाक्रान्ता—मेघदूतपदाङ्कदूतादयो ग्रन्था एतेनैव वृत्तेन

ग्रथिताः। 'तीर्थतोयव्यतिकरभवे जह्नुकन्यासरय्वोः' रघु ८।९५।

वंशपत्रपतिता (तं) 'दर्पणनिर्मलासु पतिते घनतिमिरमुषि, ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः। शिशु ४।५७।

'सम्प्रतिलब्धजन्मशनकैः कथमपि लघुनि, क्षीणपयस्युपेयुषिभिदां जलधरपटले। किरा ५।४३।

अतिशयिनी—'इति धौतपुरन्ध्रिमत्सरान् सरसि मज्जनेन, श्रियमाप्तवतोऽतिशायिनीमपमलाङ्गभासः। शिशु ८।७१। अष्टादशाक्षरावृत्तिषु—महामालिनी, महामालिका, तारका, नाराचकं वा—'कृतसकलजगद्विबोधोऽवधूतान्धकारादयः। शिशु ११।६७। 'रघुपतिरपि जातवेदो विशुद्धां प्रगृह्य प्रियाम्।' रघु १२।१०४। ऊनविंशत्यक्षरावृत्तिषु—

शार्दूलविक्रीडितम्—वृत्तमिदमुद्धतवाक्ये वीरचरितादौ लक्ष्यते। 'चञ्चत्पञ्चशिखण्डमण्डनमसौ मुग्धः प्रचण्डः शिशुः।' वीरचरि। मेघविस्फूर्जिता—'श्रिया जुष्टं दिव्यैः सुपटहरवैरन्वितं पुष्पवर्षैः।' शिशु २०।७९।

सुमधुरा—'वेदार्थान् प्रकृतस्त्वं वदसि न च ते जिह्वा निपतिता।' मृच्छक। विंशत्यक्षरावृत्तिषु—

सुवदना—'उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलम्।' मुद्रारा। एकविंशत्यक्षरावृत्तिषु—

स्रग्धरा—वृत्तमिदं समुद्धते वाच्ये, रौद्रे, वीरे, भयानके च

रसे सम्यगुपयोगमर्हति। 'उत्कृत्योत्कृत्यगर्भानपि शकलयतः क्षत्रसन्तानरोषात्।' वीरचरि। अर्द्धसमवृत्तेषु—

वियोगिनी सुन्दरी वा—वृत्तस्यास्य करुणरसे सम्यगुपयोगो लक्ष्यते। कुमारसम्भवस्य चतुर्थः, रघुवंशस्याष्टमः, शिशुपालबधस्य षोड़शः, किरातार्ज्जुनीयस्य द्वितीयश्च सर्गः अनेन विरचितः।

औपच्छन्दसिकं—वृत्तस्यास्य वीररसे भूयान् व्यवहारो दृश्यते, 'चमरान् परितः प्रवर्त्तिताश्वः क्वचिदाकर्ण्य निकृष्टवल्लभवर्षो। नृपतीनिव तान् वियोज्य सद्यः सितबालव्यजनैर्जगाम शान्तिम्॥' रघु ९।६६। 'व्यवहार इवानृताभियोगं, तिमिरं निर्ज्जितवत्यथ प्रकाशे' शिशु २०।४१।

मालभारिणी—'इयमस्मदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण। नियतं कुपितातिवल्लभत्वात् स्वयमुत्प्रेक्ष्य ममापराधलेशम्। वेणीसं।

गाथा—अस्य तावत् छन्दसः किमपि लक्षणं न पर्य्याप्ततया संलभामहे। केवलमुदाहरणतो ज्ञातव्यमिति। 'अमी वेदिं परितः क्लृप्तधिष्णाः समिद्वन्तः प्राप्तसंस्तीर्णदर्भाः। अपघ्नन्तो दूरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु॥' इति महाभारतादिषु पुराणनिवहेषु अस्य तावत् भूयान् व्यवहारो दृश्यते। सन्दर्भगौरवभयात् तानि तान्युदाहरणानि उज्झितानि। आशास्महे छन्दोविषयकज्ञानमभीप्सूनां यथाकथञ्चिदुपकारमातन्विष्यत्ययं सन्दर्भ इति कृतं विस्तारेण।

पाणिनिव्याकरणस्य समालोचनम् ।

इह किल भारते वर्षे सकलदर्शनानां प्रचारे सत्यपि साम्प्रतं वेदाङ्गेषु प्रधानमिति च व्याकरणं विद्वद्भिरतीवाद्रियते। तच्च व्याकरणं प्रथमतो वैदिकशब्दनिवहमुपजीव्य शाब्दिकशिरोमणिभिः शाकटायनापिशलिगार्ग्यगालवस्फोटायनप्रभृतिभिः प्रणीतं वैदिकशब्दव्युत्पादकमासीत्। कालक्रमेण तस्मिन्नेव व्याकरणे विरलप्रचारतया तिरोहिते, भगवता पाणिनिना तेषां वैयाकरणानां मतमाकृष्य लौकिकानां तथा वैदिकानामपि अनुशासनं सङ्गमय्य सर्व्वेषां साम्प्रदायिकानामुपयोगिपरमरमणीयमेतद्व्याकरणं निरमायि। इदानीं प्रचलितेषु शब्दानुशासनेषु इतोऽन्यत् नास्ति प्राचीनतमं व्याकरणमिति अविसंवादि मतम्। केऽपि खलु मन्यन्ते इदमेव व्याकरणानामग्रम्; तत्तु न श्रद्धेयं सहृदयानाम्। यतो हि 'त्रिप्रभृतिषु शाकटायनस्य।' ८।४।५। 'वा सुप्यापिशलेः।' ६।१।६१। इत्यादिसूत्रपाठेन स्फुटत एव प्रतिभाति यन्महर्षेरूर्द्ध्वतने काले वर्त्तन्तेऽप्यन्ये वैयाकरणाः, नचेत् कथं तेषां नामानि सूत्रेषु विनिवेशितानि तत्रभवता महर्षिणा पाणिनिना। अपि च मुग्धबोधनिर्म्माता वोपदेवेन स्वनिबद्धकविकल्पद्रुमोपक्रमे ये चाष्टौ शाब्दिकमुख्याः निर्द्दिष्टाः। तेषु पर्य्यायेण आपिशलेश्चतुर्थत्वेन शाकटायनस्य पञ्चमत्वेन विनिर्द्दिष्टतया कैश्चिदेवमेवानुमीयते यत् प्राचीनतातारतम्येन तस्य

तथाविधो निर्देश इति। एवमपि गीयते तैः ख्रीष्टजन्मतः पूर्वं चतुःसप्तत्यधिकचतुःशततमो वर्षः उत पञ्चसप्तत्यधिकचतुःशततमो वर्षो वा एतस्य व्याकरणनिबन्धकारस्य समयः। कृतं तदालोचनया। एतदेव व्याकरणं यदतिमात्रं विमोहयति विदुषः सर्व्वथैवायमवितर्कितः सिद्धान्तः। एतस्यैव व्याकरणस्य तावत् वर्त्तन्ते सूत्रपाठो गणपाठो धातुपाठो लिङ्गानुशासनञ्चेति चत्वारो विभागाः, किन्तु तदेव हि व्याकरणं शिक्षाविषये नातिपर्य्याप्ततया न्यूनांशपरिपूरणेनात्यावश्यकाक्षेपसमाधिप्रदर्शनेन च मुनिना कात्यायनेन संपादितकल्यवैशद्यमपि विस्तृतेन व्याख्यानेन भगवता भाष्यकारेण पतञ्जलिना सुपरिष्कृतं विजयतेतराम्। क्रमेण संप्रदायस्य विरलभावेन भाष्यस्य गूढ़ाशयतया तत्रत्यानामभ्युपगमवादानामेकदेशिवादानां सिद्धान्तवादानाञ्च दुरूहतया मन्दमतीनां ततोऽभीष्टसिद्धावन्तरायमालोच्य सरलान् निबन्धान् निर्म्मिन्वता सर्व्वाचां विभिन्ना विभिन्ना शैली लक्ष्यते। केचन सूत्रपाठक्रमेण व्याचख्युस्ततः शब्दसिद्धौ भूयांसं विलम्बमवगम्य तच्छब्दसाधुत्वोपयोगिनां भिन्नभिन्नप्रकरणपठितानामपि वचनानामेकत्र सङ्कलनपूर्व्वकं चापरे तेऽपि धातुपाठे व्यत्यासकरणे विशेषमलभमानास्तं तथैवोददीधरन्। वेदभाष्यकारः निखिलविद्वन्माननीयमनीषी सायनाचार्य्यस्तु 'शब्दयोनिश्च धातवः।' इत्यभियुक्तोक्तिं सर्व्वनाम धातुजमाह शकटस्य च तोकमिति भाष्यकारोक्तिं च मनसिकृत्य सर्व्वानेव शब्दान् साक्षात्परम्परया

वा धातुप्रकृतिकानेव मन्यमानो धातुपाठमेव मुख्यस्थाने प्रकल्प्य तद्व्याख्यानक्रमेण तिङन्तरूपाणि कृदन्तरूपाणि तत एव सुब्विभक्तितद्धितादिप्रत्ययांश्च पर्य्यदर्शयत्। तद्भाष्यकारादिवचनानुरूपा वर्त्तन्ते च तावदेतस्य बहवो मान्यविद्वद्वरप्रणीता महान्तो निबन्धास्तथापि व्युत्पत्तिसौकर्य्यानुरोधेन विद्वत्कुलतिलकपदवाक्यप्रमाणपारावारीणभट्टोजीदीक्षितविरचिता सिद्धान्तकौमुदी विद्वज्जनमानसकैरवकौमुदीव पठनपाठनादिप्रचुरप्रचारा सर्व्वैरेव विद्वद्वरैरत्यन्तमुपकारिणीति शिरसाद्रियते। एतस्य पुनः सन्ति यावन्ति भाष्यटीकाटीप्पनादीनि परमैश्वर्य्याणि न तावन्ति कस्यापि शब्दानुशासनस्य प्रचुरतया परिकाल्पितानि आचार्य्यपादैः। परं एतदधीयानानां करतलामलकवत् निखिलशास्त्रार्थोपपत्तेः सुलभतया प्राधान्यमस्य सर्व्वैरेव स्वीकरणीयम्। सुतरामेतदेव व्याकरणं किं प्राचीनत्वेन किमार्षत्वेन वा विजयतेतरां स्वगौरवमहिम्नात्र जगति। परमेतस्य समधिकदोषगुणकीर्त्तनपूर्व्विका समालोचना दुःसाध्या बाहुल्यसापेक्षा चेति गौरवभिया उज्झिता स्वल्पयैव वाचा। अतः परं सूक्ष्मदर्शिगुणग्राहिणः प्रति एतस्य विचारणभारसमर्पणमेव विधेयं गवेषणीयञ्च तैरित्यलं शाखाचंक्रमणेन।

कलापव्याकरणसमालोचनम् ।

इह खलु व्याकरणं नाम शब्दानुशासनम् "अथ शब्दानुशासनम्" इति भाष्योक्तेः। अपि च 'एकः शब्दः प्रयुक्तः सम्यक्ज्ञातः स्वर्गे लोके च कामधुग्भवति।' इत्यादिश्रुतिवाक्येभ्यश्च सुप्रतीतमेव शिष्टशब्दानामुपादेयत्वं। व्याकरणानि तावत् बहूनि वर्त्तन्ते, तानि च प्रदेशभेदेन आद्रियन्त लोकाः। काश्यादिप्रदेशेषु पञ्चनदादिस्थलेषु च पाणिनीयसारस्वतयोः समधिकादरः। वङ्गेषु क्वचित् संक्षिप्तसारस्य क्वचिदपि सुपद्मस्य क्वचिदपि वा मुग्धबोधस्य कुत्रचित् प्रदेशे रत्नमालायाः कुत्रचिदपि कलापव्याकरणस्य पठनं पाठनञ्च प्रचलति। एषु पाणिनीयस्य ऋषिप्रणीततया भगवतः पातञ्जलेर्भाष्यकृतत्वेन परं छन्दोऽंशेन च व्याकरणानामग्रत्वमङ्गीक्रियते सहृदयैः। किन्तु रचनापारिपाट्येन शृङ्खलोपनिबन्धनेन च निखिलेषु व्याकरणेषु कलापव्याकरणं सनातनमिति नास्त्यत्र कियानपि सन्देहावसरः क्षुद्रोऽपि।

संक्षेपेणेह लौकिकानि पदानि व्युत्पादयिषुणाचार्य्येण सर्व्ववर्म्मणा कलापापरनामधेयं कातन्त्रं नाम व्याकरणं प्रणीतम्। आख्यातान्तं विरच्य प्रसिद्धत्वादुपेक्षितं। तच्चार्य्येण कृदन्तशब्दजातं कात्यायनेन व्युत्पादितम्। भगवता दुर्गसिंहेनाचार्य्यसूत्राणां कात्यायनसूत्राणाञ्चोपरि समीचीना वृत्तिर्विरचि।

प्र—८

स्यैवेदानीं पठनपाठनयोः प्रचरति। कात्यायनः किल कतिचित् छान्दसानि कृदन्तपदान्यपि व्युत्पादितवान्। कृदन्तभिन्नानां छान्दसानां पदानां कृदन्तानामपि सर्वेषां छान्दसपदानां व्युत्पादनं कातन्त्रव्याकरणे न विद्यते, कात्यायनो हि लोके यानि प्रयुज्यन्ते तान्येव छान्दसानि पदानि व्युत्पादयामास न सर्वाणि। ततो निखिलशब्दार्थशास्त्रपारंगतेन महात्मना श्रीपतिदत्तेन तदवशिष्टानि कलापपरिशिष्टानि निर्माय लघुवपुः कलापः किञ्चित्स्थौल्यमनायि। हा! हा!! किं दुर्भाग्यं कालापिकानाम्? सन्धितः समासस्य कति सूत्राणि संरचयन् निर्माणकालेनाग्राहि स पुरुषवर्य्यो महात्मा श्रीपतिदत्तः। ततः प्रभृत्यसंपूर्णमासीत् कलापकारः। साम्प्रतञ्च महामहोपाध्यायेन श्रीमता चन्द्रकान्ततर्कालङ्कारेनास्य छान्दसप्रकरणं प्रणीय पाणिनेरविशेषः अन्वष्ठायि। निखिलदोषोपस्कारिणी च सलक्षणा या भाष्यैरप्यनिन्दिता कलापचन्द्राख्या टीकास्मिन् आचार्य्यपादेन सुसेननाम्ना निरमायि। तादृशी विद्वज्जनगणमनोहारिणी विचारभावपरिशुद्धा सिद्धान्तसन्दोहनी टीका केष्वपि व्याकरणेषु न विद्यते। तथाहि आचार्य्याः—

"नत्वा शिवं कृतिकृतामनिबन्धसिन्धुमुन्मथ्य सूक्तिमय-
चारुपयःप्रबन्धम्
ज्ञात्वा गुरोर्विबुधवृन्दविनोदनाय कामं तनोति विकलङ्क-
कलापचन्द्रम्।

श्रीमत्त्रिलोचनकृताखिलपञ्जिकायां दोषान्धकार-
निकरं प्रतिपच्चदत्तम्
निःसार्य्य सत्पथगतैरपि दर्श्यकोऽयं कामं भविष्यति
मदीयकलापचन्द्रः ॥

अपि च पाणिनेर्यथा आर्षत्वेन प्रामाण्यं कलापस्यापि तथैवदैवतत्वेन प्रामाण्यमवश्यमेव स्वीकरणीयम् ।

"शङ्करस्य मुखाद्वाक्यं श्रुत्वा चैव षड़ाननः ।
लिलेख शिखिनः पुच्छे कलाप इति कथ्यते ॥"

इत्युक्तेः एतद्व्याकरणं पुनः कुमारवक्त्रान्निर्गलितत्वेन कौमारनाम्ना ख्यातम् । अस्ति तावत् आख्यायिका कथासरित्सागरे—'आचार्य्यो निराहारकृच्छ्रं तपश्चरन् तुष्णीम्भूय किञ्चित् गते तपःक्लिष्टतया निःसङ्गो धरणीतलं पपात । ततः शक्तिहस्तो दिव्यपुरुष एकः समागत्य—हे पुत्र ! सर्व्वं ते स्फुटं सम्पत्स्यत इत्यवोचत् । अथ तेनामृतासारसंसिक्त इव तत्क्षणं प्रबुद्धः क्षुत्पिपासादिरहितः स्वस्थो बभुव । ततोभगवान् स्कन्दस्तं 'सिद्धो वर्णसमाम्नायः' इति सूत्रमवादीत् । तत् श्रुत्वाचार्य्यो मनुष्यचापल्येनोत्तरसूत्रं व्याजहार । तदाकर्ण्य शक्तिधरः सविमर्षमाचष्ट—'अहो ! यद्यपि त्वमुत्तर सूत्रनावदिष्यस्तर्हि पाणिनियोपमर्द्दकमेतत् शब्दशास्त्रमभविष्यत्' इति तथाहि—

"अथाब्रवीत् सद्देवो मां नावदिष्यः स्वयं यदि ।
अभविष्यदिदं शास्त्रं पाणिनीयोपमर्द्दकम् ॥
अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति ।
मद्वाहनकलापस्य नाम्ना कालापकं तथा ।
इत्युक्त्वा शब्दशास्त्रं तत् प्रकाश्यासि नवं लघु ॥" इति

एतस्य पुनः वृद्धत्वमप्यवश्यमेव स्वीकर्त्तव्यं सभ्यानाम् । येन हि गरुड़पुराणादावपि प्रामाणिकग्रन्थेऽस्योल्लेखो वर्त्तते। तथाहि—

"कुमार उवाच—अथ व्याकरणं वक्ष्ये कात्यायनसमासतः ।
सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे ॥"

इत्यादि वाक्यसन्दर्भेण । अपि च—"आधारकर्म्मविहिते द्विविधे च क्यचि क्यङि इत्यादौ क्यच् क्यङ्णमुलः कलापमते यिनाय्यणमः" इति दर्पणकारोक्तेरप्रतिकूल एवास्माकं सिद्धान्त इति किं बहुना वाक्प्रपञ्चेन ।

मुग्धबोधसमालोचनम् ।

सन्ति यावन्ति शब्दशास्त्राणि तेषु संक्षिप्तरचनाकौशलेन मुग्धबोधमेवान्येभ्यः सविशेषादरास्पदमलंकृतमिति नास्ति तत्र कियानपि विकल्पः । तत्पठनपाठनयोः स्वल्पदिनसाध्यत्वेन निरसमप्येतद्व्याकरणमाकर्षत्यतिमात्रं चेतः सहृदयानाम्।

विशेषतः कारकप्रकरणं कृदन्तांशश्चामुष्य निरुक्तमत्वेन समधिक-माद्रियन्ते महनीयगुणग्रामा महान्तः। तद्धि शब्दार्थपारंगतो-वन्दनीयपदारविन्दो महात्मा वोपदेवः स्वयमिन्द्रचन्द्राद्यखिल-शाब्दिकमतसुदधिमालोड्य तस्मात् महार्घमणिनिचयवदुपादेय-वचनजातञ्चाहृत्य तदायासमङ्गीकर्त्तुमशक्तानां संक्षेपतो व्याकरण-बोधलिप्सूनां तदुपहारेण महोपकारमकरोत्। आह स्म स्वय-ञ्चास्य पठनीयतामुल्लेख्य—

"गीर्व्वाणवाणीवदनं मुकुन्दसंकीर्त्तनञ्चेतुद्रयं हि लोके।
सुदुर्ल्लभं तच्च न मुग्धबोधान्नलभ्यतेऽतः पठनीयमेतत्॥" इति

तस्यैवाचार्य्यचक्रचूड़ामणेरपराकृतिः कविकल्पद्रुमो नाम धातुपाठः। स हि कवीनामभीष्टफलदातृतया कविकल्पद्रुम इत्यन्वर्थनामधेयो धातुपाठः, यथा तदुपयोगित्वेन सकलवैयाकरण-संप्रदायेषु समानादरं लभते। उक्तञ्च केनापि वोपदेवगुण-ग्राहिणा—

"दीर्व्वाचस्पतिनेव पन्नगपुरी शेषाहिनेवाभवत्
येनैकेन विदुष्मती वसुमती मुख्येन रुख्यावताम्।
सोऽयं व्याकरणार्णवैकतरणिश्चातुर्य्यचिन्तामणिः
जीयात् कोविदगर्व्वपर्व्वतपविः श्रीवोपदेवः कविः॥" इति

अस्य तावद्व्याकरणस्य द्वे टीके स्तः। एका श्रीमद्दुर्गादास-विद्यावागीशकृता। अपरा च परमविदुषा महानुभवेन श्रीमता श्रीरामतर्कवागीशेन विरचिता। अनयोस्तर्कवागीश-

टीकाया एव समधिकादरो दृश्यते। शाब्दिकमुख्येन श्रीमन्नन्दकिशोरचक्रवर्त्तिना पुनर्विरचितं मुग्धबोधपरिशिष्टं नामापरमतुग्रपादेयमेकं परिशिष्टमेतद्व्याकरणस्य।

स खलु शब्दार्थविज्ञानधुरीणो वोपदेवः कस्मिन् समये कतमं देशं जन्मनालंकृतवान् तद्यथावदवधारयितुं न शक्यते। परन्तु प्रत्नतत्त्वान्वेषिणः कतिशः कृतिनो मानवाः द्वयशीतुग्रत्तरैकादशशततमशकसंवत्सरे द्वित्रादिवत्सरन्यूनाधिके वा स किल महात्मा भिषग्व्यवसायिनः केशवनाम्नो विप्रात् द्वजन्मा विद्वद्धनेश्वरमिश्रादधिगतविद्यो दक्षिणापथवर्त्तिन्या अधुनातन-'दौलातवाद' इत्याख्याया देवगिरिराजधान्या अधिपतेर्महादेवस्य सभापण्डितपदमास्थाय तत्रोवासेति निर्णीतवन्तः। चतुर्वर्गचिन्तामणिनिबन्धकारो हेमाद्रिरपि तस्यैव राज्ञः समस्तकरणाधीश्वरः प्रधानामात्यपदमध्वासितः। तेन सह वोपदेवस्य परं सौहार्दमासीत्। तत्प्रणोदितः स हरिलीलाख्यं मुक्ताफलनामधेयञ्च भागवतव्याख्यानं निबबन्ध। तत्र हरिलीलाटीकायां—'मन्त्रिहेमाद्रितुष्टये' मुक्ताफलग्रन्थे च 'विद्वद्धनेशशिष्येण भिषक्केशवसूनुना। हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत्॥' इतग्रनेनान्योऽन्ययोः सौहार्दं स्मारयतीति।

अस्ति तारद्वोपदेवसम्बन्धिनी कापि परमाद्भुता किंवदन्ती—वोपदेवो बाल्ये वयसि व्याकरणमधीयानो दुर्मेधतया व्याकरणार्थं मनागपि स्वायत्तं कर्त्तुं नाधिशशाक। ततश्चैकदा

परिजनतिरस्कृतेन परमनिर्व्वेदं गतो जीवनपातार्थमरण्यमेकं ययौ। तत्र मार्गगमनजनितक्लेशेन क्लिश्यन् जलं पातुं सरसीमेकां गत्वा पीत्वा च सलिलं श्रमोपनोदनार्थं तस्य सुरम्यसोपानशिलातलमुपविशत्; तत्र क्षणे कलसमुद्वहन्ती कापि रमणी सहसागतत्र सोपानशिलायां तमेव कलसमास्थाप्य सम्पादितस्नाना तमुदकेन पूरयन्ती भूयो गृहमगात्। ततोऽपश्यद्वोपदेवः पाषाणनिर्म्मितमपि सोपानं नारीनिहितमृण्मयकलससंसर्गेण क्षयमित्य गोलाकारो गर्त्तक एकः संवृत्त इति। तत् समीक्ष्य व तस्याध्ययने पुनः प्रवृत्तिरभवत्। यत् कठिनमपि ग्रावनिर्म्मितसोपानं बहुवासरतो बहुशो मृद्भाण्डघर्षणेनापचयं यातम्। तन्मन्दापि मतिर्मे मुहुरालोचनयावश्यमेव तीक्ष्णतामापत्स्यति। ततो गृहमागत्य कृतोद्यमेन तेनाधीतत्र स्वाभीष्टफलमापेदे। केऽप्याहुः श्रीमद्भागवतमपि तेन वोपदेवेन निर्म्माय वेदव्यासनाम्ना प्रक्षिप्तमिति। भवतु तद्वान वेति तत्र न किञ्चिद्वक्तुं मामकानामवकाशः। किन्तु स यदिदमपल्लवितमल्पसमयसमापनीयं विबुधमुखमण्डनं मुग्धबोधं नाम व्याकरणं प्रणीयासाधारणीं शक्तिं प्रकटयामास, तेनैव विमुग्धा विदग्धाः। तत्कृती किमपि वक्तुं नालमलम्। परं यावत् भवति रात्रिन्दिवं यावदुदेति च चन्द्रमास्तावदेव तस्य पुण्यकीर्त्तेरिदं व्याकरणमधीयानानां निःश्रेयसमार्गमुपदेक्ष्यतीति किं बहुवाक्योपन्यासेन।

सांख्यसमालोचनम् ।

आत्मानुसन्धानमन्तरेण दर्शनशास्त्रे प्रवृत्तिर्न जायेत। कोऽहमासं किं भविष्यामि, किं मे स्वरूपमिति केन वा रूपेण विश्वस्य सृष्टिरभूत्? कथं वास्य प्रलयो भवेत्? जन्म-मरणादिदुःखमात्मनः स्वभावसिद्धो न वा? तदुच्छेदोपायः सम्भवोऽस्ति न वा? इत्यादयो बहवः प्रश्ना, मनीषिणां चेतसि स्वत एव समुत्पद्यन्ते। त एव प्रश्नाः चिन्ता वा मननशास्त्र-स्याविर्भावे हेतुः। प्रवर्त्तमानेऽस्मिन् क्षुद्रे प्रबन्धे कापिलदर्शनानु-सारेणैवामीषां प्रश्नानां सूक्ष्म सिद्धान्तः न संक्षेपेण सम्भवति। स्थूलत एव तत्र 'प्रकृतिपुरुषयोरन्यत् सर्व्वमनित्यम्' इत्युच्यते आचार्य्यपादैः। पुरुषो निर्गुणश्चेतनो विभुरनेकश्च। प्रकृतिरचेतना विभुरेका परिणामस्वभावा च। पुरुषसन्निधानतया अस्या जगदाविरासीत्। उपादानकारणगुणानुसारेण कार्य्यद्रव्येषु गुणः समजनि तथा च 'कारणगुणाः कार्य्यगुणानारभन्ते' इति। अतः कार्य्यगुणानुरोधेन कारणगुणकल्पना प्रामाणिकानां न दुःखावहाः। दृश्यन्ते कार्य्यवर्गेषु ज्ञान-सुखप्रसाद-प्रवृत्ति-दुःख-मोहावरणादयोऽनेके गुणास्तदनुसारेणैव मूलकारणे प्रकृता-वप्येते गुणाः नूनमेव विद्यन्त इति कल्पनाप्रमाणकुशलैर्विद्वद्भिः स्वीचक्रे। सत्त्वरजस्तमसां साम्यावस्थोपलक्षिता हि सा प्रधाना तथाहि—

"सत्त्वं रजस्तम इति गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषामव्यक्तां प्रकृतिं विदुः ॥" इति

सत्त्वस्यज्ञानसुखादयो रजसो दुःखप्रवृत्त्यादयस्तमसश्च मोहावरणादयो धर्म्मा इति। ते च सत्त्वादयो गुणा न न्याय-वैशेषिकाभिमतरूपरसादिवदात्मनो धर्म्माः। ते हि गुणाः पुरुषं पशुवत्‌बन्धकत्वेन त्रिगुणरज्जुनिर्म्मातृकत्वेन च गुणशब्देन व्यपदिश्यन्ते वृद्धैः। नहि प्रकृतेर्गुणाः किन्तु गुणा एव प्रकृति-रिति ज्ञेयम्। ते च गुणा अनादिमिलिताः संयोगवियोगर-हिता अन्योऽन्याश्रयाश्रयिरूपेण नित्यसहचराः परस्परपरिणाम-स्वभावा एव। तथा च 'परिणामस्वभावा हि गुणा नापरिणम्य क्षणमप्यवतिष्ठन्ते' इति। सत्त्वादिगुणत्रयाणां बहुत्वं व्यक्तिरूपेण स्वीकर्त्तव्यम्। यथा एकस्य वस्त्रकार्य्यस्य संख्यातीतानि सूत्र-रूपाणि कारणानि दृश्यन्ते, तथानन्तस्य विश्वसंसारकार्य्यजातस्य मूलकारणमेकमेवेति कल्पयितुं न शक्यते। अतिसूक्ष्मतमस्य मूलकारणसमूहस्य समष्टिभावेन प्रकृतेरेकत्वमुच्यते। अव-यवविभागाद्‌विभागस्य यत्र काष्ठाप्राप्तिः सैव मूलप्रकृतिः। नैयायिकास्तावत् परमाणुषु विश्रमन्ति, परमाणवो हि तेषां निरवयवा नित्याश्चेति सिद्धान्तम्। किन्तु वृद्धास्तेभ्योऽपि सूक्ष्मत-मेषु पदार्थानाधिक्षिपन्ति। तेषां तन्मात्राणि नैयायिकानां पर-माणवश्चैकदेशगतानीति कथञ्चिद् वक्तुं समीहते, केवलं पर-माणवो नित्याः, परं खलु जन्यानि तन्मात्राणीति। एतन्नये

नास्त्यसतामुत्पत्तिः सतां वा विनाशः। सर्वावकाशे प्रलयेऽपि सर्व्वे एवानभिव्यक्ताः प्रकृतिमुपगता वर्त्तन्ते। ततः कर्म्मवशात् सृष्टेः प्रागाविर्भूय विकाशन्ते। अस्मिन् तावत् उत्पत्तेर्नामाविर्भावः, विनाशस्य च तिरोभावः। वेदान्तवत् सृष्टिकर्त्तृत्वमीश्वरस्य नाङ्गीक्रियते। योगबलेनाणिमाद्यैश्वर्य्यवान् जीव एवेश्वरः। उभौ प्रकृतिपुरुषौ व्यापकावपि सृष्टेः प्राक् संयुज्येते। संयोगश्चायं भोग्यभोक्तृत्वरूपसम्बन्धविशेषः। प्रकृतिर्भोग्या, पुरुषो भोक्ता। प्रकृतिपुरुषयोरयमेव संयोगो विश्वं जनयति। यदा तु गुणत्रयं परस्परं वैरभावं परिहृत्य साम्यभावं भजते, तदैव प्रलयः। पुनः पुरुषसम्बन्धात् साम्यभावं परिहाय वैषम्यभावं गच्छन्ति गुणाः। तस्मादेव गुणवैषम्यादभवत् सृष्टिः। वैषम्यानाञ्च नानात्वेन विचित्रताकार्य्याणाम्। तदवस्थायाः प्रकृतेः प्रथमपरिणतिर्बुद्धिः। अन्तःकरणरूपमेकमेवद्रव्यं कार्य्यविशेषणबुद्ध्यहंकारमनःशब्दवाच्यम्। निश्चयवृत्तिरूपं कार्य्यं बुद्धेः, अभिमानमहङ्कारस्य, सङ्कल्परूपञ्च मनसः। बुद्धिरूपपरिणतायाः प्रकृतेः पुरुषेण सम्बन्धो विशिष्यते। प्रकृतिरूपपरिणतानां गुणानां धर्म्मः पुरुषेणोपचर्य्यते, किन्तु बुद्धिरूपेण परिणतानां धर्म्मः सुखदुःखादि आत्मन्यारोप्यते। तदा निर्म्मलस्वभावः स वरेण्योऽपि संसारकीटरूपेण परिणमति। तस्येदमनादिसंसारित्वं विवेकज्ञानेनोच्छिद्यते। बुद्धिर्गुणेभ्य उत्पन्नापि सत्त्वाधिक्येन सत्त्ववती। अतएवास्यां

ज्ञानसुखादीनां विकाशो जायते। सत्त्वाधिक्यादेवास्यां तादृश्येका शक्तिरास्ते, यस्याः प्रभावाद् बुद्धिः पुरुषचैतन्यं प्रगृह्य स्वयं चेतनायमाना जीवभावेन संसारं निर्व्वहति। आविरभूज्जीवो जड़चैतन्यमिश्रणात्। तर्हि मिश्रणं हृदय-ग्रन्थिशब्दवाच्यम्। जड़स्य स्थूलरूपपरिणामेण सह जीवस्य भवति क्रमविकाशः। ततो बुद्धिधर्म्माः सुखादयः पुरुषेषु पुरुषाणां चिद्धर्म्मो बुद्धावुपचर्य्यते। यथा तप्ते अयसि वह्निलौहयोर्भेदेऽपि भेत्तुं न शक्यते। तथा बुद्धिपुरुषयोरपीति सिद्धान्तम् एकस्य पुरुषस्य एकया बुद्ध्यास्त्यनादिस्वस्वामिभावसम्बन्धः। पतिरता हि बुद्धिः पतिसम्पर्कं विहाय नावतिष्ठते क्षणमपि। अयं सम्बन्ध-नाश एव लिङ्गशरीरनाश इत्युच्यते। सैव मोक्षावस्था। तथा च बुद्ध्यहंकारैकादशेन्द्रियसूक्ष्मभूतपञ्चकानां समुदाय एव लिङ्ग-शरीरम्। तत्र बुद्धेरेव प्राधान्यमङ्गीकुर्व्वन्ति वृद्धाः। तल्लिङ्गशरीरं स्वर्गनरकादि व्यवहारिकजीवशब्दवाच्यम्। स्थूलशरीराल्लिङ्गशरी-रस्य निर्गमनं मरणम्, तस्मिन्नपि प्रवेशो जन्म। तथा च तत्त्वकौ-मुद्याम्— 'निकायविशिष्टाभिरपूर्व्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धि-वेदनाभिः पुरुषस्याभिसम्बन्धो जन्म, न तु पुरुषस्य परिणामस्त-स्यापरिणामित्वात्' इति। अन्यथा अनादिविश्वव्यापकस्यात्मनः कथं जन्ममरणंसम्भवति? परेतपतिः सत्यवतः कायात् पुरुषमेकं निनायेति महाभारतवर्णनश्रवणात् पुरुषशब्देनात्र लिङ्गशरीरमेव बुद्ध्यते। तथाहि—'ततः सत्यवतः कायात्

पाशबद्धं वशं गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्॥' इति। आत्मनस्तु परिमाणं महत्, अणुपरिमाणत्वे युपपन्नं भवति सर्वशरीरे शैत्यबोधः। मध्यपरिमाणत्वे घटपटादिवदात्मा विनाशी स्यात्। द्वाभ्यां स्थूलसूक्ष्मपरिमाणाभ्यामभिन्नरूपेण भाषमाणः पुरुषः अहं सुखी दुःखी करोमि शृणोमि गच्छामि अन्धो वधिर इत्यादि सकलसंसारव्यवहारं निर्व्वहति। लिङ्गशरीरविनाशादेवात्मनो भवति स्वरूपेणावस्थानम्। तदा तस्मिन्नात्मनि बुद्धिधर्म्माः सुखादयो न प्रतिभान्ति। इदमेवात्मनः स्वरूपेणावस्थानं मुक्तिशब्देन व्यपदिश्यते प्रेक्षावद्भिरिति दिक्।

विक्रमोर्व्वशीयसमालोचनम्।

विक्रमोर्व्वशीयं हि नाम त्रोटकं तत्रभवता श्रीमन्महाकविना कालिदासेन प्रणीतम्। एतस्यापि मनोहरमेव कथासन्दर्भादिकाव्यवैभवं परमरमणीयम्। चतुर्थेऽङ्के राज्ञो नष्टप्रियतमामार्गणक्रमोऽतिसुन्दरः। अस्मिन्नपि काव्ये पद्यानि ललितमधुराणि स्वहृदयसमास्वाद्यानि वस्तूनि कवेरितरयोर्नाटकयोरिव विद्यन्ते। तथा च प्रियप्रसादनार्थं चन्द्रोदये समागमिष्यन्त्यामौशीनर्य्यां विदूषकवाक्यमाकर्ण्य प्राची

समालोक्य राज्ञः पुरूरवस उक्तिः,—'उदयगूढशशाङ्कमरीचिभिस्तमसि दूरतरं प्रसारिते। अलकसंयमनादिव लोचने हरति मे हरिवाहनदिङ्मुखम्॥' अत्र यदुदयन्मुखं शशाङ्कमवलोक्यापनीतालकजालं वराङ्गनायाः मुखश्रियमिव शान्तमधुरया नवीनया दिशा प्रत्यक्षमेव प्रत्याययति कविः काव्यशास्त्रमध्ययतॄणां मनांसि तद्धि ऋते एतत्कल्पनाकुञ्जकोकिलस्य कवयितुर्लेखनीं नान्यत्र सुसुलभमिति। त्रोटकेऽस्मिन् प्रथमतः उर्वशीपुरूरवसोः परिचयसमलोचनावसरे समुदेति स्वत एव हृदयभावोऽस्माकं यदुर्वशी सोमवंशप्रसूनस्य राज्ञः पुरूरवसः द्युलोकदुर्लभवीर्य्यवत्तया वा कृतज्ञतया वा विजितकन्दर्पलावण्यतया वा सन्दर्शनमात्रेणैव स्वर्गभोगपरितृप्तापि अप्सरा अपि अमानुषपदमधिशयानापि तस्मिन् राजनि विशेषेण रमते; तदेव हि नाटकानां शीर्षतमस्य अभिज्ञानशकुन्तलस्य दुष्मन्त शकुन्तलयोः प्रथमानुरागकालापेक्षया चारुतरमभिधत्ते। शाकुन्तले तथाभूतं किमपि अनिर्व्वचनीयं न समजायत, येन प्रथमपरिचय एव प्रणयस्य दृढ़तामभिधत्ते, अवश्यं दुष्मन्तोऽपि राजा नानागुणसम्पन्नो वीर्य्यवान् लावण्यवान् राजचक्रवर्त्तिलक्षणयुक्तः, किन्तु तत्र न तथा किमपि प्रकाशते, यथा प्रथमपरिचय एव तथावत् प्रणयदृढ़तामुत्पादयितुं प्रभवति। अत्र तावत् चित्रलेखामुपस्थाप्य तन्मुखेन राज्ञो महत्त्वं आसक्तेरपि यथाकथञ्चिद्धेतुं सख्येनैव वचसा प्रकाशयति कविवरः। तथा च उर्वशी (उन्मील्य-

चक्षुसी) 'किं सम्पहारदंसिणा महेन्देण अब्भुववण्णि ?' चित्रलेखा—'ण महेन्देण महेन्दसरिसाणुभावेण राएसिणा पुरूरवसेण।' इत्यत्र प्रथमपरिचय एव राज्ञि महेन्द्रसदृशानुभावः उर्वश्या आसक्तिव्यञ्जकः। काव्यकलासंसृष्टौ च केशिदानवभयवित्रस्तां मूर्च्छितां वेपथुमतीमुर्वशीमुपस्थाप्य तस्याः मोहापगमे स्वप्नानुभूतमिव राजानमवलोक्य यदनीर्वचनीयतां सुसमाविशयति स्वल्पेनैव वचसा सकलकविदुर्लभकल्पनाविभवस्तत्रभवान् कालिदासः। मन्ये नाटकीयवस्तुन स्तादृत्व् चमत्कारित्वसंस्थापनाय कविरन्यः शतेनैव सुभाषितेन तथा सम्पादयितुं समर्थोऽस्ति। अपि च एतन्नाटकीयवस्तुना विष्णुपुराणस्य चतुर्थे अंशे षष्ठाध्याये विद्यते यदाख्यायिका, तदवलम्ब्य कविः तस्माच्च नवीनेन भावेन नवीनया दिशा बोधयामास काव्यसमालोचयितॄणां चेतांसि नवनवभावाभिनिवेशेनातिमात्रम्। तथा हि भगवतो मित्रावरुणस्य शापेन उर्वशी मानुषीभूत्वा प्रथितयशसः प्रतिष्ठानगराधिपतेः पुरूरवसः अमानुषं रूपं दृष्ट्वा विमुह्य तेन सह समयं कृतवती, यन्मम एकलमस्योर्णायुशावकस्य यावत् न लुष्टिष्यति, भवतोऽपि असंयतावस्थं नावलोकयिष्यामि तावत् त्वत्सविधे निवसामीति। ततो बहुतिथिं मानुषीभावेन राजभोगमुपभुञ्जमानाया इन्द्रादेशितेन विश्वावसुना रात्रावेकमुरणशावकं चोरयितुं प्रचक्रमे। ततः शिशोर्भयव्याकुलरवमुपश्रुत्य निद्राविलसा सोर्वशी तदपहारिणि यथोप-

युक्तां शास्तिं विधातुं राजानमनुरोरुध। तेनासंयतो विमान-मार्गं गच्छन् राजा तड़ित्स्फुर्जनात् उर्व्वश्याः नयनपथवर्त्ती समजायत। तेनैव च सा अत्रान्तरे पूर्व्वप्रतिज्ञां स्मृत्वान्तर्दधे। ततः प्रभृति उर्व्वशीविरहितः पुरुरवाः प्रमत्त इव पृथिवीमटित्वा बहुतिथिमन्तरेण अम्भोजसरसि सहचरीसमावृतां जलक्रीड़ा-रतां तां विलोक्य बहुप्रवेदितेन स्तवेन तुष्टिमनयत्। तेनापि च गन्धर्व्वाः अपि परितुष्टाः तस्मै उर्व्वशीसायुज्यवरमदन्; इति, यातु तत् पूर्व्वतनी कथा काव्यदृष्ट्या शिक्षणीयतया च अस्य काव्यस्य हृद्ये नास्ति क्षुद्रोऽपि सन्देहः, यन्महादेव्याः औशी-नर्य्याः स्वामिनः पुरुरवसः उर्व्वश्यामासक्तिविज्ञानेऽपि तथात्व-वादः एवातिविस्मयं माधुर्य्यञ्च समातनोति अभिनयदर्शकानां सभ्यानां चेतसि श्रुतौ चातिमात्रम्। तथा च औशीनरी रोहिणीसुसंगतं भगवन्तं चन्द्रमसं प्रार्थयति—'अज्ज पहुदि अज्जउत्तो जं इत्थिअं कामेदि जा अज्जउत्त समागम-प्पणइणी, ताए सह अप्पदिबन्धेण वत्तिदव्वम्।' इति नैषा साधारणी वाणी योषितामितोऽन्यत् किमपि महत्त्वं स्वामिनं प्रति कर्त्तव्यञ्च विद्यते लवोऽपि। काव्येऽस्मिन् यत्र यत्र औशीनर्य्याः समागमं संलभामहे, तत्र तत्रैव तस्याश्चरित्रस्य परमोत्कर्षं कोमलताञ्च विशेषेणावगच्छामः। चेटीमुखेन उर्व्वशीं प्रति राज्ञः अनुरागवार्त्तां विदितवत्यपि यत्गूढ़ेन तत्-सर्व्वं ज्ञातुमुपचक्रमे, स महिष्याः अप्राकृतजनस्येव व्यवहारः

राज्ञि च असीमप्रत्ययस्य प्रकृष्टप्रमाणाम्। तथा चित्रलेखाया-श्चरित्रचित्रणमप्यत्यतिसुन्दरं, यदा यदा हि तस्याः सङ्गतिं संलभामहे, तदा तदैव तस्याः सुरसवाग्विभवेन वयं परितुष्टाः। तथा च अभिसारिकावेशेनोर्वशी विमानमार्गे चित्रलेखां पृच्छति—'स हि' रोअदि दे मे अअं मोत्ताहरणभूसिदो णीलं-सुअपुरिग्गहो अहिसारिआवेसो ?' इति, तदुत्तरे चित्रलेखा स्वल्पयैव वाचा आत्मनः प्रावीण्यं वचनचातुर्य्यञ्च दर्शयति 'णत्थि मे वाअविहवो पसंसिदुं, इदं तु चिन्तेमि, अविणाम अहं एव्व पुरुरवा भवेअं ति।' इति अहो! इतोऽन्यत् किं रमणीयं वर्णनं भवितुमर्हति नाट्यजगति यत् स्त्रियः रूपं दृष्ट्वा तस्याः वल्लभो भवितुमिच्छति स्त्री, तदतिहृद्यमेव कौशलेन कविः स्वल्पयैव वाचा प्रतिबोधयति सभ्यान्। तथापि वक्तु-मुत्सहामहे यदेतस्य प्रधानपात्रस्य राज्ञः पुरूरवसः चरित्राङ्कने कविना किञ्चित् कार्पण्यमवतारितम्। येन दानवप्रमाथिन-मसीमवीर्य्यशालिनं देवराजसखं राजानमुपस्थाप्य तस्य देव-राजोपभोगसाधनीभूतायां तथाभूता आसक्तिः अतिदुर्ब्बल-हृदयस्येव समधिकोन्मादभावः कस्याश्चित् वेश्यायां कृते कथं नाम सानन्दमभिनन्दयामः। एवञ्च चरित्रसंस्थापनायां नितान्तनिपुणोऽपि कविकालिदासः अनुरक्तायामौशीनर्य्यां राज्ञः निरुत्सुकत्वं तथानुरक्तमपि साधारणदोषेण परिहृत्य राजान-मुर्व्वश्यास्तथाभावः, उर्व्वश्या विरहेण राजराजेश्वरस्यापि तथा

उन्मादावस्था, राज्यचिन्ताविस्मृतिः। इत्यादिबहुप्रकारावस्था-संस्थापनेन न तादृशं सौन्दर्यं परिस्फुरति चरित्राणाम्। राज-प्रधानस्य पुरूरवसः कर्त्तव्यविस्मरणेन उन्मत्त इति परिकल्पनया च जायते साधारणेष्विव तत्र हीनताबुद्धिः। अपि च उन्मत्तता इयं अलौकिकतामिव दधाना नास्माकं हृदयमधिकुरुते। एवमपि वयं अभिज्ञानशकुन्तलस्यश्लोकेन सममेतस्य बहुशः श्लोकानां सौसादृश्ये स्थितेऽपि न तादृशं मनोहारित्वमस्य स्वीकर्त्तुं शक्नुमः, तेषां दिङ्मात्रं प्रदर्श्य संप्रति प्रतिनिवर्त्ति-ष्यामः। तथा च शकुन्तलादर्शनात् परं दुष्मन्तस्य 'गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः। चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥' इत्येवं वचसा मनोभावविकाशः एवाधिकतरं समुदारतया रमणीयतया च प्रतिभाति। अहो! दुर्लभाभिलाषो मदनः 'एषा मनो मे प्रसभं शरीरात्' इत्यादि पुरूरवसो वचनेन तथा उदारता रमणीयता च। 'गच्छति पुरः शरीरम्' इत्येवं वादिनो दुष्मन्तस्य वचनेन वयं तस्य चित्तवृत्तिं मूर्त्तिमतीमिव समापवर्त्तिनोमवलोकयामः। शकुन्तलादर्शनेन राज्ञश्चित्तं तथा जड़तामवलम्बत तथा च शकुन्तलायां तस्यासक्तिरजायत यथा तां परिहाय तस्य कुतश्चिदपि प्रस्थानमशक्यमिति श्लोकेनैव तथा प्रतीतिः। 'एषा मनो मे' इत्यादिना केवलम् उर्व्वश्या सह मम मनो गच्छतीति प्रतिपाद्यं न प्रकृतावस्थोपस्थितिः। अपि च

यथा शाकुन्तले श्लोकस्य कवित्व-माधुर्य्यं न तथात्रेति कृतं पल्लवितेन।

विक्रमोर्व्वशीयस्य संक्षिप्तेतिवृत्तम्।

अस्य तावत् प्रथमेऽङ्के राज्ञा पुरूरवसा केशिदैत्येन हृतायाः उर्व्वश्याः समुद्धरणम्; तस्याः सखीभिः सह संगतिश्च; अत्रान्तरे सञ्जातपूर्व्वरागयोः राजोर्व्वश्योः स्वस्वालयं प्रति गमनम्। द्वितीये—कामेन परिभूयमाने पुरूरवसि प्रमदवनस्थे तिरस्करिणीप्रच्छन्नायाः सचित्रलेखायाः उर्व्वश्याः स्वर्गादवतीर्य्य राज्ञे प्रेमपत्रदानं; अथ राज्ञानुवाचिते तस्मिन् विदूषकहस्तन्यस्ते सखीं संप्रेष्य स्वयमुपस्थानं, लक्ष्मीस्वयम्बररूपकाभिनेतुमाहूतायाः अपूर्णमनोरथायाः स्वर्लोकगमनम्; अथ प्रणष्टं मदनलेखमन्विष्यति राजनि दुर्भाग्यश्रवणकुपितया चेट्या सह समायान्त्या औशीनर्य्या पथि वायुचालितस्य पत्रस्याधिगतिः। सा च लेखमर्पयित्वा भर्त्तुरनुनयं पादपतनञ्चापि उपेक्ष्य शुद्धान्तमभिप्रस्थिता, राजविदूषकयोश्च प्रस्थानम्। तृतीये—विष्कम्भके भरतशिष्ययोः संवादे इन्द्रालयप्रयुज्यमानलक्ष्मीस्वयम्बरे वारुणीभूमिकया मेनकया 'कस्मिंस्ते हृदयाभिनिवेशः' इति पृष्टा लक्ष्मीभूमिकोर्व्वशी 'पुरुषोत्तमे' इति

वाच्ये प्रमादात् 'पुरूरवसि' इति उक्तवतीति कुपितेन भरतेन 'न ते दिव्यं स्थानं भविष्यति' इति अभिशप्ता पुनर्महेन्द्रेण 'यथाकाममापुत्रमुखदर्शनं तं मे समरसहायं सखायमुपतिष्ठस्व' इत्यनुकम्पितेति कथांशः प्रकाशितः; मणिहर्म्यगृहे राज्ञि विदूषके समागते प्रभावपिहितायाः सखीद्वितीयायाः उर्वश्याः अभिसारवेशेन, देव्याः औशीनर्य्याश्च प्रसादनव्रतव्यपदेशेन तत्र गमनम्; रोहिणीसंगतं चन्द्रमसं कञ्चुकिविदूषकौ राजानञ्चाभ्यर्च्य तस्याः प्रतिगमनम्, उर्वश्या राज्ञः समीपे आगमनम्, चित्रलेखायाः स्वर्गारोहणञ्च। चतुर्थे—कुमारवनं प्रविष्टाया उर्वश्याः लताभावकीर्त्तनम्,सङ्गममणिश्च तन्मोचोपाय इति कथनञ्च विरहविधुरस्य राज्ञः मेघ-मयूर-पिक-मराल-मधुकर-करि-शैल-सरित्-सारङ्ग-नीपेषु प्रियोदन्तजिज्ञासानन्तरं सङ्गममणिमधिगत्य लताभूतां प्रियामालिङ्गतः शापमुक्तया तया सङ्गमश्च। पञ्चमे—गृध्रेण सङ्गममणिहरणम्; कुमारस्यायुषः समागमः पित्रा परिचयश्च, तद्दर्शनप्रमुदितेन राज्ञा समाहूतया उर्वश्या विषादः, वनप्रस्थानाय कृतोद्यमे पुरूरवसि नारदेनागत्य महेन्द्राज्ञा ज्ञापिता, तेनायं राजायुषं यौवराज्येऽभिषिच्य उर्वश्या सह ससुखमध्युवासेति वर्णितम्।

विक्रमोर्व्वशीयस्य नायकादिसिद्धान्तः ।

नायकश्चात्र पुरुरवाः शठो धीरोदात्तः ; रक्ताभिसारिका दिव्या साधारण्युर्व्वशी, कलहान्तरिता मध्या धीरा स्वकीयौशीनरी च नायिके चालम्बनविभावाः । मलयानिलचुतमुकुलादयः उद्दीपनविभावाः ; परस्परसंवादाक्षिविक्षेपादयश्चानुभावाः ; आवेगौत्सुक्योन्मादचिन्तादयो व्यभिचारिणः, रतिः स्थायी, सम्भोगशृङ्गारोऽङ्गी, हास्यविप्रलम्भादयोऽङ्गरसाः, विदूषकादयः सहायाः, रीतिः पाञ्चाली, गुणो माधुर्य्याख्यः, प्रस्तावना प्रयोगातिशयाख्या, दूती चित्रलेखा निसृष्टार्था इति ।

महावीरचरितस्य समालोचनम् ।

महावीरचरितं हि नाम नाटकं नाट्यनिवहेषु परमहृद्यं सहृदयानाम् । एतत् खलु काव्यं महामहिम्ना श्रीकण्ठोपाधिकेन भवभूतिना कविना प्रणीतम् । अस्य तावत् कवेः रचनानैपुण्यं नाटकस्य प्रत्यङ्गेषु अन्वर्थनाम्ना प्रतिफलितम् । एतस्य च स्थानेषु भीतिः, स्थानेषु उत्साहः, स्थानेषु च प्रतिपक्षनिराकरणप्रवृत्तिः साधारणानामेवातिमात्रं मोहयत्यतितराम् । रामस्य शान्तभावेन वनप्रस्थानम्, अकातरतया साम्राज्यपरिहारः, महा-

महिमशालिनोऽपि विनयनम्रता, लक्ष्मणस्य भरतस्य च भ्रातृप्रेम, गुरूणां स्नेहः, तपसाञ्च तेजः इत्यादि यथायथमवस्थापनात् प्रत्यक्षमिव समीक्षन्ते अभिनयसमक्षकारिणः सामाजिकाः । तथाहि 'ब्राह्मणातिक्रमत्यागो भवतामेव भूतये । जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥' इति शूर्पणखोक्तिषु नीतिपथावतरणं बालिप्रभृतीनां परशुरामरामयोरुक्तिप्रत्युक्तिषु च तथा वीररसावतारः, यथा रामस्य विनयो न व्याहन्यते लवमात्रम्, तथा हि रामः—'भगवन्, परिरम्भणमिति प्रस्तुतप्रदीपमेतत्' 'अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधौ' इत्यादौ विनययुक्तवीररसस्य सुष्ठुसमावेशयति कविवरः। सीतोपदेशावसरे च यदा रामः—'मुनिरयमथवीरस्तादृशस्तत् प्रियं मे' 'विरमतु परिकम्पः कातरे, क्षत्रियासि' इत्यादौ च यथा वीररसावष्टम्भः अभिनयदर्शकार्थिनां मनांसि रसभावधारया परिप्लाव्यते । मन्ये तादृक् काव्यकलासुसमावेशनमाधुर्यमन्यत्र सुदुर्लभम् । तथा 'न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनः' 'यत् क्षत्रियेष्वपि पुनः स्थितमाधिपत्यम्' 'साधु राजपुत्र, साधु सत्यमैक्ष्वाकः खल्वसि—अन्विष्यतः प्रमथनाय,' इत्यादि स्थलेषु महावीरचरितमिति नाम्नः सार्थकतां निनाय तत्रभवान् भवभूतिर्नाम कविकुलैकभूतिः । यद्यपि च विद्यन्ते बहुला एव सामाजिकानां प्रमोदोत्कर्षज्ञापका गुणांशाश्च, तथापि वक्तुमुत्सहामहे यत् रामायणादिविरुद्धस्वकपोलकल्पितकथांशनिबन्धनेन स्थिति-

संस्कारवैपरीत्यं, रसविकाशावकाशे च विरुद्धरससमावेशेन रुचि-मालिन्यं, दीर्घसमासप्रायाप्रसिद्ध शब्दप्रयोगाद्विरलप्रसादतयार्थावबोधदुष्करत्वम्, प्रस्तुताप्रस्तुतयोर्गौरवलाघवविपर्य्यासेनाति-प्रचुरपद्यप्रयोगेनापि रसोद्बोधबाधश्च समुपजायते नाट्यकला-विकाशे समीचकारिणां चेतसि किञ्चिन्मात्रम्। तथाहि प्रथमतः सीतोर्म्मिलाभ्यां सह कुशध्वजस्य विश्वामित्राश्रमपद-गमनं, तत्र च रामेण कौशिकवाक्यादाविर्भूतस्य हरधनुषो भङ्गः, परतो जामदग्न्यस्य जनकान्तःपुरप्रवेशः, मन्थरादेहानुविष्टया शूर्पणखया कृत्रिमकैकेयीलेखेन रामप्रतारणम्, मिथिलायामेव रामराज्याभिषेकोद्योगः, जनकभवनतो रामचन्द्रस्य वनगमनम्, प्रजानां तदानुगत्यम्, सुग्रीवेण सौहार्द्दम्, द्वन्द्वयुद्धे बालिहननम्, सङ्कुलायोधने मेघनादवधश्चेत्यप्रसिद्धवृत्तान्तपरिकल्पनया स्वयं काव्यमुखे च 'प्राचेतसो मुनिवृषा प्रथमः कवीनां यत् पावनं रघुपतेः प्रणिनाय वृत्तम्। भक्तस्य तत्र समरंसत मेऽपि वाच-स्तत् सुप्रसन्नमनसः कृतिनो भजन्ताम् ॥' इति श्लोकेन यत् भगवतो वाल्मीकेः पदपंक्त्यनुसरणमेवाङ्गीकृतं तदपाकान्तं कविना श्रीकण्ठेन। अपि च उत्तररामचरिते एतस्यापि वृत्तान्त-घटितचित्रदर्शनप्रस्तावे चित्रितस्यापि रामस्य यत् 'अनादर-खण्डितशङ्करशरासनः' इति श्लोकेन मिथिलायामेव हरधनुषो-भङ्गप्रक्रमो निर्देशितः, परतश्च 'भवत्वन्यतः [मिथिलावृत्तान्तेतर-प्रदेशालेख्ये] सञ्चारयामि' इत्यनन्तरं 'अयञ्च भगवान् भार्गवः'

ततश्चानतिदूरे 'एते वयमयोध्यां प्राप्ताः' इत्यादि वचसा मिथिलायोध्ययोर्मध्यमार्गे जामदग्न्यस्य सङ्गतिः कथञ्चिदनुमापिता। एवं 'एषा मन्थरा...' 'अये मध्यमाम्बावृत्तान्तोऽन्तरित आर्य्य एव' इत्यादिकथया अयोध्यायामागतस्य रामस्य कतितिथ्यावपचिते कैकेयीवचनेन वनगमनमस्माभिरुपलक्ष्यते। चन्द्रकेतुलवसंवादे च 'यदा कौशलमिन्द्रसूनुनिधने' इत्यादिपद्येन बालिनो गुप्तहननञ्चेति रामायणीकथायाः यथावदङ्गीकृतम्। अत्र तावत् तत्भङ्गेनात्मनो वचनविरोधो बाहुल्येन घटते। एवमपि च नाटकस्य यत् प्रथमेऽङ्के सीतारामयोरूर्मिलालक्ष्मणयोश्च समुत्पन्ने नयनाभिरामे शृङ्गारे ताड़कावृत्तान्तेन भीभत्सभयानकयोरवतारणं, तथा द्वितीये शुद्धान्तःपुरमाविशता भार्गवेणाहूयमानस्य तदन्तिकमनुसर्पतः कल्याणोदर्कस्यापि रामचन्द्रस्य वैदेह्यागमनबाधावतारस्तस्यां तत्कालानुचितशृङ्गाराविर्भावश्च। तथा जामदग्न्यरामयोरुपचीयमाने वीरवृत्ते सहचरीभिः सीतायाः शृङ्गारोद्बोधनमुपारूढ़े च रामस्य कङ्कणमोचनाय गमनं विशेषेण रसस्यापकर्षं जनयति। अप्रस्तुतस्य माल्यवन्मन्त्रणस्यातिविस्तृतिं प्रस्तुतस्यापि लङ्कावृत्तस्य च सङ्कोचनं सर्व्वथैवानुचितमिति सहृदयानां हृदयम्। तथापि नाटकेऽस्मिन् महर्षेर्वाल्मीकेः परिकल्पितानां निखिलादर्शभूतानां रामादिपात्राणां भूयश्चरित्रालोचनावसरे समुदेति स्वत एव भार्गवस्य चरित्रमस्माकं नयनपथे तस्यैव क्षत्रियान्तकृतो वागुपन्यासेन एवमेव जायते प्रत्यभिज्ञा

यदयं मूर्त्तिमानिवाभिमानः समीपमस्माकमवतरति कस्मादप्यज्ञातदेशात्, स एव खलु दानवीर इति श्रूयते जनश्रुतिरपि श्रूयते च महावीरचरितवाक्येषु तदेवेति युद्धवीरश्च प्रतिपादितोऽयं कविना श्रीकण्ठेन, तथा च दानवीरत्वं युद्धवीरत्वञ्च एकीभूय तस्य तथा गर्व्वः प्रतिभासते, यथा गर्व्वसारमिव उपादानलेनोपादाय परिनिर्म्मितोऽयं विधिनेति। प्रथमतः 'भो भोः परिष्कस्याः, क्व रामो दासरथिः ?' इति साधारणैरव कथया तस्य वीराभिमानः बाहुल्येन प्रतीयते। दैवतेजोमयं धनुः धनुर्गुरोर्महादेवस्य रामो बभञ्जेति समाकर्ण्य समधिकाभिमानदृप्तान्तरः श्रीरामचन्द्रमेवाहवेऽवतर्त्तुं समाह्वयति। नैतत् साधारणं वीर्य्यावमर्षणं नाम तदा परशुरामस्तथा चिन्तितवान्, यदहं कार्त्तवीर्य्यविजेता महादेवो मे गुरुः वसुन्धरां क्षत्रियजातिबहुलामपि प्रायो निःशेषितक्षत्रियामेवाकरवम् ममापि नाम गुरोश्चापं कश्चित् क्षत्रियो बभञ्जेति दुःसहमिदं श्रुतिकठोरं नाम तन्नूनमस्य वीर्य्यमहं विध्वंसयिष्ये; तदाभाससंसृष्टवचनञ्च, 'एष मे प्रशमस्य कर्कशः परिणामः,—'यत् क्षत्रियेष्वपि पुनः स्थितमाधिपत्यं तैरेव सम्प्रति धृतानि पुनर्धनूंषि। उन्माद्यताभुजबलेन मयापि कष्टमुच्छृङ्खलानि चरितानि पुनः श्रुतानि॥' 'अन्विष्यतः प्रमथनाय ममापि दर्पादात्मानमर्पयसि जातिविशुद्धसत्त्वः। गन्धाद्विपेन्द्रकलभः करिकुम्भकूटकुट्टाकपाणिकुलिशस्य यथा मृगारेः॥'

इत्यत्र समाप्नोति वादेन लोकोत्तरवीर्य्यवत्ता भार्गवस्य स्फुटत एव प्रतिभाति। लोकोत्तरवीर्य्यशालिनो ममापि यस्त्वमात्मान-मर्पयसि तन्नूनं मरणमेव ते निश्चितमिति मन्यमानस्य शतशः आत्माभिमानरेखैव हृदयमुपास्ते। 'प्रहरणमयचापम्' इत्यादौ 'क्व पुनर्व्वत्स, मया गन्तव्यम् ?' इत्युत्तरेण 'यत्र तातस्य जनकस्य अथवा शान्तं यत्र भगवन्तौ वशिष्ठविश्वामित्रौ' इति रामेणोक्ते परशुरामः—'इदमिदानीमशक्यमनतिक्रमणीयश्च राजनिर्देशः, भगवन्तौ वशिष्ठविश्वामित्रौ, स एष रामः सम्यत्वादचण्डखण्ड-विक्रमः। यस्य प्रतिष्ठितं जैत्रं जामदग्न्येऽपि शासनम्॥' इत्यादि वचसा तस्य सकल एव हृदयभावः शान्तभावेनैव परिस्फुरति। 'ब्राह्मणातिक्रमत्यागो' इत्यादि श्लोके च तस्य चरित्रस्य गभीरता सहक्तैव तेजोभिमानसम्पत्तिर्व्विकाशते। वस्तुतः नाटकेऽस्मिन् श्रीकण्ठपरिकल्पितो भार्गवः यदा यदास्माकं दृष्टिपथवर्त्ती जायेत, तदा तदैव तस्य रौद्रोज्ज्वलं वेशं समीक्ष्य वयं प्रमुग्धाः, यथार्थमिव भार्गवचित्रमाकलय्य मानसमन्दिरमानन्द-धारया जनत्यविरलां प्रीतिं नाट्यसंसदुपगतानां सभ्यानां चेतसीति कृतं रामरामयोः संवादसंवाहिनीपुख्यतमायाः कथायाः विस्ता-रितेन।

—o—

महावीरचरितस्य संक्षिप्तेतिवृत्तम्।

अस्य तावत् प्रथमेऽङ्के—कौशिकाश्रमे सीतोर्म्मिलाभ्यां समागतेन कुशध्वजेन रामलक्ष्मणानुगतस्य विश्वामित्रस्य संवादः,

सीतारामयोर्म्मिलालक्ष्मणयोश्च लोचनप्रीतिः, रावणदूतेन रावणार्थं सीतायाः प्रार्थनम्, रामेण ताड़काहननम्, जृम्भकास्त्राधिगतिः, तदाश्रमे विश्वामित्रवचनेनाविर्भूतस्य हरधनुषो भङ्गः, मुनिना दशरथसमीपे कुमाराणां विवाहवार्त्ताप्रेरणम्, सुबाहुमारीचं निर्ज्जेतुं रामलक्ष्मणयोर्गमनञ्च, विष्कम्भके शूर्पणखया माल्यवतोऽर्थचिन्तनम्, दण्डकायां विराधदनुकबन्धादीनामभिचारनिवारणाय भार्गवसन्देशाधिगतिः, रामविनाशाय जामदग्न्यमुत्तेजितुं गमनञ्च। द्वितीये—राघवान्वेषिणो जामदग्न्यस्य जनकान्तःपुरप्रवेशः, तदागमनसम्भ्रान्तया सखीसमेतया सीतया रामस्य संलापः, तदैव तत्रागतयोर्जनकशतानन्दयोस्तस्य च परशुरामेण संवादः, कङ्कणमोचनाय रामस्यान्तःपुरप्रवेशः, जनकशतानन्दभार्गवाणां वशिष्ठविश्वामित्रान्तिके गमनञ्च। तृतीये—वशिष्ठविश्वामित्राभ्यां जामदग्न्यप्रसादनप्रयासः, सर्व्वथैवाप्रसन्नमसुमभिशप्तुं समुद्यते शतानन्दे दशरथवचनात् वशिष्ठेन तत् प्रशमनम्, जनकदशरथविश्वामित्राणां परशुरामेण सह तर्ज्जितवचनानि, ततः समुपागतेन राघवेणास्यायोधनाय प्रस्थानञ्च। विष्कम्भके—रामस्य भार्गवविजयः, शूर्पणखया सह माल्यवतो रामवधचिन्तनं, तयोः सीताहरणसङ्कल्पः कार्य्योद्धाराय गमनञ्च। चतुर्थे—वशिष्ठविश्वामित्रजनकदशरथानामभिनवविजयसङ्कथा, रामरामयोरन्योन्यापराधक्षमापणम्, मन्थराशरीराविष्टया शूर्पणखया भरतराज्याभिषेकचतुर्द्दशवर्षावधिकरामनिर्व्वासनरूप-

वरद्वयप्रार्थनमयेन कृत्रिमकैकेयीलेखेन प्रतारितस्य रामस्य तदङ्गीकरणम्, रामाभिषेकाय कृतोद्योगो दशरथोऽर्थितो दासरथिना मातृयाचितवरद्वयप्रदानम्, तदुपश्रुत्य तथेत्यनुमन्तारं सत्यसन्धं तातं श्वशुरञ्च शोकसागरे निमज्ज्य भरताय पादुकामर्पयित्वा सीतालक्ष्मणेनानुगतेन रामेण विराधं हन्तुं शृङ्गवेरपुरमभिप्रस्थानञ्च। विष्कम्भके सम्पातिजटायुःसंवादे विराधवधानन्तरं तस्य चित्रकूटात् शरभङ्गाश्रमगतिः, कृताग्निप्रवेशे च शरभङ्गे पञ्चवटीवासः, लक्ष्मणेन शूर्पणखायाः कर्णनासौ कर्त्तनम्, रामेण सानुचराणां खरदूषणत्रिशिरसां हननं, रावणापह्रियमाणां सीतामुद्धर्त्तुं जटायुषोऽभियानम्। पञ्चमे—सीताजटायुः शोक विह्वलयोः रामलक्ष्मणयोः राक्षसवधसंकल्पः, लक्ष्मणनिहतस्य दनुकबन्धस्य दिव्यलोकप्राप्तिः, श्रमणाहस्तेन रामस्य विभीषणलेखप्राप्तिः, ऋष्यमुखाभियानं, पादेन दुन्दुभिदैत्यास्थिसञ्चयक्षेपः, बालिबधः, तद्वचनेन विभीषणसुग्रीवयोः सख्यलाभश्च, विष्कम्भके—माल्यवत्समीपागतया त्रिजटया हनुमत्कृतलङ्कादाहाक्षबधसीताभिज्ञानाहरणवृत्तान्तकथनम्। षष्ठे—मन्दोदर्या रावणाय सागरबन्धाद्यभियोगावेदनम्, रामेण लङ्कावरोधः, अङ्गदप्रेषणम्, रावणस्य युद्धनिर्य्याणम्, प्रबुद्धरामलक्ष्मणयोः प्रबोधनाय हनुमतो द्रोणशैलानयनम्, कुम्भकर्णमेघनादरावणादिवधवृत्तान्तकथनञ्च, नेपथ्योक्त्या विभीषणराज्याभिषेकः, सीताग्निशुद्धिः, रामस्य पुष्पकाधिगतिश्च। सप्तमे—रामनिदेशेन सर्व्वबन्धमोक्षः, पुष्पकेण-

योध्यायात्रा, लङ्कातोऽयोध्यान्तर्वर्त्तिपथकीर्त्तनं, भरतशत्रुघ्नयोः समागतिः, रामस्य राज्याभिषेकश्च ।

महावीरचरितस्य नायकादिसिद्धान्तः ।

अत्र नायकोरामचन्द्रो धीरोदात्तः, प्रतिनायको रावणश्चालम्बनम्, नायिका सीता स्वकीया मुग्धा नायकश्चानुकूलोऽसौ च शृङ्गारालम्बनम्, परस्परतर्ज्जितवाक्यादीनि उद्दीपनानि, साटोपपरिक्रमणभ्रूकुट्यादयोऽनुभावाः, उत्साहः स्थायी, युद्धवीररसोऽङ्गीः, शृङ्गारकरुणबीभत्सरौद्रादयोऽङ्गरसाः, लक्ष्मणसुग्रीवौ पीठमर्द्दसहायौ, रीतिर्गौड़ी, ओजोनाम गुणः, प्रस्तावना प्रयोगातिशयरूपा, दूतौ राक्षसाङ्गदौ सन्देशहारकौ इति ।

भट्टिकाव्यस्य समालोचनम् ।

सन्ति तावत् यावन्ति महाकाव्यानि तेषु भट्टिकाव्यम् उत रावणबधाख्यमपरं नाम महाकाव्यं विशेषेणोहे स्वयोग्यम्। प्रथमतोऽस्य कवयितुर्नामनिश्चये वर्त्तते च महत्येव विप्रतिपत्तिः सभ्यानाम् । केऽपि भट्टि, भट्टो, भट्टपादा इति, तथान्ये स्वामिभट्टो भर्त्तहरिरिति च नाम्ना विशेषयन्ति । पदवाक्यप्रमाणपारावारे

णेन नारायणभट्टेन तस्य भट्टिबोधिनीटीकायां कवयिता भर्त्तृहरिरिति नाम्नाभिहितः। विद्याविनोदाचार्य्येण तथैवाङ्गीकृतम्। वैजयन्तीटीकायां कन्दर्पचक्रवर्त्तिना तथा मुग्धबोधिनीटीका-निर्म्माता भरतमल्लिकेनापि उल्लिखिते एवास्मिन् नाम्नि स्वमतमवतारितम्। सूरिणा मल्लिनाथेन स्वरचितायां सर्व्वपथिनाख्यायां टीकायां कवेस्तथैव नाम प्रतिपादितम्। जयमङ्गलस्यापि मल्लिनाथमत एवानुप्रवेशोऽस्माभिः परिलक्ष्यते। नितरां भट्टिकाव्य-निर्म्मातुः भर्त्तृहरिरिति नाम निःसंशयमेवानुमितुं शक्यते। एवमपि च प्रत्यायन्ति पुरातत्त्वविशेषज्ञाः, यथा रामनाथयदुनाथ इति नाम्नः रामो यदुरिति संक्षेपेण लोकव्यवहारोऽस्माभि-रुपलभ्यते। तथा भर्त्तृहरिरित्यखण्डनाम्नः 'भर्त्तृ' इति तात्-कालिकलौकिकाख्यानं सम्भवतितराम्। ततः क्रमेण 'भर्त्तृ' इति संस्कृतनामांशस्य प्राकृते परिणतिमेत्य भट्टिरिति नाम संवृत्तम्। यथा 'भर्त्ता' इत्यस्य प्राकृते भट्टेति। वयमतोदासीनाः प्राचीन-तत्त्वसंग्रहीतार एव प्रमाणम्। केचन विद्वांसः विक्रमार्कस्य भिन्नोदर्य्यत्वेन प्रथितयशसो वैराग्यशतकादिदिव्यभावपूर्णग्रन्थ-प्रणेतुर्भर्त्तृहरेः कर्त्तृत्वमस्मिन्नारोपयन्ति, किन्तु तन्न समीचीनं वक्तुमुत्सहामहे, यतो ग्रन्थस्यास्य अन्तिमश्लोकात् कवयितुः परदेशवासित्वं परान्नभोजित्वञ्च स्फुटत एव प्रतिभाति। तथाविध-राजचक्रवर्त्तिनः सोदरस्य परदेशवासित्वं परान्नजीवित्वञ्च सर्व्वथैवानुपयुक्तमेवास्माकं हृदयम्। तथा च—'काव्यमिदं विहितं

मया वलभ्यां श्रीधरसेन [सूनु-] नरेन्द्रपालितायाम्। कीर्त्तिरतोभवतान्नृपस्य तस्य प्रेमकरः चितिपो यतः प्रजानाम् ॥' इति

अपरस्य श्रीधरसूनोर्भर्त्तृहरेः सम्बन्धिनी वर्त्तते काचित् किंवदन्ती, सम्भवति स एवैतद्ग्रन्थप्रणेता भर्त्तृहरिरिति सहृदयानां सहृदयम्। तथा च जनप्रवादः,—श्रीधरपत्नी प्रसववेदनया दंदह्यमाना बालं भर्त्तृहरिं प्रसूय पञ्चत्वमाससाद। तेन श्रीधरस्वामी परमनिर्व्वेदमासाद्य संसारस्यासारतामनुभूय सन्न्यासमार्गमुपस्थातुमुपचक्रमे, किन्तु जातवैराग्योऽपि अपत्यस्नेहरससंसिक्तहृदयो जनकस्तथाविधं सद्योजातबालं त्यक्तुं सर्व्वथैव नाशकदिति श्रीधरः समन्तात् सङ्कल्पबाधां समीक्ष्य पर्य्याकुलोऽभवत्। दैवगत्या अत्रान्तरे तस्य उटजोपरिष्टात् ज्येष्ठोडिम्ब एकः भूमौ पतित्वा विदीर्णः संवृत्तः। तस्माच्च क्षुद्रः ज्येष्ठीशिशुर्व्वहिरागत्य दूरस्थां मक्षिकामेकां संगृह्य स्वोदरपूर्त्तिं चकार। तत् समीक्ष्य श्रीधरस्य सहसैव दिव्यज्ञानमभवत्—'आहारोऽपि मनुष्याणां जन्मना सह जायते' इत्यालोच्य बालकं विहाय गृहतो बहिरगात्। समनन्तरञ्च वलभीपतिः श्रीधरसेनो लोकपरम्परया विदितवृत्तः सद्योजातं बालमानीय कस्यैचित् धात्र्यै समर्पयत्। ततश्च समतीते बहुदिवसे स एव पितृत्यक्तो बालः भर्त्तृहरिरिति नाम्ना विदूषामग्रणीः समभवत्। अन्तरञ्च तस्य गुणविमुग्धो वलभीपतिः आत्मजानां शिक्षार्थं तमेव सुरगुरुकल्पं भर्त्तृहरिं निर्दिश्य तान् समर्पितवान्। ततश्चैकदा व्याकरणमध्यापयति भर्त्तृहरौ तं

छात्रानपि अन्तरा हेलया गच्छन्तं कमपि यूथपतिं समवलोक्य अन्तेवासिनो राजपुत्राः वेदाङ्गव्याकरणस्य वर्षमेकं पाठवाधां परिगणय्य नितान्तोद्विग्नाः बभूवुः। अथ तेषामनध्यायवर्षेऽपि येन शब्दशास्त्रपाठफलं भवेत्, तदुपयुक्तं व्याकरणबहुसूत्र-स्मारकमपूर्वं महाकाव्यमिदं विरच्य राजपुत्राणां व्याकरण-पाठफलभनायेति व्याकरणात्मकस्य काव्यस्य प्रणयने बीजम्। एवंविधं प्रवादवाक्यं यद्यपि च साकल्येन न विश्वसनीयं विपश्चिद्भिस्म्, तथापि वक्तुमुत्सहामहे, यत् 'नह्यमूला जनश्रुतिः' इति शिष्टवाक्यात्, प्रवादवाक्यस्यांशविशेषे यत्र कुत्राप्यस्ति घटनायाः मूलमिति, यातु प्रवादवादः, न समुपलभामहे भीमक-कविविरचितं रावणार्जुनीयं नाम महाकाव्यमृते एवंविधं व्याकरणानुशासनप्रपञ्चकं काव्यमस्यत्रजगति। कृतं तदा-लोचनया, बहुप्रामाणिकानां ग्रन्थानां सन्दर्भेषु भट्टिरित्यभिधान-मेवास्माभिरुपलभ्यते, नितरां रावणवधकाव्यनिर्मातुर्भर्तृहरेरप-पराख्यानं भट्टिरिति कल्पनं नासङ्गतमेव। यथा च भारविकृत-किरातार्जुनीयकाव्यस्य भारविः, माघनिर्मितशिशुपालवधस्य च माघ इति नाम, तथास्य कवयितुरिति विनिर्देशे न क्वापि हानिरपि वा दोष इति, तथा च महाकाव्यलक्षणे 'कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा' इत्युक्तेः कविनामानुसारेणापि महाकाव्यस्य नामकरणं नासङ्गतमेव। कविसमयस्तु प्राचीन-तत्त्वसंग्रहीतृभिः एवमेवाभिहितम्, यत् खीष्टीयषष्ठशताब्द्याः

शेषभागे राज्ञः श्रीधरसेनस्योत्पत्तिकालः, तस्य सभासदः कवयितुरपि प्रादुर्भावः स एव समय इति । एतदेव काव्यं रामायणीकथामवलम्ब्य श्रीरामचन्द्रस्य चरित्रवर्णनमिषेण गुरु-कठोरमपि शब्दानुशासनं शास्त्रं सरसयति अनन्यगुणसम्पन्नः कविवरः । अपि च कण्ठस्थकरणाय यान्यपि दुःखावहानि व्याकरणानुशासनानि तानि च सुमधुरकवितारचनया शिशोः प्रथमोच्चरिता वागिव प्रीणयन्ति श्रवणयुग्मम् । तथा श्लोकोऽप-निबन्धनेन पाणिनीयसूत्रप्रपञ्चनमेवास्य विरचने कवेरुद्देश्यमिति विभाव्योदाहरणकाव्यमिति नाम्नैव निरदिशत् श्रीमन्महामहो-पाध्यायः कोलाचलः सूरिसत्तमो मल्लिनाथः । काव्यस्यैतस्य तावत् प्रथमतः प्रकीर्णकाण्डं, अधिकारकाण्डं, प्रसन्नकाण्डम्, तिङन्तकाण्डञ्चेति चतुर्धा विभज्य संपूर्णं नीतं तत्रभवता निखिलशास्त्रार्थकुशलिना भट्टिकविना । तेषु च व्यामिश्ररूपं सामान्यविशेषकार्य्यप्रदर्शकं तिङन्तकाण्डमादित आपञ्चमसर्गम्, तथा पाणिनीयाष्टकान्तर्गताधिकारसूत्रानुसारतः षत्वणत्वगुण-वृद्ध्यागमपरिव्यापकप्रपञ्चनिर्देशकमधिकारकाण्डं चतुःसर्गव्यापि षष्ठसर्गात् नवमसर्गं यावत् । गुणालङ्कारसमलङ्कृतं प्रसन्नकाण्डं सर्गचतुष्टयात्मकं दशमात् त्रयोदशसर्गपर्य्यन्तम्, लटप्रकरणादि नवलकाररूपप्रदर्शकस्य तिङन्तकाण्डस्याधिकारस्तावत् चतुर्दश-सर्गतो द्वाविंशतिसर्गान्तम् । काव्येऽस्मिन् शुद्धव्याकरणो-दाहरणतया स्थानेषु श्रुतिकठोरमपि पदं समुपन्यसितुं समीहते

कविकुलविभाकरः श्रीमान् भट्टिनामा। न चेत् काव्यजगति ये खलु आप्यायन्ते प्रथितयशसः दिगन्तोद्भाषितारः काव्यसुधा-धारया श्रवणमूलं, तेभ्यः कवयितुः स्थानं न निम्नस्तरेऽभवत्। एतदेव काव्यं यद्यपि कवित्वसौन्दर्य्यविकाशाय पदकदम्बं समुपादधत्, तर्हि कालिदासादिकवयितॄणां सन्दर्भेभ्यो निम्नासनं नाध्यकरिष्यत्। अत्र तावत् शरद्वर्णन-प्रभातवर्णना-दिषु बहुषु स्थलेषु अनन्यसुलभान् कविगुणान् बाहुल्येन समुपलभामहे। एतदुपयोगमाश्रित्य कविना स्वयमुक्तम्,— 'दीपतुल्यप्रबन्धोऽयं शब्दलक्षणचक्षुषाम्। हस्तामर्ष इवान्धानां भवेत् व्याकरणादृते॥' इति, वस्तुतः व्याकरणशिक्षाविषये काव्यमेतद्यथा उपयोगमर्हति, तथाविधं पर्य्याप्तशिक्षणीयं सारस्वतभाण्डारे द्वितीयं नास्तीति कृतं बहुभाषणेन।

भट्टिकाव्यस्य संक्षिप्तेतिवृत्तम्।

प्रथमे सर्गे—राज्ञः दशरथस्य गुणादिवर्णनम्, सन्तानहीन-तया तेन पुत्रेष्टिकरणाय ऋषेः ऋष्यशृङ्गस्यानयनम्। अथ तेना-नुष्ठितायां पुत्रेष्टौ हुतोच्छिष्टभक्षणेन कौशल्यायां रामस्य, कैकय्यां भरतस्य, सुमित्रायां यमजयोर्लक्ष्मणशत्रुघ्नयोश्च चतुर्णां पुत्राणां

जन्म। तेषां दशरथेन जातकर्म्मादि समापनं, रामादीनां निखिलशस्त्रशास्त्रविद्याशिक्षणं, ऋषिणा विश्वामित्रेण दशरथाय रामलक्ष्मणयोः प्रार्थना, पुत्रविरहदुःखमसहिष्णुनापि ऋषिशापभयेन दशरथेन तयोरर्पणम्, रामलक्ष्मणयोः ऋषेरनुगमनम्। द्वितीये—विश्वामित्रानुगच्छतोः रामलक्ष्मणयोः पथि शरदादि ऋतुसम्पद्दर्शनं, ततः रामलक्ष्मणाभ्यां विश्वामित्रतः जयाविजययोः विद्ययोः प्राप्तिः, रामेण तारकानिधनं, तापसयज्ञविघ्नकारिणां मारीचादिनिशाचराणां दूरीकरणेन आश्रमपदस्य निर्व्विघ्नीकरणं, विश्वामित्रेण रामलक्ष्मणयोः जनकयज्ञभूमिप्रापणं, तत्र रामस्य हरधनुर्भञ्जनं, दशरथस्य मिथिलागमनं, जनकेन रामादिचतुर्भ्यः कुमारेभ्यः सीतोर्म्मिलादिकन्याचतुष्टयस्य दानं, ततः कृतविवाहानां रामादीनां अयोध्यां प्रति गमनमार्गे हरधनुर्भङ्गजातामर्षेण जामदग्न्येन युद्धाय रामस्य आह्वानं, गणितप्रमादेन दशरथेन परशुरामस्य स्तुतिः, तयाप्यनपनीतोद्धतभावस्य परशुरामस्य रामेण धनुषः तेजसश्च समाकर्षणं, रामेण परशुरामस्य तेन धनुषा स्वर्गपथावरोधनं, रामादीनामयोध्यागमनञ्च। तृतीये—विहिततनयविवाहमहोत्सवस्य दशरथस्य रामाभिषेकार्थं तत्कार्य्यकुशलाननुचरान् नियोगविज्ञतमान् पुरुषान् प्रति निदेशः, तैश्च सपादपीठमणिरत्नादिखचितसिंहासनस्य रचनम्, तीर्थसलिलादिद्रव्याणामप्यानयनं च। मन्थरामन्त्रणप्रणोदितया कैकेय्या

दशरथाय रामस्य वनगमनं, भरतस्य राज्याभिषेचनमिति वरद्वयस्य प्रार्थना, सत्यभङ्गभयेन राज्ञा रामस्य वनप्रेषणं, सीता-लक्ष्मणाभ्यां रामानुगमनञ्च, तद्विरहेण राज्ञः मरणं, मातुलालया-दागतेन भरतेन मातुः कैकेय्याः भर्त्सनम्। राज्ञश्चान्त्येष्टि-सम्पादनम्, राममानेतुं वनगमनं, विनयेनाप्यनागतस्य रामस्य पादुकां सिंहासने संस्थाप्य प्रजायाः अनुपालनम्। चतुर्थे—भरते प्रतिनिवृत्ते लक्ष्मणेन सीतया च सह रामस्य अत्रेस्तपोवनगमनं, तत्रत्यैर्मुनिभिः कृतसत्कृतस्य रामस्य दण्डकारण्यगमनं, तत्र रामेण विराधाभिधेयस्य निशाचरस्य हननं, ततो रामस्य शरभङ्गाश्रमगमनं, मुनेः शरभङ्गस्य प्रज्व-लितहुतवहे आत्मदानं, ततः सुतीक्ष्णाश्रमपदं गत्वा रामस्य पर्णकुटीरनिवासः, तत्र ब्राह्मणानर्च्चयतस्तस्य विविधकार्य्यालो-चनया कियत् कालातिक्रमणं, ततश्च (सू) शूर्पणखया रामसमीपे आगमनं, तया कृतदारं रामं विज्ञाय लक्ष्मणान्ते गमनं, लक्ष्मणेन तस्याः पुनः रामसमीपप्रेषणं, रामेणापि च भूयस्तस्याः लक्ष्मणा-न्तिके प्रेरणं, लक्ष्मणेन च तस्या नाशाकर्णयोः च्छेदनं, सूर्पणखया रावणादीनां बलस्पर्धनं, जन्मान्तरे एतत् फलं प्राप्स्य-सीति तर्ज्जनञ्च रामलक्ष्मणाभ्यां खरदूषणयोः चतुर्दशसहस्र-संख्यकैः निशाचरसैन्यैः सह समरावतरणं, तद्युद्धे रामेण त्रिशिरसो निशाचरस्य मस्तकत्रयकृन्तनं पर्वतमिव निपतितं त्रिशिरसं दृष्ट्वावशिष्टानां राक्षसानां भीतिः। पञ्चमे—रामलक्ष्म-

ताभ्यां खरदूषणयोः निधनम्, सूर्पणखया रावणाय खरदूषण-वधवृत्तान्तस्य कथनं, सीतायाः रूपवर्णनञ्च, तदुत्तरे रावणेन सूर्पणखायाः समाश्वासनं, मारीचसमीपगमनञ्च, मारीचेन रावणायोपदेशः, रावणेन मारीचस्य भर्त्सनं, मारीचेन माया-मृगरूपधारणं, रामेण सीतावाक्यात् मायामृगानुगमनं, माया-मृगहननञ्च; मायामृगस्य गुरुगम्भीरशब्दभीतया सीतया लक्ष्मणस्य रामान्तिके प्रेषणं, रावणेन सीतारूपप्रशंसा, सीतया रावणाय रामगुणकीर्त्तनं, रावणेन रामनिन्दा, सीताप्रलोभनं, सीता-हरणञ्च, जटायुषा विमानपथे रावणभर्त्सनं, तेन सह युद्धाव-तरणं, रावणेन जटायुषः पक्षकर्त्तनं, छिन्नपक्षस्य तस्य भूमौ पतनञ्च। षष्ठे रामेण लक्ष्मणं प्रति सीतायाः कुशलप्रश्नः, सीतार्थं परिदेवनं, जटायुषः सन्दर्शनञ्च, तस्माच्च रामस्य सीताहरण-वृत्तान्तावगतिः, जटायुषो मृत्युः, रामलक्ष्मणाभ्यां तस्य अग्नि-सत्कारः, उदकाञ्जलिदानञ्च, रामलक्ष्मणाभ्यां कबन्धस्य बाहु-कर्त्तनं, रामस्य कबन्धाय प्रश्नः, तदुत्तरे कबन्धस्य आत्मवृत्तान्त-कथनं, सुग्रीवेण सह सख्यं कर्त्तुं रामाय उपदेशदानं; कब-न्धस्य स्वर्गप्राप्तिः, रामलक्ष्मणयोः शवरीसमीपगमनं, शवरी-स्वरूपस्य कीर्त्तनं, तां प्रति कुशलप्रश्नश्च, शवर्य्या रामलक्ष्मणयोः मधुपर्कादिरर्च्चना, ताभ्यां स्वमङ्गलाख्यापनं; शवर्य्यास्तिरोधानं, रामलक्ष्मणयोः पम्पायां वासः, तस्याः स्वरूपवर्णनं, राम-लक्ष्मणयोः ऋष्यमुखाद्रिगमनं, तयोः समीपे सुग्रीवेण हनूमतः

प्रेषणं, मारुतेः भिक्षुकवेशेन रामलक्ष्मणयोः समीपागमनं, तेन ऋष्यमूकगिरेः दुर्गमत्वादिस्वरूपस्य वर्णनं, रामलक्ष्मभ्यां स्वपरिचयस्य श्रवणञ्च, तेन सुग्रीवस्य सौख्यप्रार्थना च, रामस्य सुग्रीवेण सह सौख्यं, सुग्रीवेण रामसमीपे कपिराजबालिपराक्रमस्य ख्यापनं, बालिसुग्रीवयोः द्वन्द्वयुद्धे बालितः सुग्रीवस्य पराभवः, रामेण सुग्रीवस्य माल्येन चिह्नीकरणं, पुनस्तयोः द्वन्द्वयुद्धावतरणं, रामशरेण बालेः पतनं, बालिना रामस्य भर्त्सनं, बालिना स्वपुत्राङ्गदस्य रामायार्पणं, भ्रात्रे सुग्रीवाय तस्य उपदेशदानं, ततो मरणञ्च,सुग्रीवेण बालेरौर्द्धदेहिकक्रियासम्पादनं, किष्किन्ध्यागमनञ्च। सप्तमे—वर्षावर्णनं, मेघोदयात् रामस्य विलापः, वर्षासमनन्तरञ्च शरदागमे रामस्य उत्कण्ठा, रामवाक्येन लक्ष्मणस्य कपिसमीपगमनं, सुग्रीववाक्येन तावतां कपीसेनानां समागमः, कपिसेनाः प्रति सुग्रीवस्य उपदेशः, सुग्रीवेण शतवलिनामधेयस्य कपेः दीगुच्यां, सुसेनस्य प्रतीच्यां, कोटिसंख्यककपिसेनापरिवृतस्य विनतसंज्ञकस्य प्राच्यां प्रेषणं, कपिसैन्यानां कस्यांचित् गिरिगुहायां मेरुसावर्णिदनुजस्य कन्यया सयंप्रभया सह साक्षात्कारः, विफलमनोरथस्य अङ्गदस्य तथा जाम्बुवतो हनूमतश्चापि प्रायोपवेशनं, तेषामन्तिके कस्यचित् पतत्रिणः आगमनं, तं समीक्ष्य कपीनामुत्कण्ठा, जटायुषो भ्राता इत्यवगम्य तेषामुत्कण्ठात्यागः, पक्षिणा तेभ्यः उपदेशप्रदानं,लङ्कास्वरूपवर्णनञ्च,पक्षिवाक्येन वानराणां महेन्द्र-

शैलं प्रति गमनं, तस्मात्तेषां समुद्रदर्शनं, समुद्रवर्णनञ्च। अष्टमे—हनूमता सागरस्य लंघनं, पथि तस्य कस्याश्चित् राक्षस्याः वदने प्रवेशः, तस्याः जठरं विदार्य निर्गमणं, हनूमता मैनाकस्य सन्दर्शनं, मैनाकेन हनूमतः तत्रावस्थानाय प्रार्थना, मैनाकं प्रति हनूमतः उक्तिः, तस्मादाकाशवर्त्मना गच्छतस्तस्य बलमवगन्तुं कयाचिज्जलविहारिण्या राक्षस्या शतयोजनमुखव्यादनं, तस्याः जठरे प्रविष्टस्य हनूमतस्तदज्ञातेन निर्गमणं, ततः समुद्रकूलमवतरतस्तस्य दिवसे आत्मगोपनार्थं शशवत् क्षुद्ररूपधारणं, रात्रौ स्वकार्य्याय लङ्कां प्रति गमनं, तत्र परस्परं जल्पतां निशाचराणां मुखेन रावणगुणसमाकर्णनं, लङ्काया अवस्थासन्दर्शनं, रावणावलोकनञ्च, प्राकाराधिगतेन नानाचिन्तयता हनूमता अशोकवनस्य सन्दर्शनं तत्र गमनञ्च, तस्मिन् मारुतिना निखिलविषादावासरूपायाः सीतायाः दर्शनं, तदैव रावणस्य तत्रागमनं, कामाभिभूतेन रावणेन सीतायाः अनुनयः, प्रलोभनवचनस्य ख्यापनञ्च, तदुत्तरे सीतया राक्षसपतेः भर्त्सनं, तदुत्तरेऽपि रावणेन सीतयाः तर्ज्जनं, गृहं प्रति गच्छता तेन सीतायाः भयार्थं क्रूरदर्शनानां राक्षसीनां नियोगः, ताभिः सीतायाः तर्ज्जनं, तदवसरे तत्र त्रिजटायाः उपस्थितिः, त्रिजटायाः गुरुकठोरवाक्येन राक्षसीनां स्वस्वशय्यापरिग्रहः, मारुतिना सीतायै रामकिङ्करत्वस्य ज्ञापनं, रामलक्ष्मणवृत्तान्तस्य कीर्त्तनञ्च, तेनैव वैदेह्याः समाश्वासनं तया च रामाभिज्ञानार्थं हनूमतः स्वीयचूड़ा-

मणेः प्रदानं, हनूमता अशोकवनस्य 'भञ्जनं'। नवमे—राक्ष-सीभिः रावणाय अशोकवनभञ्जनवृत्तान्तस्य निवेदनं,मारुतिविना-शार्थं रावणस्य अशीतिसहस्रकिंकरान् प्रति निदेशः,राक्षससैन्यैः सह हनूमतो युद्धं, हनूमतः तेषां पराभवः, निर्जितैः सैन्यै राव-णाय युद्धपराभववृत्तान्तस्य कथनं, पुनः रावणेन युद्धाय सैन्यानां प्रेरणं, पराभूतेषु तेषु भूयः रावणेन स्वतनयस्य अक्षस्य प्रेरणं, अक्षेण सह हनूमतो युद्धं, हनूमता परिघप्रहारेण अक्षस्य भूमौ पतनं, पुनः हनूमता अशोकवनस्य पीड़नं, मारुते-र्विनाशाय रावणेन इन्द्रजितः प्रेषणं, इन्द्रजितः हनूमता सह युद्धं, इन्द्रजिता ब्रह्मास्त्रेण हनूमतो बन्धनं, राक्षससेनाभिः राक्षसाधिपस्य समीपं हनूमतः आनयनं, रावणं प्रति विभी-षणस्य उक्तिः, विभीषणं प्रति रावणस्यापि प्रत्युक्तिः, रावणं प्रति हनूमतः उक्तिः, हनूमन्तं प्रति रावणस्य च प्रत्युक्तिः, रावणेन रामनिन्दाप्रकटनं तदुत्तरे हनूमता रामप्रशंसायाः कीर्त्तनं। दशमे—वल्कलवस्त्राद्यैः परिवेष्टितस्य प्रज्वलतो लाङ्गूलस्य खमुत्पतितस्य हनूमतो राक्षसैरवलोकनं, हनूमता लङ्कायाः दाहः, चतुर्दिक्षु पलायमानैराक्षसैर्विह्वलतायाः अभि-व्यक्तिः, सीतासन्दर्शनार्थं हनूमतोऽशोकवनगमनं, हनूमता वनाभ्यन्तरे तरुमूलाधिशयानायाः सीतायाः अवलोकनं,इदानीं माल्यवति गिरौ श्रीरामसमीपं गमिष्यामीति तस्याः कथनञ्च, पर्वताभिमुखं गच्छन्तं तं समीक्ष्य वानराणां मुहुर्मुहुः मूर्च्छा,

हनूमता वदरिकाश्रमस्थस्य सानुजरामस्य समीपे उपस्थितिः, रामेण मैथिल्यभिज्ञानस्य दर्शनं, मारुतिना सीतावस्थायाः कीर्त्तनं, अङ्गदपृष्ठावरूढ़योः रामलक्ष्मणयोः महेन्द्राचले गमनं, महेन्द्राचलवर्णनं, महेन्द्राचलतः वानरसैन्यानां सागरतीर-गमनं, प्रसङ्गतः सागरवर्णनं, रामविरहवर्णनञ्च, रामं प्रति लक्ष्मणस्य उक्तिः। एकादशे—प्रसङ्गतः चन्द्रास्तादिविविधविषय-वर्णनं, ब्रह्मराक्षसादिक्रूरराक्षसपरिवृतस्य दशाननस्य सभा-प्रवेशः। द्वादशे—जागरितं कृतदेवकार्य्यं विभीषणं प्रति तस्य मातुरुपदेशः, विभीषणस्य रावणसंसदि गमनं, दशाननेन सभासदं प्रति स्वकर्त्तव्यस्य जिज्ञासा, स्वस्वायुधस्पृष्टानां प्रहस्त-प्रमुखराक्षसानां दशाननं प्रति उक्तिः, तैरात्मबलस्य स्पर्द्धनं, विभीषणस्य तान् प्रति उक्तिः,युद्धनीतिकथायाः कथनं। सीता-प्रत्यर्पणार्थमुपदेशदानं, नानानीतिकथाकथनञ्च, दशाननस्य-मातामहस्य माल्यवतः विभीषणवाक्ये अनुमोदनं, रावणं प्रति उपदेशदानञ्च, माल्यवतो विभीषणस्य च वाक्येन जागरितस्य निन्द्राविलसचक्षुषः कुम्भकर्णस्य रावणं प्रति उपदेशः, पुनस्तस्य निन्द्रा, विभीषणेन च रावणं प्रति राष्ट्राणां नानादुर्लक्षणस्य विवृतिः, रावणेन कठोरोक्त्या विभीषणस्य भर्त्सनं चरणाभि-ताड़नञ्च, विभीषणस्य तस्मात् रामान्तिकगमनं, हनूमद्वाक्येन विभीषणस्य सुचरितं ज्ञात्वा रामेण तस्य लङ्काधिपत्ये नियो-जनम्। त्रयोदशे—रात्रिप्रभाते रामवाणाघातेन समुद्रस्य

शुष्कत्वं, पलयः गङ्गायाः हस्तधारणपुरःसरस्य समुद्रस्य रामचरणे प्रणतिः, रामं प्रति बहुभाषणञ्च, वानरसैन्यैः वारिधेर्बन्धनं, तेषां लङ्कातोरणद्वारगमनञ्च, रावणशक्तिमवगन्तुं रामसैन्यानां प्राकारतरुमञ्चाद्यारोहणम्। चतुर्दशे—स्मरविह्वलात्मना रावणेन सीतायै राममायामुण्डं सन्दर्श्यात्मसैन्यानां प्रेषणं, रावणाज्ञया प्रहस्तस्य पूर्व्वद्वारि महापार्श्वस्य महोदरस्य च दक्षिणद्वारि, इन्द्रजितः पश्चिमद्वारि गमनं, स्वस्य च उत्तरद्वारि विरूपाक्षस्य पुरमध्ये अवस्थितिः, रामस्य लक्ष्मणं सैन्यं प्रति च युद्धाज्ञा, उभयोः पक्षयोः युद्धावतरणं, इन्द्रजितः नागास्त्रेण रामलक्ष्मणयोः मूर्च्छा, सुग्रीवादिसेनानायकानां क्रन्दनं, सुग्रीवस्य पर्व्वताधिक्षेपेण इन्द्रजितः पितुरन्तिके पलायनं, रावणाज्ञया राक्षसैः सीतां पुष्पके अवस्थाप्य मूर्च्छितयोः रामलक्ष्मणयोः तस्यै सन्दर्शनं, तस्मात् सीतायाः विलापः, मुहुर्मुहुर्मूर्च्छा च, रावणभगिन्या त्रिजटया सीतायाः सान्त्वनं, अपगतमोहस्य रामस्य मूर्च्छितं लक्ष्मणं दृष्ट्वा शोकः, तेन परलोकं गन्तुं सुग्रीवस्य आमन्त्रणं, सुग्रीवस्य रामलक्ष्मणौ किष्किन्ध्यायां नेतुं अङ्गदं प्रति आदेशः, तस्य राक्षसबधे प्रतिज्ञा च; विभीषणोपदिष्टेन रामेण गरुड़स्य स्मरणं, समुपागते गरुड़े नागानां वारिधौ निमज्जनं, लक्ष्मणस्य मूर्च्छापगमः, रावणादिष्टस्य धूम्राक्षस्य तथा अकम्पस्य च पर्य्यायेण युद्धे गमनं, हनूमता तयोः निधनञ्च, रणागतस्य प्रहस्तस्य नीलेन कपिना निधनं। पञ्चदशे—

रावणेन कुम्भकर्णनिद्राभङ्गाय चरस्य नियोगः, तैश्च विविधोपायैः तस्य निद्रातः प्रबोधनाय चेष्टा, स्वयमेव तस्य च जागरणं, रावणेन कुम्भकर्णाय तावतः युद्धवृत्तस्य कीर्त्तनं, तदुत्तरे कुम्भकर्णस्य उपदेशोक्तिः, तस्य युद्धयात्रा, युद्धे वानरसैन्यानां छत्रभङ्गः, अङ्गदवाक्येन पुनस्तेषां मिलनं, कुम्भकर्णं प्रति वानरसैन्यैः शिलादिर्वर्षणं, कुम्भकर्णगृहीतगिरिप्रहारेण सुग्रीवस्य मूर्च्छा, कुम्भकर्णगृहीतसुग्रीवेण संज्ञां प्राप्य कुम्भकर्णस्य नासाकर्णयोः कर्त्तनं, रामेण कुम्भकर्णस्य निधनं, अतिकायत्रिशिरसादीनां रावणपुत्रानां युद्धे गमनं लक्ष्मणेन अतिकायस्य निधनं, इन्द्रजितः शरेण रामलक्ष्मणादीनां मूर्च्छा, महौषधिसमानेतुं विभीषणेन हनूमतः प्रेषणं, औषधिनिरूपयितुमशक्तेन हनूमता पर्वतस्यानयनं, औषधीनां घ्राणेन सर्व्वेषामेव मोहितानां मूर्च्छाभङ्गः, अङ्गदेन अकम्पनस्य कम्पनस्य च हननं, सुग्रीवेण कुम्भकर्णपुत्रस्य कुम्भस्य संहारः, निकुम्भस्य च ग्रीवाकर्षणम्, विजयेन कपिसैन्यानां हर्षः। षोड़शे—अतिकायादीनां निधने दशाननस्य खेदः इन्द्रजिता रावणस्य प्रबोधनं। सप्तदशे—इन्द्रजितः युद्धायोद्योगः, युद्धे गमनञ्च, आकाशगतेन इन्द्रजिता मायामय्याः सीतायाः विनाशायोद्योगः, हनूमता तस्य निवारणम्, इन्द्रजिता तस्याः निधनञ्च, हनूमतः सीतानिधनवृत्तावगतयोः रामलक्ष्मणयोः मोहः, विभीषणवाक्येन तयोः धैर्य्यं, निकुम्भिलायज्ञागारे लक्ष्मणविभीषणयोः प्रवेशश्च, विभीषणं प्रति इन्द्र-

जित: उक्ति:, इन्द्रजितं प्रति विभीषणस्य प्रत्युक्ति:, लक्ष्मणेन इन्द्रजित: निधनं, तन्निधनवार्त्ताश्रवणेन रावणस्य सीतां हन्तुमुद्योग:, मित्रादीनां वचनेन तस्मान्निवर्त्तस्य युद्धायोद्योग:, रावणेन लक्ष्मणस्य निधनं, हनूमदानीतस्यौषधे: स्पर्शेन तस्य पुनर्जीवनलाभ:, रामास्त्रमोहितेन रावणेन सह तस्य सारथे: पलायनं, रावणेन सारथिभर्त्सनं, पुनस्तस्य युद्धाय आगमनञ्च, रावणेन मायया बहुस्वमस्तकस्य प्रणयनं, रामेण तेषां कृन्तनं, पुन: पुन: रावणशिरसामुत्भव:, मातलिवाक्येन रामेण रावण-वधाय कल्पितस्य ब्रह्मार्पितशरस्य स्मरणं, ध्यानागतेन तेनैव शरेण रावणस्य निधनञ्च, विनाशमुपगते च तस्मिन् देवादीनां हर्ष:, विभीषणस्य च क्लेश:। अष्टादशे—रावणादीनां निधनेन विभीषणस्य खेदोक्ति:, पौरवासिभि: तस्य सान्त्वनम्। एकोन-विंशे—रामवाक्यावसाने विभीषणस्य प्रत्युक्ति:, मन्त्रिण: प्रति लङ्कागमनाय विभीषणस्य निदेश:, दशाननस्य अन्त्येष्टिक्रियार्थं तै: राजयोग्यवस्तुनामाहरणं, विभीषणं प्रति उपदेशदानञ्च, रामेण विभीषणस्य मूर्द्धाभिषेचनं, उपदेशदानञ्च। विंशे हनूमता सीतायै रावणनिधनावार्त्ताया: ज्ञापनं, रक्षयित्रीणां राक्षसीनां निहन्तुं तस्या: अनुमतिप्रार्थना, तदुत्तरे सीताया: हितकथनं, सीतामानेतुं हनूमता रामाय प्रार्थना, रामादेशितस्य विभीषणस्य सीतासमीपगमनं, सीतां प्रति तस्योक्ति:, शिविकारोहणेन तस्या: रामान्तिके गमनं, रामेण तस्या: प्रत्याख्यानं, रामं प्रति

सीताया उक्तिः, लक्ष्मणं प्रति तस्याः चिताशय्यार्थमनुमतिः, तेन प्रज्वालितायां चितायां तस्याः प्रवेशः। एकविंशे— प्रज्वलता हुताशनेन सीतां धृत्वा रामं प्रति तस्याश्चरित्रस्य विशुद्धित्वख्यापनं, ब्रह्मादिदेवतानामपि तथात्वकीर्त्तनम्। द्वाविंशे—हनूमन्तं प्रति अयोध्यागमनाय रामस्य आदेशः, अयोध्यायाः पथकथनञ्च, गते हनूमति अयोध्यागमनाय रामेण सुग्रीवस्य तथा विभीषणस्य च अनुनयं, तयोः रामं प्रति उक्तिः, पुष्पकारोहणेन तेषां अयोध्यां प्रति गमनं, पथि रामेण सीतायै सेतोः महेन्द्रस्य मलयस्य विन्ध्यस्य माल्यवतः गिरेः ऋष्यमुकस्य दण्डकारण्यस्य पम्पायाश्च सन्दर्शनं, सपौरमातृभिः भरतस्य रामदर्शनाय आगमनं, रामस्य पुरःप्रवेशः, भरताय यौवराज्ये अभिषेकः, अश्वमेधयज्ञस्य आयोजनञ्च वर्णितमिति।

पौराणिकेतिवृत्तानि ।

अंशुमतः—

सत्रनिर्व्वहणम्;—महर्षेः कपिलस्य क्रोधाग्नौ सूर्य्य-वंशावतंसे षष्टिसहस्रे सगरसन्ताने विनाशमुपगते पितामह-निदेशेनासौ पातालभवनं गत्वा महर्षिं संस्तूय यज्ञीयाश्वं गृहीत्वा पितामहसगरस्य शतक्रतुं निर्व्वाहयामास।

अकचसत्र—

उत्पत्तिः ;—पुरा किल देवानां समुद्रमथनोद्भवायाः सुधायाः पानावसरे प्रच्छन्नदैत्यभावस्य केतोर्गलमात्रपर्य्यवसिते पीयूषे सूर्य्याचन्द्रमसौ तद्रहस्यं नारायणं व्याचख्याते। ततः स सपदि चक्रेण तस्य शिरश्चिच्छेद। ततः प्रभृति विदेहस्य तस्य उत्तमाङ्गं राहुरपराङ्गं केतुश्चेति कीर्त्त्यते। तदारभ्यामर्षतया लोकसाक्षिणं चन्द्रमसञ्च पर्व्वणि ग्रसति।

अग्नेः—

खाण्डवभक्षणम् ;—कदाचिदग्निः श्वेतकिराजयज्ञे प्रभूतहविर्भक्षणजनितं विकारं परिहर्त्तुं ब्राह्मणरूपेण कृष्णार्जुनयोरातिथ्यं स्वीकृत्य तयोः साहाय्येन बहुप्राणिशङ्कुलं खाण्डवारण्यं षट्प्राणिमात्रवर्ज्जं समस्तं कवलयन् पुनः स्वास्थ्यमापेदे। निरुक्ताः षट् प्राणिनश्च किरीटिशरण्यो मयोनाम दनुजः, जनन्यासिषेणापवाहितस्तक्षकतनयो हतबन्धुरश्वसेनः, कृशानोरनुग्रहजीवितास्चतारो मन्दपालसूनवः शार्ङ्गकाश्चेति।

शुकं प्रत्यभिसम्पातः ;—अथैकदाग्निः अश्वत्थान्निर्गत्य शमीगर्भगत इति शुकेन प्रस्तुतत्वात् शुकजातिं प्रति तेनाभिशप्तम्—'वाग्विहीनो भूयाः' इति

वारणेष्वभिसम्पातः,—कदाचिद्देवगणानुरोधादूर्द्धरेतसः कालिकापतेः चरितमीषद्भेतः संस्कृह्य चण्डीशापभयात् मुह्यन्तं तारकघातिसुतोत्पादनक्षममनलमश्वत्थस्थमन्विष्यद्भ्यः सुरेभ्यः

कोऽपि करी व्याजहार। तेन कुपितेन हुतवह्निना—'प्रतीपा वो रसना भवेत्' इत्यभिसप्तं।

अगस्त्यस्य—

उत्पत्तिः ;—एकदोर्व्वशीमभिलषतोः मित्रावरुणयोः कुम्भ-न्यस्तात्तेजसोऽगस्त्यो निमिशापाद्वि देहो वशिष्ठश्च संजज्ञाते। तेन तौ मित्रावरुणसंज्ञां लभेते।

विन्ध्यशासनम् ;—अथ कदाचिदगस्त्यो देवैरभ्यर्थितो मेरु-स्पर्द्धया दिनकरगमनवर्त्मनिमवरोद्धुमिच्छन्तं विन्ध्यगिरि-मगमत्। तत्र मुनिमभ्यर्थितुमवनते च तस्मिन् 'पुनर्गमनं यावत् नतशिरसैव वर्त्तितव्यम्' इत्युक्त्वा तस्मात् परेताचरितां दिशं प्रस्थितो न पुनस्तत्रागमत्।

नहुषशापः ;—सोमवंशावतंसो नहुषभूपतिरिन्द्रपदं प्राप्यागस्त्यादिभिर्महर्षिभिः शिविकां वाहयन् तमगस्त्यं दुर्मति-तया पादेनास्पृशन् तच्छापेन भुजङ्गमयोनिमासाद्य तिर्य्यक्त्व-मापन्नो राज्ञा युधिष्ठिरेण तस्मान्मोचितः। ततः स त्रिदशालयं ययौ।

वातापिदलनम् ;—महर्षिरगस्त्यः कदाचित् स्वभार्य्यायाः लोपामुद्रायाः सन्तोषार्थं धनलिप्सुर्धरणीमभिचरन् इल्वलजनपदं गत्वा तस्य राज्ञः आतिथ्यं स्वीचकार। दनुजपतिरिल्वलः सहो-दरं वातापिनं छागं विधाय तस्य पिशितैर्गृहागतान् प्रथमं भोजयामास, अनन्तरं मृतसञ्जीवनीप्रभावेणोज्जीवितेन तेन

जठरं विदार्य्य निष्क्रामता घातयित्वा अतिथीनां धनानि समादधिरे, तान् मुनिर्व्विज्ञाय भुक्तं वातापिनमतित्वरितं कुक्षिवह्निना पपाच ।

समुद्रपानम् ;—अथैकदामरसंस्तुतो मुनिः सागरगर्भलुक्कायितानां कालकेयादिदनुजानां वधार्थं सागरोदकं गण्डूषेण निःशेषं पीत्वा तेषां वधगरणीं प्रदर्शयामास ।

दक्षिणस्याभुदयः—श्रूयते हि श्रुतौ शरदि दक्षिणस्यां दिशि नक्षत्ररूपेण समुदिते मुनौ सर्व्वत्र जलं शुध्यतीति ।

अघासुरस्य—

बधः ;—नन्दालये कंसप्रेषितयोः पुतनाबकासुरयोर्बालकृष्णकरेण निधनमुपगतयोस्तयो र्भ्राता अघासुरो वृन्दावनं गत्वा वासुदेवबधार्थं मायया अजागररूपं परिगृह्य क्रीड़द्भिर्बालैः सह श्रीकृष्णं कवलीकृतवान् । ततश्च तन्मायां बुद्धा हरिर्विश्वाम्भररूपेण आत्मदेहं विस्तीर्य्य तस्य गलनालीं शीर्षञ्च विदार्य्य निरगात् ।

अनिरुद्धस्य—

उषासमागमः ;—स्वप्नदृष्टमनिरुद्धं प्रति बाणतनयाया उषायाः प्रगाढ़मनुरागमवगम्य तत्सखी चित्रलेखा गूढ़ं तमानीय समागमयत् । अतोऽसौ तया सह रहो विहरतिस्म । ततो गच्छता कालेन, बाणेन ज्ञातः बद्धश्च । अथ नारदमुखादुपलब्धवृत्तान्ताः यदुकुलप्रमुखाः कृष्णादयः ईशानगुप्तं

शोणितपुरं गत्वा संग्रामं विधाय विजित्य च बाणमनिरुद्धं मोचयित्वा उषया सह द्वारकापुरं प्रापुः ।

आस्तिकस्य—

सर्पोज्जीवनम् ;—पुरा किल वासुकिभगिन्यां मनसादेव्यां जरत्कारुमुनिसम्भव आस्तिकः सर्पसत्रकारिणं जनमेजयमनुनीय कठोरभिसम्पतात् तद्यज्ञेन्धनतामुपागच्छन्तं भुजङ्गमकुलं परिरक्ष ।

इन्द्रस्य—

गौतमपत्नीधर्षणम् ;—पुरा किल अहल्यारूपविमुग्ध इन्द्रो गौतमरूपं धृत्वा तदाश्रमपदमभ्युपेत्य सुरतप्रार्थनायायत्तीकृतामहल्यां धर्षयित्वा बहिरागच्छन् दैवात् मुनिनावलोकितोऽभिशप्तश्च सोमो शून्यस्त्वव भविष्यतीति। अहल्यापि श्रीरामचरणस्पर्शनम्रते अदृश्या निराहारा भस्मशायिनीत्यभिशप्ता ।

वृत्रहननम् ;—पुरा किलाखण्डलशासनाय त्वष्टुरुत्पन्नो वृत्रो नामासुरस्तपस्यन्नेवान्तर्निविष्टनारायणांशेनेन्द्रेण सकलदेवताप्रार्थितकायस्य पुत्राम्नो महामुनेर्गृहीतपरोपकारव्रतस्य दधीचेः कङ्कालैर्विनिर्मितेन कुलिशेन निहतः ।

पर्व्वतपक्षकर्त्तनम् ,—यत्र कुत्रचित् पक्षबलेन गमनशक्तानां पर्व्वतानां गमनेन महदनिष्टशङ्कां भावयता मघवता तेषां पक्षाः कर्त्तिताः । तेषु नगाधिपतेरात्मजो मैनाको जलनिधेरम्भसि निमज्यालूनपक्ष एव वर्त्तते ।

उशीनरसूनोः—

शरणागतरक्षणम् ;—पुरा किलाग्निः पारावतविग्रहेण चन्द्रवंशीयं शरणागतवत्सलं राजानं शिविमभिगत्य 'श्येन-भयत्रस्तोऽहम्' इत्युक्त्वा राजप्रसादं लेभे। ततश्च श्येनरूप इन्द्रस्तद्भक्षणाय राजानमागत्य प्रार्थयामास। राजनि तु तदङ्ग-विनिमयेनात्मशरीरतः मांसं दातुं प्रवृत्ते स्वस्वरूपेण तौ सम्मु-खीभूय वरं दत्त्वा अन्तर्हितौ।

ऋष्यशृङ्गस्य—

अयोध्यानयनम् ;—विभाण्डकस्य मुनेः पुत्रमृष्यशृङ्गं पुरा द्वादशवर्षव्यापिन्या अनावृष्ट्या राज्यनाशोपक्रमे राज्ञा दशरथेन आनीय यज्ञं कृत्वा राज्यरक्षा अकारि।

एकलव्यस्य—

गुरुदक्षिणादानम्—निषादाधिपतेर्हिरण्यधनुषस्तनयः एक-लव्यो धनुर्विद्यामभ्यसितुमाचार्य्यद्रोणमुपगम्य शबरजातित्वेन प्रत्याख्यातः गृहं गत्वा मृण्मयं द्रोणविग्रहं निर्म्माय ततः निखिलामायुधविद्यां लेभे। ततश्चायं कदाचिदर्ज्जुनतोषविधित्सवे अभिसन्धानार्थं समुपस्थिताय आचार्य्याय निजदक्षिणाङ्गुष्ठं छित्वा तदभ्यर्थनानुरूपां दक्षिणामदात्।

ककुत्स्थस्य—

युद्धम् ;—वैवस्वतान्वयसम्भवस्य राज्ञः शशादस्य सूनुः पुरञ्जयः सुरासुराणां महाहवे विष्णोरादेशेन वृषरूपिणः

इन्द्रस्य ककुदमास्थाय युद्धमकरोत्। ततः प्रभृत्ययं वंशः ककुत्स्थ इति संज्ञामाप।

कर्णस्य—

दातृत्वम्;—पुरा किल कर्णः प्रभाकरेण निषिध्यमानोऽपि स्वसमङ्गलञ्च ज्ञात्वा प्रार्थिताय पुरन्दराय स्वाङ्गतः उत्कृत्य सहजातं कवचकुण्डलमदात्।

कार्त्तवीर्य्यार्ज्जुनस्य—

नर्म्मदारोधः;—कदाचिदसौ हैहयः कृतवीर्य्यसूनुरर्ज्जुनो नाम भूपतिः जलकेलिव्यापारे भुजसहस्रेणावरुध्य नर्म्मदां प्रतीपगां चकार।

दशाननशासनम्;—अथ कदाचिदनेन योद्धुमिच्छन् दशाननो नर्म्मदारोधसि दोर्भिर्निर्ज्जितो बद्धो निजायतनमानीतः पुलस्त्यानुरोधान्मोचितश्च।

किरीटिनः—

गुरुदक्षिणा;—अथाचार्य्यद्रोणनिर्देशेन किरीटी तद्दक्षिणार्थं द्रोणद्वेषिणं द्रुपदराजं बद्ध्वा दत्तवान्। तेनासौ द्रोणः तं प्रति प्रसन्नो भूत्वा सर्व्वेभ्यः शिष्येभ्यः समधिकमादरं कृतवान्।

कुन्त्याः—

मन्त्रलाभः;—अथैकदा दुर्व्वासा मुनिस्तीर्थयात्राप्रसङ्गेन कुन्तिभोजराजगृहं वर्षमेकमुवास। तदा कुन्तिभोजाय पुत्रीत्वेन प्रदत्ता शूरसेनभूपतेः कन्या वसुदेवस्य स्वसा पृथा ऋषेरत्यन्तं तां

परिचर्य्यामकरोत्। तत्परिचर्य्यया परितुष्टोमुनिस्तस्यै देवाकर्षणमन्त्रमेकमदात्। तन्मन्त्रपरीक्षार्थं मार्त्तण्डस्मरणेन तदौरसेन कर्ण इति सुतोऽजनि। तं तु कानीनत्वात् मञ्जुषायां संस्थाप्य नदीप्रवाहे निक्षिप्ता। ततश्च स्वयम्बरविधिना पाण्डुराजेन सह तस्या विवाहोऽभूत्। एकदा वनभ्रमणावसरे ब्राह्मणाभिसम्पातेन स्त्रीसंसर्गवञ्चितः पाण्डुः पुत्रोत्पादनाय पृथामादिदेश। ततः सा ऋषिदत्तमन्त्रबलेन धर्म्मराजं पवनमिन्द्रञ्च स्मृत्वा तेषामौरसेन युधिष्ठिरं भीममर्ज्जुनञ्च सुतान् सुसूवे। सपत्नी माद्री तन्मन्त्रप्रभावेन च अश्विनीकुमारौ स्मृत्वा नकुलसहदेवौ कुमारौ लेभे।

कृष्णस्य—

पूतनावधः—पुरा किल स्तनन्धयो हरिः कंसप्रेषितया मायाविन्या पूतनया समर्पितो गरलसमासक्तस्तनचुचुकं तज्जीवनैः सार्द्धं पपौ।

शकटभञ्जनम्;—अथैकदा शकटाधःशयानो हरिश्चरणेन घोरं दनुजं बभञ्ज।

यमलार्जुनभङ्गः;—अथ कदाचिद्बालोऽसौ बलदेवेनोद्धतं खेलयन् यशोदयोदूखलबद्धस्तमुदूखलं कर्षयन् यमलार्जुनपादपान्तर्गतस्तौ आकृष्टोदूखलेन बभञ्ज।

अरिष्टबधः;—कदाचिदसौ रजनीमुखे रासलीलासमासक्तो गोमुनिगणानुद्वेजयन्तं प्रचण्डरूपधरमरिष्टाख्यमसुरमुत्पाठितेनैकेन तत्शृङ्गेन जघान।

गोवर्द्धनधारणम् ;—अथैकदा कृष्णोपदेशेन इन्द्रमहभङ्गात् व्रजवासिनः प्रति कुपितेन इन्द्रेण महदुत्पातो व्यकारि। ततस्तद्वारणायासौ वामकनिष्ठाङ्गुलिना गोवर्द्धनगिरिं दधार।

कंसबधः ;—अथासौ आत्मद्वेषिणमुग्रसेनतनयं मथुराधीश्वरं मातुलं कंशं मथुरां गत्वा निपात्य पितरं वसुदेवं मातरं देवकीञ्च बन्धनादुन्मुच्य कंशादधिकृतामिलामुग्रसेनायादात्।

गुरुदक्षिणा ;—अथ कदाचिदध्ययनार्थी बलदेवेनावन्तीमुपेत्य चतुःषष्ट्यहोभिः सान्दीपनिमुनेरधीत्य निखिलां विद्यां तदङ्गजहन्तारं शङ्खं पञ्चजनासुरं विनिपात्य तदस्थिजं पाञ्चजन्यमापूरयन् शमनं विजित्य तदन्तिकादानीय गुरुपुत्रं गुरवे दक्षिणामदात्।

रुक्मिणीहरणम् ;—अथ कदाचित् हरिः राजन्यवृन्दं विजित्य चेदिपतये शिशुपालाय दित्सतां भीष्मकपुत्रीं रुक्मिणीं राक्षसविधिना उद्वाह्य तस्यामनङ्गावतारं प्रद्युम्नमजीजनत्।

जरासन्धभीतिः ;—अयं कंशपत्नीसमुत्तेजिताज्जरासन्धात् भयेन प्रपलय्य रैवतकाद्रिप्रकारां कुशस्थलीमध्यवास।

मुचुकुन्दतल्पशयनम् ;—अथ कदाचिद् यादवाक्षेपिणा यवनपतिना कालयवनेनाक्रम्यमाणोऽसौ कामपि गिरिगुहां प्रविश्य तत्र देवासुरयुद्धे प्रसन्नैर्देवैः काम्यमानस्य मुचुकुन्दभूपतेः प्रार्थनया तस्मै दीर्घकालं निद्रामुखमर्पितम्। तदन्तरा यो हि निद्राव्याघातं घटयिष्यति स भूपतेर्दृष्टिमात्रेण भस्मत्वमेष्यतीति वरलब्धप्रसुप्तस्य

तस्य तल्पलीन आसीत्। कालयवनस्तु तदनुसरणक्रमेण प्रविश्य कृष्णभ्रान्त्या पादेन ताड़यन् तेन दृष्ट्या भस्मीकृतः।

परीक्षिदुज्जीवनम्;—कदाचिदसौ अश्वत्थाम्ना ऐषिकास्त्रेण विनाशितमुत्तराजठरगतमभिमन्युतनयं परीक्षितमुज्जीवयामास।

खुल्लनायाः—

जन्म;—इयं खलु तपस्विनी रत्नमालानाम्नी काचित् स्वर्गविद्याधरी, पुरा चण्डिकाकोपेन लक्षपतिवणिज औरसेन जाता। धनपतिसार्थवाहेन परिणीता। अस्यास्तनयः श्रीमन्तो नाम।

गरुड़स्य—

निषादपुरग्रासः;—क्षुत्क्षामकण्ठेनानेन मातृनियोगादुदधिस्थं निषादपुरमश्नता खगपतिना गिलितो निषादीभार्य्यः कश्चिद्ब्राह्मणः कण्ठं दहन् समुद्भृजितः।

चन्द्रस्य—

गुरुपत्नीहरणम्;—अथ कदाचिदनङ्गपीड़ितः शशी वृहस्पतेः पत्नीं तारां बलादपहृत्य तस्यां बुधसुतमुत्पादयामास।

दक्षादभिसम्पातः;—रोहिणीनक्षत्रमात्रैकनिरतस्य शशिनो निजदौर्भाग्यदुःखिताभिर्दक्षपुत्रीभिः सप्तविंशत्या स्वपत्नीभिरावेदितस्य प्रजापतेः शापादेव यक्ष्मणाभिक्रान्तः शङ्करं तपसाराध्य निरामयोऽभवत्।

जरासन्धस्य—

उत्पत्तिः—वृहद्रथोनाम राजा सन्तानहीनतया काक्षीव-

त्तनयं चण्डकौशिकमृषिं प्रस्तूय शरणं प्रपन्नः। ततस्तेन ऋषिणा प्रसादीकृतमाम्रफलमेकं राज्ञे दत्तम्। स तु राजा निर्ब्बन्धप्रेरिततया तत् फलं यमजाभ्यां काशीराजतनयाभ्यां भार्य्याभ्यामर्पितवान्। ते च महिष्यौ तत् फलं समभागेन भुक्त्वा दोहदवत्यौ स्तः। ततस्तु पूर्णे दशमे मासे जीवितमर्द्ध-शरीरद्वयं प्रसूय परिचारिकया व्यसर्जयताम्। अथ सूनापरि-चरा जरा नाम्नी कापि राक्षसी बालमृन्मांसार्थिनी कौतूहल-वशवर्त्तितया तद्भागद्वयमेकीकृत्य रुदन्तं बालकं वीक्ष्य साश्चर्य्या राज्ञे उपायनं कृतवती।

जामदग्न्यस्य—

मातृशिरश्छेदः;—अथैकदा राममाता रेणुका कामपि स्रोतस्विनीं स्नातुमभेत्य तत्र जलक्रीड़ानुसंसक्तं गन्धर्व्वराजं चित्ररथं समीक्ष्य सञ्जाताभिलाषोन्मनस्का स्वसपदमागतेति विदितभूतार्थेन मुनिना कुपितेन समादिष्टो जामदग्न्यः कुठारेण मातृशिरश्छित्वा पितुः सन्तोषान्मातृप्रत्युज्जीवनादिकान् वाञ्छितान् वरान् समालेभे।

षड़ाननविजयः;—त्र्यम्बकात् धनुरुपनिषदमधीयानेन जामदग्न्येन द्वन्द्वारम्भे षड़ाननं प्रति त्रैयक्षशरे संयोजिते चण्डिका तयोर्म्मध्यस्थैनं न्यवारयत्।

क्रौञ्चभेदनम्;—अथ कदाचिद्रामः कार्त्तिकेयस्य स्पर्द्धया क्रौञ्चगिरिमतिनिशितविशिखमुखेन लीलया मृत्पिण्डभेदं बिभेद।

निःक्षत्रीकरणम् ;—अथ कदाचिन्मृगयानुरक्तः कार्त्तवीर्य्यार्ज्जुनोऽटवीं पर्य्यटन् जमदग्नेराश्रमं प्राप्य मुनिसत्कृतोऽसौ तं महीयसीं विभवरूपां कामधेनुं ययाचे। किन्तु प्राणव्ययेनापि तामदित्सन्तं मुनिमाहवे हत्वा होमधेनुं स्वपुरं नीतवान्। ततश्च पुष्करतीर्थात् प्रत्यावर्त्त्य कुपितो रामः त्रिःसप्तकृत्वः क्षत्रबधमङ्गीकृत्य पितृद्वेषिणं हैहयं सबान्धवं प्रतिज्ञातसंख्यया च सबालक्षात्रवीरान् निपात्य स्यमन्तपञ्चके पञ्चसरःसु सञ्चितेन तच्छोणितेन पितृपुरुषान् तर्पयतिस्म।

पृथ्वीदानम् ;—अथासौ समग्रां पृथ्वीं विजित्य तर्पितैः पितृपुरुषैर्निवारितहननव्यवसायो जज्ञेन देवान् प्रणीय गुरुकश्यपाय तावतीमिलां समर्प्य महेन्द्रगिरौ तपस्यायै ययौ।

गणेशदन्तभञ्जनम् ;—कदाचिद्भार्गवः कालिकापतिमभिष्टोतुमुपगच्छन् पथि गणेशेन प्रतिनिवृत्तो प्रज्वलदनलेनेव क्षात्रतेजसा तमभिभूय परशुना तस्यैकं दन्तं बभञ्ज।

भीष्मेण पराभवः,—अथ कदाचित् सत्यसन्धो निखिलोपचीयमानक्षत्रवीर्य्यो भीष्मः स्वाचार्य्यरामेणादिष्टोऽपि शैल्यराजानुरक्तामात्मविजयलब्धपरित्यक्तां काशीराजसुतामम्बामुद्जहार। तस्माच्च कुपितं जामदग्न्यमाहवे आहूय महासंग्राममभिनीय पराजितः।

ताड़कायाः—

शापावसानम् ;—पुरा किल श्वेतकेतुर्नाम कश्चित् यक्षस्तपस्यया पितामहात् 'सहस्रमत्तमातङ्ग इव बलवती ' न्या

भविष्यति' इति वरं लब्ध्वा प्राप्तमातङ्गबलवतीं कन्यां सुन्दाय ददौ। ततस्तस्यां सुन्दौरसेन मारीचो नाम पुत्रो जज्ञे। अगस्त्यक्रोधाग्निना निहते सुन्दे समातृको मारीचो मुनिं हन्तुमुद्यतः। ततः कुपितो मुनिस्तौ 'राक्षसयोनिं प्राप' इति शशाप। ततः प्रभृति राक्षसौ भूत्वा मुनेराश्रमं प्राणिशून्यं कृत्वोषतुः। अथ गच्छति काले विश्वामित्रमखरक्षावसरे रामचन्द्रेण सा विनष्टा।

दक्षस्य—

अजमुण्डम्;—अथैकदा भृगुयज्ञसमुपागतो दक्षः शिवेना-कृतसत्कारः क्रुद्धन् शिवं निर्ज्जेतुं तमन्तरा निखिलदेवमामन्त्र्य मखमारेभे। तत्र अनाहूता कनिष्ठतनया शिवभार्य्या सती अहैतुकीं शिवनिन्दां श्रुत्वा प्राणान् जहौ। तेन जातामर्षाः प्रमथाः यज्ञं विनस्य दक्षशीर्षञ्चापि यज्ञाग्नौ ददहुः। ततो दक्षभार्य्यायाः प्रसूत्यास्तवेन प्रसन्नो हरो दक्षदेहे छागमुण्डमेकं संयुज्य तमुज्जीवयामास।

दुर्व्वाससः—

भार्य्याभस्मीकरणम्;—अयं खलु विदितवैभवो महातपा ऋषिरत्रेरौरसेनानुसूयायां जातः। श्वशुरौर्व्वानुरोधेनासौ कन्दल्याः पाणिग्रहणसमये तस्याः शतापराधं मर्षयिष्यतीति प्रतिज्ञातवान्। ततो गच्छता कालेन कन्दल्या उत्पन्ने शतेकेऽपराधे क्रोधाग्निना तां ददाह।

इन्द्रं प्रत्यभिसम्पातः—अथ कदाचिदसौ महीमटन् गच्छन्तमिन्द्रं दृष्ट्वा तस्मै पारिजातस्रजं दत्तवान्। स तु तां यथायोग्यस्थाने अप्रापिततया क्रुद्धेन मुनिना 'श्रीहीनो भूयाः' इति शेपे।

पाण्डवान् प्रति सन्तोषः ;—सुयोधनसत्कृतप्रसन्नेन मुनिना द्रौपदीभोजनोत्तरं पाण्डवेभ्यः सशिष्यमातिथ्यं प्रार्थयिष्यतीति तस्मै वरं दत्वा हरिव्रतपारणावसरे तानभिगत्यातिथ्यं ययाचे। ततो विपन्नाः पाण्डवाः हरिसहायेन आदित्यदत्तस्थालीलग्नेन शाकान्नेन सशिष्यान् मुनीन् तोषयित्वा परां प्रीतिं लेभिरे।

अम्बरीषात् पराभवः ;—अथैकदा विष्णुभक्तस्य राज्ञोऽम्बरीषस्यातिथ्यमसौ स्वीकृत्य स्नानाय काञ्चित् सरिद्वरां गतः। ततो बहुकालात्ययेनापि न समुपागतं तं समीक्ष्य त्रिदिनमुपोषिते राज्ञा क्षुत्क्षामकण्ठतया किञ्चिज्जलं गृहीतम् इति विज्ञाय मुनिः क्रोधेन स्वशिरस्थामेकां जटां संछिन्द्य भूमौ पातयामास। ततः सपदि प्रत्युत्पन्नेनैकेन पुरुषेणाम्बरीषः समाक्रान्तः। विष्णुचक्रो हि तं व्यापाद्य मुनिं हन्तुमुद्यतः। ततस्तेन वित्रस्तो मुनिर्भुवमटित्वा कुत्रापि रक्षितारं नासाद्य विष्णोरुपदेशेनाम्बरीषशरणं गत्वा निष्कृतिमाप।

यादवान् प्रत्यभिसम्पातः ;—अथ कदाचित् स्त्रीजनोचितवेशभूषितः शाम्बः द्वारकागतं मुनिमभिगत्य 'किं मे गर्भे भविष्यति' इति जिज्ञासयामास। ततस्तपःप्रभावेन विदितार्थोऽसौ

'मूषलं भविष्यति, तेन त्वत्कुलं निर्म्मूलं यास्यति' इति शशाप।

धृष्टद्युम्नस्य—

जन्म ;—पुरा किल द्रोणेन निर्जितो द्रुपदराजः परमनिर्व्वेदमालभमानो तत्वधार्थं पुत्रेष्टिं कृत्वा धृष्टद्युम्न इति नाम पुत्रं लेभे।

द्रोणस्य बधः ;—भारतयुद्धस्य पञ्चदशदिवसे 'अश्वत्थामा हतः' इत्युच्चैः 'गजः' इति लघु स्वरेण व्याहृतेन युधिष्ठिरेण द्रौणिर्हत इति बुद्ध्वा द्रोणः पुत्रशोकेन नाशाग्रवर्त्तिप्राणो रथतललग्नो धृष्टद्युम्नेन खड्गेन हतः।

निधनम्;—भारतयुद्धस्य पर्य्यावसानरजन्यां अश्वत्थामा पाण्डवशिविरं गत्वा प्रसुप्तं पितृहन्तारं धृष्टद्युम्नं खड्गेन जघान।

नरनारायणयोः—

सृष्टिः ;—धर्म्मराजस्य मूर्त्त्यभिधानायाः भार्य्यायाः जठरे नारायणांशेन एकात्मनोः विभिन्नवपुसोस्तयोरेव जन्म। वदरिकाश्रमस्थयोस्तयोरुग्रं तपो दृष्ट्वा संत्रस्तैर्द्देवगणैस्तपोभङ्गाय सह कामेनाप्सरसः प्रेरिताः। ततस्तद्रहस्यं विस्मृष्य तौ देवगर्व्वखर्व्वाय रमणीरत्नमुर्व्वशीं संसृज्य देवभूमिं प्रापयताम्।

नारायणस्य—

शेषशयनम् ;—अथासौ नारायणः कल्पान्ते समग्रां महीं स्वकुक्षौ निधाय कमलयोनिं नाभिकमले धारयन् रमया सेव्यमानचरणो योगनिद्राविमिलितेक्षणोऽनन्तशय्यामधिशेते स्म।

मधुकैटभवध: ;—एकार्णवे शयानस्यास्य कर्णमलादुत्पन्नौ मधुकैटभनामानौ दनुजौ ब्रह्माणं हन्तुमुद्यतौ, तस्माच्च भीतिग्रस्तेन हिरण्यगर्भेण संस्तूयमानो योगनिद्रातः उत्थाय पञ्चसहस्रवर्षाणि युद्धं कृत्वा ताभ्यां वरं लब्ध्वा जघने तयोः शिरश्चिच्छेद।

पुरूरवसः—

जन्म ;—श्रूयते हि पुरा वैवस्वतः पौत्रः इलः प्रद्युम्न इत्यपरं नाम ; स भूपतिः मृगयाप्रसङ्गेनाटवीमटन् महेशेन प्रतिषिद्धगमनमुमाकाननं प्रविश्य सपदि स्त्रीत्वं परिजग्राह। ततस्तद्रूपविमुग्धो बुधस्तस्याः सम्भोगेन पूर्णमनोरथः पुरूरवसं तनयमजीजनत्।

पृथोः—

पृथ्वीदोहनम् :—श्रूयते हि त्रेतायामङ्गराजस्यौरसेन सुनीथायामुत्पन्नो वेणः स्वराष्ट्रे देवार्च्चनां बलिञ्च निवारयामास। तेन जातामर्षास्तत्रत्याः ब्राह्मणाः मन्त्रपूतदर्भेण तं जिजघ्नुः। ततो मृतस्य तस्य दक्षभुजवर्षणादुत्पन्नः पृथुर्नाम भूपतिः लोकहितकाम्यया धनुष्कोट्या पर्व्वतानुत्सार्य्य वसुन्धरां महीं समतलां निन्ये। स्वायम्भुवं मनुं वत्सं परिकल्प्य गोरूपिणीं महीमोषधीश्च दुदोह। ततः प्रभृति धरण्याः पृथ्वीति संज्ञाभवत्।

प्रमद्वरायाः—

प्रत्युज्जीवनम् ;—भृगुवंशीयः प्रमतितनयो रुरुर्नाम कश्चिद्

ब्राह्मणवटुः विश्वावसोरौरसेन मेनकायामुत्पन्नां प्रणयिनीं प्रमद्वर सर्पदंशनेन त्यक्तजीवितामात्मजीवनार्द्धेन प्रत्युज्जीव्योपयेमे।

बभ्रुवाहनस्य—

पित्रभिभाषणम्;—पुरा कदाचित् मणिपुरंगतः पार्थः कामयमानायां चित्राङ्गदायां बभ्रुवाहनं नाम सुतमजीजनत्। ततो गच्छति काले युधिष्ठिरेणानुष्ठीयमानस्य यज्ञस्य हयरक्षण-कार्य्यानुरोधेन पुनस्तत्रैवागतं विज्ञायार्जुनिस्तमभ्यर्थितुमागत्य पार्थेन तिरस्कृतोऽभवत्। तस्माच्च जातामर्षः आहवे आहूय पितरं चात्मवीर्य्येण पराजयते स्म।

ब्रह्मणः—

जन्म;—श्रूयते हि 'बहुस्यामजायत' इति परमपुरुषस्य इच्छामत्रेण जलं तत्र निक्षिप्तान्निखिलवीजादण्डं तदस्य सर्व्वलोकपितामहः जज्ञे।

कन्याभिगमनम्;—अथ कदाचिदसौ दुहितुः शतरूपायाः रूपेण विमुह्य तां कामयमानः उद्वोढुमभिलषति स्म। ततः शिष्टैरचनाचरितं कार्य्यं कर्त्तुमिच्छन् पुत्रैस्तिरस्कृतोऽपि क्लेशेनोद्वाह्य तस्यां स्वायम्भुवं नाम सुतमुत्पादयामास।

भरद्वाजस्य—

घृताचीसङ्गतिः;—बृहस्पतेरङ्गजो भरद्वाजो मुनिस्तपस्तप्तुं हिमालयं गत्वा तत्राप्सरसं घृताचीं दृष्ट्वा स्खलिततपाः कामयमानः तस्यां द्रोणनामानं पुत्रमजीजनत्।

मयदानवस्य—

प्रत्युपकार: ;—अयं खलु दैतेय: हेमाभिधानायां स्वर्ग-विद्याधर्य्यां मायाविदुन्दुभिनामानौ द्वौ सुतौ मन्दोदरीं नाम्नीञ्च सुतामजीजनत्। सा तु मन्दोदरी रावणेन परिणीता। ततश्च बहुतिथिं खाण्डवारण्यवास्तव्योऽयं दानवस्तद्वनदाहावसरे पलायमानोऽसौ कृष्णेण हन्यमान: पार्थेन परित्रात:। तत् प्रत्युपकारैषिणा मयेन पूर्व्वं विन्दुसरोगुप्तै र्वृषपर्व्वगृहनिर्म्माणावशिष्टै-र्मणिशिलाकणकै: पाण्डवानाममानुषी काञ्चनी सभा रचिता।

महाभिषस्य—

ब्रह्मलोकाच्चुति: ;—अथैकदा ब्रह्मलोकवास्तव्यो महा-भिषो नाम राजा समीरणोद्वेजितवसनाया: सुरधुन्या: दर्शना-पराधात् क्रुद्धेन विरिञ्चिनाभिशप्तो मह्यां प्रतिपतनय: शान्तनु-र्नाम भूत्वा सकामां तामुद्वाह्य वशिष्ठशापान्मर्त्ततामापन्नानष्टौ वसून् क्रमशोऽजनयत्।

मान्धातु:—

निधनम् ;—श्रूयते हि वैवस्वतान्वयोत्पन्नस्याभिमन्त्रित-यज्ञीयोदकपीतस्य राज्ञो युवनाश्वस्य वामकुक्षिं विभेद्यासौ जात:। जातमात्रेण 'कं धास्यति' इति ऋत्विजां प्रश्ने देवराट् सम्मुखीभूय 'ममायं धास्यति' इति प्रदेशिनीस्त्राविणीममृत-धारां पीत्वा व्यवर्द्धत, तेन च मान्धातेति नामाभूत्। ततो गच्छति काले दिग्विजयक्रमेण समग्रां पृथ्वीं विजित्य स्वर्गं

राज्यं जेतुमुद्यतो मान्धाता इन्द्रेण मधुवनं प्रेषयित्वा मधुनन्दनेन लवेन विनाशितः ।

मूकदानवस्य—

निधनम्, मूकोनाम दानवः शौकररूपं परिग्रह्य देवकृत्यविघट्टनकामस्तपस्यन्तं पार्थं हिंसन् किराताज्जुर्नयोर्बाणेनासून् तत्याज ।

ययातेः—

जरासंक्रमणम् ;—पुरा किल सोमादुद्भवान्वयस्य नहुषनृपतेरात्मजो राजा ययातिरेकदा मृगयार्थी वनमटन् कूपमध्यपतितां शुक्रसुतां देवयानीं दृष्ट्वा यत्नादुत्तोल्य भार्गवं प्रेषयामास। ततो गच्छता कालेन पुनराखेटार्थी सखीजनपरिवृतां तां दृष्ट्वा कामयमानः शुक्रानुमत्या विवाह्य तस्यां यदुतुर्व्वसू सूतौ जनयित्वा भूयोऽनुरोधपरतन्त्रोद्वाहितायां दैत्यराजवृषपर्व्वसूतायामुपयाचिकायां शर्म्मिष्ठायां द्रुह्यनुपुरून् तनयानुत्पादयामास। ततस्तद्विज्ञाय भर्त्तर्य्यभिमानिन्या देवयान्या वेदितस्य पितुरुषणसोऽभिसम्पातात् जराग्रस्थोऽङ्गजेषु आत्मीयां जरां संक्रामयिष्यन् अनङ्गीकुर्व्वतस्त्रतुरस्तनयानभिसम्पातेन योजयित्वा कनिष्ठे स्वीकृते पुरौ तां विन्यस्य कतितिथीन् तद्यौवनसुखेन विषयानुपभोज्य कनीयसे पुरवे राज्यं दत्त्वा भूयस्तस्माज्जरामादाय चतुर्थाश्रमाचारमाचरितुं वनमगात् ।

याज्ञवल्क्यस्य—

दिवाकराराधना ;—अथ कदाचिद् याज्ञवल्क्यः वैशम्पाय-

नाहं यजुर्वेदमधीत्य सब्रह्मचारिणोऽधिक्षिप्तवानितिक्रुद्धे गुरौ 'मत्तोयदधीतं तद्देहि' इति प्रार्थिते मूर्त्तिमन्ति यजुंषि उद्गीर्य्य तस्मै प्रत्यर्पितवान्। ततोऽन्ये हि वैशम्पायनादधीतारस्तित्तिरा-स्तानि समादधुः। परतश्च तेनादित्यमाराध्य शुक्लान्यजातया-मानि यजुंषि लब्धानि।

युवनाश्वस्य—

गङ्गां प्रति शापः,—अथैकदा जाह्नवी तपस्यन्तं युवनाश्वं स्वोर्म्मिमालया प्लावयतिस्म। तस्माच्च कुपितो युवनाश्वः 'मर्त्त्य-लोकं विश' इति शशाप। ततः प्रभृति अर्द्धवपुसा युवनाश्वस्य कावेरी नाम्नी कन्यारूपेण जन्म परिजग्राह। तेन कावेर्य्याः अर्द्धगङ्गेति नाम लोके प्रसिद्धम्।

रवेः—

चन्द्राप्यायनम्;—देवाः खलु सुधाधरस्य सुधामयोश्चतुर्द्दश कलाः कृष्णप्रतिपदमारभ्यासितचतुर्द्दशीं यावत् प्रतिदिनमे-कैककलां संपीय पक्षव्यापिनीं परमां तृप्तिमालभन्ते। ततश्चाप-रयोः कलयोरमावास्यायां जललतासु व्ययितावशेषां पञ्चदशीं कलां पितृपुरुषाः पीत्वा मासव्यापिनीं तृप्तिं बिन्दन्ति। तद-वशिष्टा षोड़शीकला रवेरमाख्यमयूखमुपगता, तेनैव रविणा शुक्लप्रतिपदादारभ्य सुषुम्ना नामधेयेन रश्मिना क्रमेणाप्याय्य पुष्कलता समासादिता।

वाड़वालङ्गनम्;—श्रूयते हि पुरा वैवस्वतभार्य्या विश्वकर्म्म-

नन्दिनी संज्ञा भर्त्तृतेजः सोढ़मशक्ता स्वच्छायां गृहे संस्थाप्यात्मनातिगूढ़ं वड़वारूपिणी तपसन्त्यटवीमध्यमध्युवास। ततस्त्वेकदा छायापादप्रहारोद्यतं सपत्नीपुत्रं यमुनाभ्रातरं 'पादस्ते पततु' इति शशाप। तेन विवस्वान् समाधिदृष्ट्या संज्ञां परिज्ञाय वाजिरूपेण तद्वनं प्रविश्य तपस्यन्त्यां तस्यामश्विनीकुमारावपरञ्च रेवन्तं नामधेयं सुतानजीजनत्। रेतात्ययेन तृतीयकुमारस्य जन्मपरिग्रहात् रेवन्त इति नामासीत्।

तेजःशातनम् ;—अथ कन्यादुःखेन विदूनमानसस्त्वष्टा जामातरं भ्रमियन्त्रे संस्थाप्य तस्याष्टधा शातितेन भूमौ निसन्नेन तेजसा विष्णोश्चक्रं शम्भोः शूलं कुबेरस्य शिविकानामायुधमन्येषामपि देवानां विविधानि प्रहरणानि च निर्म्मितवान्।

रामसत्र—

चक्रवाकेष्वभिसम्पातः ;—यदा सीतावियोगदुःखविदूनमानसो रामः सीतार्थं विलपति, तदा कश्चिच्चक्रवाकस्तं जहास। तेन क्रुद्धः स चक्रवाकान् प्रति 'प्रतिदिनं रजन्यां दयिताविच्छेददुःखं सहिष्यति' इति शशाप।

रावणसत्र—

मोहः ;—श्रूयते हि कदाचिद्दरदर्पितो रावणस्तपस्विन्या वेदवत्या घर्षणतया तच्छापेण प्रक्षीणतपा मोहं परिजग्राह।

कैलासोत्पाटनम् ;—अथैकदा पुष्करस्थेन विहरतो दशाननस्य कैलासशैलशृङ्गप्रतिहतगतित्वेनात्यवमर्षितस्तमेव शैल-

कैलासोत्पाटनम् ;—अथैकदा पुष्करथेन विहरतो दशाननस्य कैलासशैलशृङ्गप्रतिहतगतित्वेनात्यवमर्षितस्तमेव शैलराजमुत्पाटयन् भीतित्रस्तया भवान्या समाश्लेषितस्य शम्भोः पादाङ्गुष्ठेनावष्टब्धभूधरभरनिपीड़ितोभुजस्तवप्रसन्नादेव महेशात् व्यसनमुक्तिं देवादीनां मनुष्याणाञ्चावध्यत्वं वरमाजग्राह।

शिरश्छेदः—अथ दशाननः पितामहमाराधयितुमुग्रं तपस्यन् प्रतिवर्षं सहस्रमेकैकं शिरो वह्नौ प्रक्षिप्य नववर्षसहस्रेषु व्यतीतेषु ब्रह्मणोऽनुग्रहाल्लूनानि ह्यतनव शिरांसि स्वाभिवाञ्छितञ्चापि वरं लब्धवान्।

[शिशुपालबधे तथा वीरचरितादौ च दशाननो महेशमाराध्याग्नौ शिरो जुहावेति वर्णनमासीत्। पुराणतत्त्वानि तत्र प्रमाणानि। मन्यन्ते केऽपि सभ्याः 'शैवाः कवयः पितामहार्थं शिरःकृन्तनं महेशमाहात्म्यप्रकटितुं कल्पयन्ति' इति।]

वालिना सौख्यम् ;—अथैकदा बलदर्पितो रावनो दक्षिणसागरे सन्ध्यामुपासितेन वालिना युद्धार्थमुपगम्य तेन कक्षान्तरसन्निवेशितः पूर्व्वापरादीन् नीरनिधीन् परिभ्राम्य स्वराजधानीं किष्किन्ध्यामानीतः। ततस्तेन निरतिशयां लज्जामनुभूय कपिराजेन सौख्यं विधाय स्वपुरमगात्।

रवेः पराभवः ;—अथ कदाचिद्दशाननो दिग्विजयव्यापारेण पातालपुरं गत्वात्मबलं स्पर्द्धते स्म। तदाकर्ण्य पातालेश्वरः प्रह्लादनप्ता विरोचनतनयो बलिर्हिरण्यकशिपोः कुण्डलमुत्तोलि-

तुमनुरोरोध। तदनुरुद्धो रावणः सुबहुचेष्टया मनागपि तदु-त्तोलितुं न शशाक। तस्मान्निरतिशयो लज्जितः लङ्कां प्रति ययौ।

अनरण्यवधः ;—पुरा किल राक्षसपतिर्दशाननो दिग्विजय-व्यापारे सम्भूततनयमैक्ष्वाकमनरण्यमाहवे यमसदनं प्रेरयामास।

बलदेवस्य—

यमुनाकर्षणम् ;—पुरा कदाचित् वृन्दारण्ये गोपवधूभिः क्रीड़यता मधुपानप्रमत्तेन बलदेवेन स्नानायाहूता यमुना मत्त इत्यानास्रवा हलयन्त्रेणाचकृषे।

सूतहननं ;—तीर्थयात्राप्रसङ्गेन रैवतोद्यानमुपस्थितो हलायुधो द्विजगणैः कृतसत्कारस्तन्मध्यस्थं व्यासासनासीनं पुराणव्याचक्षमाणं सूतमनभ्युद्गमापराधेन व्यापाद्य परतोऽनु-सूचयन् तत्पापक्षालनार्थं सारस्वततीर्थे सस्नौ।

वाड़वानलस्य—

उत्पत्तिः ;—श्रूयते हि पुरा लालसाप्रणोदितेषु राजन्येषु कृतवीर्य्यसत्वलब्धधनकनकादिसम्बद्धान् भार्गवान् तद्गर्भांश्च पातयत्सु कयाचिद्भार्गवभार्य्ययोरुद्धृतो गर्भः क्रोधादुरुं विदार्य्या-त्मतेजसा चैतानधर्षयत्। ततश्चान्वर्थनामासौ और्व्वो लोकदि-धृक्षया तपश्चरन् पितृपुरुषप्रतिवारितः स्वकोपवह्निं जलधिजलेषु विससर्ज। ततः प्रभृति स एव ब्राह्मणोत्थकोपो वड़वातुण्डा-कृतिरनलमुद्गीरन् निखिलजनात्मकमुकमिदानीमपि पिबति।

वायोः—

अञ्जनाधर्षणम् ;—अथ कदाचिद्वायुः कपिराजस्य केशरिणः ऋतुस्नातायां भार्य्यायामञ्जनायां भुवनविश्रुतं वीरप्रधानं रामानुचरं हनूमन्तं शिवावतारमजनयत् ।

वालिनः—

दुन्दुभिहननम् ;—महिषरूपधरो बलदर्पितो दुन्दुभिर्नामासुरो वालिना युद्धमभिरत्य उभयोर्ब्बलनिर्णये वालिना हतः ।

मायाविनिधनम् ;—दुन्दुभिपुत्रो मायावी पितृनिधनमुपश्रुत्य बलजिज्ञासुर्य्योद्धुमभिरत्य वालितेजसा पराभूय कमपि गिरिगह्वरं विवेश । ततस्तु तदनुधावितः कपिराजो भ्रातरं सुग्रीवं तद्बिलद्वारि संस्थाप्य स्वयं तत्र वर्षमेकमुषित्वा दानवं निहत्य बहिरगात् । अत्रान्तरे बहुतिथावुपचितेऽपि भ्रातुरागमनं नोपलभ्य सुग्रीवस्तस्य मरणं निश्चित्य राजधानीं प्रत्यावृत्त्य राजसिंहासनमलंचकार । ततस्तु प्रत्यावृत्तेन वालिना प्रथमं भ्रातरं नासमीच्य परतस्तस्य राज्याधिकारञ्च विज्ञायातिकुपितेन स राज्यात् चिरं निर्व्वासितः । स तु परमनिर्विन्नमानसः कतिपयैः सहचरैः ऋष्यमूकाद्रिमधुराश्य गच्छता कालेन रामेण सह मैत्रीं विधाय रामनिहते भ्रातरि पुनराज्यमधिचकार ।

विश्वामित्रस्य—

ब्राह्मण्यलाभः ;—अथैकदा गाधिराजसूनौ विश्वामित्रे स्वविभवानुरूपैरनुचरैः सह वशिष्ठाश्रममागते ऋषिणा कामधेनोः शवलायाः प्रसादात् तस्य राजयोग्यसत्कारोऽकारि। तेनातिविस्मितो राजा शवलायाः माहात्म्यमवगम्य तां ब्रह्मर्षिमयाचत। तामदित्सता वशिष्ठेन सम समरमवतार्थ्य तद्ब्रह्मण्यतेजसाभिभूतः परमनिर्व्विसो ब्राह्मण्यप्राप्तये बहुसहस्रसमाः उग्रं तपस्तप्त्वा विरिञ्चिप्रसादादुत्तरोत्तरेण राजर्षित्वं महर्षित्वं परिशेषे ब्राह्मण्यञ्च समालेभे।

त्रिशङ्कूद्धरणम् ;—वैवस्वदन्वयस्त्रिशङ्कुर्नाम राजा सबान्धवैः सशरीरं स्वर्गं यातुमभिलषन् तदुपयोगियज्ञार्थं सपुत्रवशिष्ठदेवमनुरोरोध। तेन महर्षिणा तदसम्भवं विभाव्य प्रत्याख्यातः। भूयोभूयः सैव प्रार्थना विज्ञापितो राजा कुपितेन ऋषिणा 'चण्डालत्वं याहि' इति शेपे। ततश्च चण्डालभावमनुप्राप्तस्त्रिशङ्कुर्विश्वामित्रं शरणमुपलभ्य तदीयतपःप्रभावेन द्यामाविशन् मघवता च्यावितः परिपतन् कौशिकप्रतिनिवारितोऽर्द्धमार्गेऽतिष्ठत्। अथ स्वतेजसा नूतनमेव स्वर्गं परिकल्पयन् देवानुनयनिवारितः स एव ऋषिः स्वकीये स्वर्गे तं त्रिशङ्कुमस्थापयत्।

शुनःशेफमोचनम् ;—ऐक्ष्वाकवस्याम्बरीषभूपतेर्महाक्रतोरश्वमेधस्य यज्ञीयाश्वे देवराजेनापहृते तद्विघ्नोपशान्तये पशु-

परिकल्पितो मातृपितृविक्रीतः ऋचिकात्मजः शुनःशेफः पथि विश्वामित्रं शरणमुपगम्य तत्तः प्राप्तमन्त्रेण वैश्वानरमाराध्यात्म-जीवनं राजानं तावद्‌यज्ञफलं प्रापयामास।

रम्भां प्रति शापः,—पुरा किल उग्रं तपस्यन्तं कौशिकं मोहयितुं देवराजप्रेषिता रम्भा महर्षिशापेन पाषाणमयी बभूव।

वृकोदरस्य—

हिड़म्बनिधनं,—जतुगृहदाहानन्तरं समातृभ्रातृको भीमो हिड़िम्बवने विश्राममुखमनुभवन् तन्मांसलोलुपं हिड़िम्बराक्षसं दोर्भ्यामाकृष्य पञ्चत्वमनयत्।

सौगन्धिकाहरणम् :—अथैकदा वदरिकाश्रमस्थेषु युधिष्ठिरादिषु वृकोदरः पाञ्चालीप्रार्थनया तत्रत्यनिशाचरान् विजित्य कुवेरेणाभिनन्दितस्तत्पालिताया निर्झरिण्या यथेप्सितान् सौगन्धिकानाजहार।

वृहस्पतेः—

भ्रातृकलत्रधर्षणम् ;—अथैकदा आङ्गिरसः ज्यायसो भ्रातुरुतथस्य भार्य्यामन्तर्व्वत्नीं ममताभिधानामुपगच्छन् प्रतिवारयता जठरस्थार्भकेण चरणेनैतद्रेतो मार्गेऽवरुद्धे 'दीर्घं तमसि प्रवेक्ष्यसि' इति तमेव बालं शशाप। ततश्च गच्छता कालेन स जननमभिलभ्य दीर्घतमनाम्ना ख्यातः।

व्यासस्य—

भ्रातृकलत्रगमनम् ;—श्रूयते हि पुरा जननीसत्यवत्या

निदेशेन पराशरतनयो व्यासः स्वसोदर्य्यस्य शान्तनुनन्दनस्य विचित्रवीर्य्यस्य भार्य्ययोरम्बिकाम्बालिकयोर्धृतराष्ट्रं पाण्डुञ्च सूतौ जनयामास।

शम्बरस्य—

निधनम् ;—पुरा किल शम्बरोनामासुरः कृष्णौरसोत्पन्नेन प्रद्युम्ननाम्ना कामिनात्मविनाशो घटिष्यतीति ज्ञात्वा जातं बालं षष्ठे दिवसे सूतिकागृहं प्रविश्य चोरयित्वा सागरजले चिक्षेप। ततोऽसौ गच्छति काले दैवगत्या स्वगृहानीतस्य मीनस्य कुक्षौ जीवितबालकमेकं प्राप्य तत्पोषणार्थं गृहस्थितायै प्रच्छन्नकामवल्लभायै मायावतीगृहीतनामधेयायै प्रत्यर्पयत्। सा च विदितवृत्ता मायावती भर्त्तृनिर्व्विशेषेण पालयित्वा आसुरीं विद्यां शिक्षयामास। ततश्च काले शम्बरं निपात्यासौ बालः भार्य्यया मायावत्या सह स्वभवनं ययौ।

शिवस्य—

मुनिपत्नीदूषणम् ;—अथ कदाचित् हरिहरौ युवकयुवतीरूपधरौ दारुवनं प्रविश्य तत्रत्याः युवकयुवतीर्मुनिकन्यापत्नीर्मोहयामासतुः।

त्रिपुरदहनम् ;—अथ कदाचिदीशानः सुरहितेच्छया सर्व्वदेवमयं महत् स्यन्दनमाश्रित्य ब्रह्माणञ्च सारथिं कृत्वा विरिञ्चिलब्धवरेण मयविनिर्म्मितातिदुर्भेद्यं दानवदुर्गं कालायसरजतहेमं

लमध्योपरिस्थं कदाचिदेकीभूतं पुरत्रयं त्रिदैवतमयशल्यत्रययुक्तेन शरेण शुष्कपर्णदाहं ददाह।

यज्ञमृगहननम् ;—श्रूयते हि कदाचित् शम्भुना साङ्गजस्य यज्ञवराहस्य वधोऽकारि।

गजासुरमर्दनम् ;—पुरा किल कैलासपतिः पिनाकी नन्दिकेश्वरेण गजरूपधरं नीलदानवं घातयित्वा तस्य चर्म्म बिभ्रत् ताण्डवं कृतवान्।

अन्धकविजयः ;—पुरा किल विधातृवरदर्पितोऽन्धकनामासुरो भवानीं हर्त्तुमुद्यन् भवेशेन स्वायुधेन निहतस्तद्रक्तकणसमसंख्यकानगण्यानन्धकासुरानुत्पन्नान् दृष्ट्वा स्वतः प्रसूतप्रत्नैर्मातृगणैर्नारायणसंसृष्टया च शुष्करेवत्या पीतासृजोऽसुराणाहवे निपात्य तेन पार्व्वतीपतिना मूलान्धकं शूलेन निर्भिद्य प्रस्तुवते तदसुराय गाणपत्यपदमदायि।

चेतकीवर्जनम् ;—अथ कदाचित् 'कोऽयं सृष्टिकर्त्ता' इति परस्परं विवदमानयोर्हरिब्रह्मणोर्म्मध्ये महदेकं लिङ्गमाविरासीत्। ततश्च 'य एवास्य पारं यातुं समर्थोऽस्ति स एव महान्।' इत्यन्तरिक्षवचनमाकर्ण्य अधोगतो विष्णुः पारमनालभ्य परावृत्तः, ब्रह्माप्युपरियातः पारमनासा लिङ्गशीर्षात् प्रभ्रश्यमानं केतकीदलमादाय प्रत्यावृत्य विष्णुं 'पारमहमगमम्' इति केतकीं साक्षीकृत्यानृतं व्याजहार। तेन कुपितो हरः वितथभाषिणीं ब्रह्मवचनसमर्थितवतीं केतकीं परिजहौ।

शिशुपालस्य—

जननम् ;—श्रूयते हि खलु शिशुपालश्चतुर्हस्तस्त्रिलोचनः संवृत्तः, जातमात्रश्च खरवन्ननर्द । 'यस्य क्रोड़ाधिगतेनास्याधिक-भुजलोचने विलोपमेष्यतः स एवास्य हन्ता' इत्यशरीरिण्यां वाण्यामुद्गतायां पर्य्यायेण कृष्णाङ्कमधिरोपिते तदङ्गे विलुप्ते बधार्हं शतापराधमस्य मर्षिष्यतीति अनुरुद्धेन कृष्णेण तथैव दिव्यमकारि ।

सौदासस्य—

क्रव्यादत्वप्राप्तिः ;—अथ कदाचित् सौदासो नाम नरपतिः राक्षसमायाविमोहितो वशिष्ठाय नरपिषितं भक्ष्यार्थमदात् । तेन क्रुद्धो मुनिस्तं 'राक्षसो भव' इति शशाप । परतश्च प्रणिधानेन सर्व्वं विज्ञाय महर्षिः शापस्य द्वादशवर्षकालं समयं निरूपयामास ।

हनुमतः—

अर्कग्रहणोद्यमः ;—पुरा किल जातमात्रो हनुमान् लोहितफलबुद्ध्यार्कं भक्षितुमाचक्राम ।

त्रिशिरानिधनम् ;—कुम्भकर्णे निधने पवननन्दनः रावणपुत्रस्य त्रिशिरसः सकीरिटीनि त्रीणि शिरांसि खड्गेन चिच्छेद ।

द्रोणाद्रिहरणम् ;—पुरा किल रामरावणयोर्युद्धे संज्ञातीरोहितयोः रामलक्ष्मणयोः प्रबोधनाय शक्तिनिर्भिन्नहृदयस्य

सौमित्रेर्लक्ष्मणस्य प्रत्युज्जीवनाय च वारद्वयमोषधिपर्व्वतं द्रोणमाजहार ।

न्याये ।

पक्षता ।

पक्षतानाम पक्षपदपरिभाषाविषयतावच्छेदकोऽनुमितिजनको धर्म्मः, नत्वनुमित्युद्देश्यत्वरूपम् । तादृशपक्षतायाः अनुमितिजनकतावच्छेदकत्वास्वीकारस्य, सिद्धिकालीनानुमितिकारणसमाजात् सिषाधयिषाविरहदशायामनुमित्युत्पादवारणाय । तादृशी पक्षता च कस्यचिन्मते साध्यसंशयरूपा, कस्यचिन्मते इच्छाविशेषरूपा, कस्यचिन्मते सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपा, तत्र साध्यसंशयस्य पक्षत्ववादिनये आत्मासाक्षात्कारहेतुमननधाराया अनुत्पादापत्त्या तद्बोधकवेदस्याप्रामाण्यापत्तिः । इच्छापक्षतावादिनये च इच्छाया अविषयीभूतस्य शत्रुसम्पदादेरनुमानोच्छेदः, इति तयोः पक्षत्वं न मणिकाराद्यभिमतम् । सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षत्वेन तादृशदोषाणामवकाशः, अतस्तादृशसिद्ध्यभावरूपपक्षतायामेव चिन्तामणिकारादीनां सर्व्वथा निर्णयः । तादृशसिद्ध्यभाव रूपपक्षतायां सिषाधयिषाया उत्तेजकत्वम्, तच्च तत्पक्षकतत्साध्यकतत्पक्षकतद्धेतुकानुमित्सात्वेनानुगतरूपेणैव उत्तेजकत्वं; अन्यथाननुगतरूपेण तत्पक्षे तत्तदिच्छाविरहव्यक्तीनां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकार्य्यकारणभावापत्त्या तत्तदिच्छाविरहव्यक्तीनां एकत्र द्वयं

रीत्या युगपदेव सिद्धौ विशेषणं, तत्रापि सामानाधिकरण्यव्यक्तीनां निरूपकभेदेन भेदात् प्रतीच्छाविरहव्यक्तिभिन्नतयानन्तकार्य्य-कारणभावापत्तितदवस्थेति तत्तदिच्छाविरहाधिकरणव्यक्तेरनुगतेन निरूपितवृत्तित्वसम्बन्धेन सिद्धौ विशेषणम्। सिद्धिः साध्यवत्तानिश्चयः समवायः समवायसम्बन्धावच्छिन्नप्रतियोगिताकतदभावः समवायसम्बन्धेनानुमितौ आत्मनिष्ठो हेतुः। एतादृशसिद्ध्यभावस्य पक्षतास्वीकारे शाब्दसिद्धिदशायां मननस्य मोक्षोपायत्वज्ञानेन सिद्धिविशेषेच्छया पुनरेवानुमानं निष्प्रत्यूहं अनाकाङ्क्षितशत्रुसम्पदादेरनुमानन्तु सिद्धिविरहरूपपक्षतासत्त्वे सुकरमेव। यत्पक्षकयत्साध्यकानुमित्सा कस्यापि न जायते, तत्पक्षतत्साध्यकानुमितौ सिद्ध्यभावमात्रम् कारणम्, न तु तत्र सिषाधयिषा उत्तेजकत्वं वाच्यम्। पक्षसाध्यभेदेन पक्षतारूपकारणभेदस्यावश्यकस्वीकरणीयत्वात्। यत् साध्यकानुमितेः पूर्व्वं नियमतः तादृशानुमित्सा जायते, तत्साध्यकानुमितौ सिषाधयिषामात्रं कारणं लाघवात्, नतु तत्र तादृशगुरुतरसिद्ध्यभावात् कारणत्वं कल्पनीयं, यस्य पुरुषस्य यत् साध्यकानुमितिर्नियमतः परामर्शद्वितीयक्षणे जायते, तत्पुरुषीयतत्साध्यकानुमितौ पक्षताया हेतुत्वाकल्पनेऽपि न क्षतिः, तत्र सिद्धिदशायामनुमित्यापत्त्यसम्भवात्। पक्षतायाः कारणत्वं कैश्चिन्न स्वीक्रियते, तन्मतं न समीचीनं; पक्षता न कारणमिति तु भ्रमः इत्यादिना श्रीमता शिरोमणिना दूषितत्वात्।

महाजनो येन गतः स पन्थाः ।

इह खलु संसारे द्वावेव महाजनशब्देन विशेषयन्ति सन्तः। एकं वणिग्वृत्तिसमाचरन्तमपरं सन्मार्गनिदर्शकम्। ये खलु सार्थवाहाः प्रतिनियतविषयनीरनिधौ निमज्जमानाः करतल-मुद्राधिगतेन निर्व्वाणपदमतितुच्छं मन्यमानाः, द्वित्रिकपर्दक-प्राप्तये च मृषा भाषितुमपि न लज्जन्ते, तान् कथं कथमहो महाजन इति शब्दगौरवेण विमण्डयन्ति सज्जनाः, तन्न जानीमहे। उदिते चापि मनसि तत्शब्दसंस्थानस्थानं स्वत एव समाक्रमते लज्जा सज्जनानां चेतः। मन्यामहे ते क्रयविक्रय-व्यपदेशेन नानादिग्देशेभ्यः यदुत्कृष्टं पण्यसम्भारं जगन्मङ्गलकरं वस्तुजातञ्चानीय जन्मभूमेः स्वकुटुम्बानाञ्च सुखसमृद्धिं वर्द्धयन्ति, अत एव तान् तथाविधोपाधिना समाकलयन्ति धीराः। अतःपरं ज्ञानवृद्धाः शब्दसंस्थानिकाः एव प्रमाणम्।

अपरे ये तावत् महाजनशब्दप्रयोज्याः, ते किल सत्कर्म्माण्य-नुसंशीलयन्तः कलुषं त्यक्तुकामाः विशेषं विविच्य कर्म्माण्य-नुतिष्ठन्ति। केन कर्म्मणा सुकृतं, केन वा दुष्कृतं; केन च मङ्गलं, केन वामङ्गलं, केनचन स्वीयमितरेषाञ्च इष्टमनिष्टं वा प्रभवतीति सूक्ष्मदृशा पर्य्यालोच्य कर्म्मणि

यतन्ते, त एव महाजनाः संसारपान्थनिलयस्य समालम्ब रूपाः। तैरेव समाचरितः पन्थाः परं परमापाततो दुःसाध्य इव प्रतीयमानोऽपि यत्नेनैव लम्बनीयो मनुजानाम्। तेन च सम्भवति प्रभूता शान्तिः, निरतिशयम् सुखम्, शाश्वतीः समाः ख्यातिश्च। मन्वत्रिविष्णु-हारीतादीनां धर्म्मशास्त्रप्रणेतॄणां महर्षीणां पन्थानमवलम्बमानाः ज्ञानवृद्धाः आपातसहजमनोरममार्गमभिपश्यन्तोऽपि हेलया तं समपाहायैव चिरन्तनीः प्रथाः संरक्षन्ति विचक्षणाः। विद्यते तत्र मतभेदानां बाहुल्येन सद्भावः, वर्त्तते चापि मतानां कुत्रचित् वैपरीत्यं, तथापि कुलसमाचारितपथानुवर्त्तितयैव कार्य्याणि समाचरन्ति प्रायश एव लोकाः। न तस्य दुष्टतामदुष्टतां वा समवलोकयन्ति पर्य्यालोचयन्ति वा मनसापि अन्यथा कर्त्तुं कदापि। पूर्व्वपुरुषैराचरितानां सन्मार्गानुसारेण जायते तावत् समुन्नता गतिः, विमला च प्रतिष्ठा। तथा च देवतानां प्रत्यक्ष-मनालोकनादपि तत्र सातिशयो विश्वासः, शालग्रामे मृन्मये वा देवविग्रहे देवतोपस्थितिबुद्धिः, पुण्यतोयायाः जाह्नव्याः सलिल-स्पर्शे निखिलकलुषविनाशनचिन्तनमित्यादि बहुधैव विद्यते अस्माकं महाजनपथानुवर्त्तित्वम्। दृश्यते चात्र लोकव्यव-हारविधौ महर्षिसमुपदिष्टमेकमेव व्रतं कुलप्रथानुसारेण विभिन्नदिवसेषु सुसम्पादयन्ति परमविधेयाः मनुजाः। कल्पन्ते च ते रवेः संक्रमणविशेषेण स्कन्दादिव्रतं दिनद्वये पूजायै। न

तेन च एकस्य पापमपरस्य पुण्यं वा समुत्पद्यते, नूनमधिकं वा वक्तुमर्हन्ति केचित्। येन च तदेव हि तेषां कुलक्रमागतो धर्म्मः। तत्कुलप्रथानुसारेणापि चाक्षते कार्य्यं सम्भवतितरामतिशयपापम्, एवमपि च वर्त्तते शतशो दृष्टान्तः, यदेकमेव कार्य्यं विभिन्नदेशे विभिन्नप्रकारेण समाचरन्ति सन्तः, तत् बाहुल्यसमोहया प्रोज्झितम्। प्रस्तुवन्ति नूनमार्य्यमिश्राः— यन्महाजनपदपङ्क्त्यनुसरणमेव चतुर्णामाश्रमिणां परमो धर्म्मः, मुक्तेश्चापि प्रकृष्टा सरणी। लोकेषु नैवं दृष्टं श्रुतं वा यन्महाजनमार्गानुवर्त्ती कदा कोऽपि विपदि पतितः, सुखात् वा परिभ्रष्टः, नितरां साध्विदमुच्यते—'महाजनो येन गतः स पन्थाः' इति क्षतं बाहुल्येन।

———

विद्वान् सर्व्वत्र पूज्यते। *

इह खलु संसारे परमेश-परिसृष्टानां सर्व्वेषामेव जन्तूनां मध्ये मनुजा नूनं विद्यागौरवेणैव प्राधान्यमापन्ना इति निःसंशयं वचः। आहारनिद्रा-प्रभृतीनां सविशेषतया केवलं ज्ञानबलेनैव तेषां प्राधान्यं स्वीकुर्व्वन्ति आर्य्यमिश्राः। तत्र

* न च विद्यासमो बन्धुः। विद्यायाः किं फलम्।

ज्ञानं कथं भवेदिति जिज्ञासूनामस्माकं प्रश्नपर्य्यवसाने केवलं 'विद्यैव निदानम्' इति परिकल्पते। विद्याप्रभावमन्तरेण न तावज्ज्ञानवानामज्ञानान्धता दूरीभवति। जगत्यस्मिन् धनी वा मानी वा विविधविभवपरिग्रहो वा शिष्टसुचेष्टपरिजनपरिपूर्णो वा किमधिकं शौर्य्यवीर्य्येणावधीरितवीरसमाजो वा विद्यामि-कामपहाय न कश्चिदप्रतिवादसहं सम्मानास्पदमवगाहते। विद्यां विना न खलु किञ्चिज्ज्ञानवानां हृदि संस्थिताज्ञान-तिमिरपुञ्जमपाकर्त्तुं प्रभवति। गन्धपरिहीनं प्रसूनमिव, विगतकमलं सर इव, शशिविरहीणा रात्रिरिव, लावण्यरहिता युवतिरिव, रुजाभिव्याप्तं शरीरमिव विद्याहीनं जीवनं नितरामवगीयते, एवमतिदुर्व्विधानामपि विद्यासलिलविमली-कृतचेतसां जनानामन्तःकरणे यादृगानन्दप्रवाहः समुपजायते, न हि तावत् सुधाधवलितप्रासादतलवासिनां भूभुजामपि विषय-भोगसमूहेषु सुखजातं तस्य षोड़शीमपि कलामर्हति।

विद्वांसो विनयिनो धृतिमन्तो मधुरप्रकृतयो विशुद्धचरि-ताश्च भवन्ति। अत एव स्तूयते—

"विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्म्मं ततः सुखम्॥"

यथा हि एकमेव सुसौरभकुसुमं निखिलमेव काननभूमिं गन्धसम्भारैरामोदयति, यथा च एकोऽपि हिमांशुरंशुजाले-

ज्जगदिदमुद्भासयति, प्रीणयति च तद्वदेकोऽपि विद्वान् सुविमलयशोधारया संसारमिममुज्ज्वलीकरोति।

किमहो विद्यायाः पीयूषमयं फलं? यदुपभुञ्जाना व्यास-बाल्मीकिकालिदासप्रभृतयो गतासवोऽपि चिरायामरत्वमापन्नाः, निखिलजगज्जनपूजिताश्च। किमधिकं, यस्याः सुमधुरकर-स्पर्शेन कमठपृष्ठकठिनमपि मानवानामन्तःकरणं कुसुम-पेलवीभूय सांसारिकजीवनं बहुविधामुन्नतिमानयति।

विद्यामन्तरेण न खलु काचिदुन्नतिर्भवितुमर्हति जनानाम्। संसारे यदा किल विशिष्टमुच्चपदस्थमर्थवन्तमधिगतसम्मानं वा मानवमवलोकयामस्तदैव प्रथमं तावत् तस्य विद्यावैभव एव निदानतया मनसि समापतति। सत्यमिह संसारे जन्मान्तरीय-सुकृतिवशादनधीतविद्या अपि कुत्रचित् कतिचिदेव मानवा मानिनो धनिनः समादृताश्च दृश्यन्ते, किन्तु कारणमेतत्तु सर्व्व-वादिसम्मतं यदेकया विद्ययैव जनः समृद्धः प्रसिद्धश्च भवितुमर्ह-तीति। विद्या नरं नीतिपथेन चालयति, इन्द्रियागोचरमति-सूक्ष्ममतिदूरस्थमपि वस्तु प्रत्यक्षवद्दर्शयति, बन्धुवत् सततमात्म-हितमादधाति, स्वजनपरिशून्ये दूरदेशे परं बलं सञ्चारयति, सौन्दर्य्यसम्पद्विहीनस्यापि सौन्दर्य्याधिक्यमानयति, संसारे न तावदीयती गौरवपदवी वर्त्तते, या न विद्यया समधिकर्त्तुं शक्यते। किं बहुना—सर्वं खल्विदं जगद्विद्यया स्ववशता-मापद्यते। सर्व्वविधसमृद्धिसम्पन्नो-ऽपि मानवो विद्यामन्तरेण

पशुरेव प्रतीयते। सुतरां विद्यया यद्यत् फलं साध्यते, न पुनरन्येनापि केनाप्युपायेन तत्तदधिगन्तुं शक्नुवन्ति।

यथाहुरार्यमिश्राः—

"विद्या नीतिकरी जगद्वशीकरी विद्या विशाला दृशः
विद्या बन्धुरसौ विदेशगमने विद्या परं सम्बलम् ।
विद्या नाम नरस्य रूपमधिकं विद्या च रत्नं महत्
विद्या गौरवकारणं त्रिभुवने विद्याविहीनः पशुः ॥"

अहो ! किमाकलयामो विद्यायाः माहात्म्यमेकयैव रसनया, सहस्रजिह्वेनापि वासुकिना सहस्रयुगमविरतकीर्त्तनेनापि न किञ्चित् प्रकटयितुं शक्यते विद्यागौरवम् । जले स्थले तथान्तरीक्षे चापि सर्व्वत्रैव तस्याः समानोऽधिकारः, उदकान्तरे विद्यामाहात्म्येनापि स्थलचरा मानवाः स्वेच्छाहारविहारं कुर्व्वन्तः हेलया कार्य्याणि सुसम्पादयन्ति। स्थले च परमाद्भुतानि लोकविस्मयकराणि विविधानि यन्त्राणि आविष्कृत्य अतिदुःसाध्यकार्य्याणि अनायासेन विदधति। बहुशतयोजनान्तरितानां स्वप्रियजनानां मुहूर्त्तद्वयेनापि ताड़ितप्रवाहेन वार्त्तां ज्ञातुं शक्नुवन्ति जनाः। एवमपि च वाष्पशकटार्णवपोतसौदामिनीदीप्तिप्रभृतयः मामकानां नयनपथे अहरहः एव व्याहरन्ति विद्याज्ञानफलम्। अन्तरीक्षे यदेव मनुजाः 'जेप्लीन्' नामकयानारोहणेन विहङ्गमा इव विचरन्ति,

तथा-ह्यवसहायकानि शतघ्निप्रभृतिविविधाग्नेयास्त्राणि तत्रावस्थाप्य समरप्रतिकूलं पक्षं निर्यातुमभियतन्ते, तदपि विद्याया एव गौरवमातन्वतीति यथार्थमभिहितं श्रीमता विष्णुशर्म्मणा ।

"सर्व्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्य्यत्वादनर्घत्वादक्षयत्वाच्च सर्व्वदा ॥" इति

अनुभूयते च तत्र तत्र गच्छद्भिः कोविदैर्वित्ताधिकं माहात्म्यं विद्यायाः, तथा हि गृहीतवित्तमनुजो बलवानपि दिनान्ते पाश्चात्यवारिधिमवगाहमाने विभाकरे, उदयमाने च तमाल-गर्व्वसर्व्वङ्कषश्यामलत्विषि तमसि भीतो भीतः पदे पदे शङ्क-मानश्चौरभयं मन्दं मन्दमारण्यकेन पाटच्चरेणेक्षुभङ्गं भज्यमानः स्वयमेव ददासि वित्तमित्युद्घोषपरिशूष्यमानमुखो अपहृत-समस्तधनो निरवशेषितकौपीनो, महदुःखेन यत्र कुत्रापि जिगमीषति ।

विद्यांसस्तु तस्मिन्नेव पथि गृहीतपाथेया निरङ्कुशं परि-भ्रमन्तो अपहर्त्तुमागतैरपि चौरैरिमे रिक्तहस्ताः साधव इति बहुमानपूर्व्वकं सूचितसुपथा वनश्रीविलासविलोकनजनित-हर्षोत्कर्षाः सोल्लासं परिक्रामन्तीति समुन्मिषत्येव विद्या-गौरवम् । किञ्च प्रजापालनलब्धवर्णा अपि भूभृतो नैकस्या विद्यायाः षोड़शीमपि कलां शक्नुवन्त्यधिगन्तुम् । यतः किल

राज्ञां बहुलपरिपन्थिनां स्वीयेऽपि देशे न नितरां प्रशंसावाप्तिः; किं पुनः रिपुशङ्कटेषु अन्येषु देशेषु ? विद्यायास्तु यावद्यावत् प्रतिपत्त्विजृम्भणं, तावत् तावत् प्रकाशन्ते प्रभाजालानि। यांश्च देशानधिवसन्ति संख्यावन्त उदञ्चयन्ति च परिमलभरितां वाचं तत्रैवाभिनन्द्यमानवचोवैभवाः प्रकाममाराध्यन्ते बहुभिरिति शोभनमुक्तं निखिलनयशास्त्रार्थदर्शिना मनीषिणा चाणक्येन—'विद्वान् सर्व्वत्र पूज्यते' इत्यादि।

न हि सुखं दुःखैर्विना लभ्यते ।

इह खलु संसारे 'सुखं मे भूयात्, दुःखं मे माभूत्' इति सततं दुःखं हातुं सुखञ्च लब्धुमभिलषन्ति जन्तवः। न हि किल दुःखस्योच्छेदमन्तरेण सुखस्य सम्भवः, तेजस्तिमिरयोरिव तयोः समानाधिकरणासम्भवात्।

दृश्यते तावदत्र यत् क्षुद्रं महदपि च कार्य्यमुद्यापयितुमिषुणा स्वल्पमनल्पं वा दुःखमन्तरेण न समासाद्यते कर्म्मणः शुभमयं फलम्। यथा हि तृष्णाविशुष्ककण्ठः कश्चिदुदकार्थी अध्वगमनजं दुःखमृते जलपानजनितं विमलानन्दमभिलब्धुं, न समर्थयते। तथाश्वमेधवाजपेयादियाजी नानाविधं काय-

क्लेशं शतशः कठोरं विधिबोधितकार्य्यानुष्ठानसम्भवं दुःखमनुभूय परिणामे इन्द्रचन्द्रादिपदवीं चिरममरावासवासं कल्पान्तस्थायि सुखञ्च समुपगच्छति। एवञ्च केनचन जन्ममरणाधिव्याधिजराजीर्णत्वमभिभवितुमिच्छुना महापुरुषरत्नेन कैवल्यार्थम् इन्द्रियान् विनिगृह्य, रिपूनभिभूय, प्रचण्डमध्याह्नमार्त्तण्डतापे समन्तात् सन्निवेश्य वह्निम्, गुरुकठोरेऽपि तुषारपाते सलिलमवगाह्य, ऊर्द्ध्वाधोविपरीतभावेन संस्थाप्य पादशिरसी, तथाविधानि अन्यान्यपि च कायक्लेशकराणि कार्य्याणि बहुजन्मनि समाचर्य्य अनन्तकोटिदुःखमनुभूय च आत्मानं साक्षात्कृत्य निर्व्वाणपदं लभ्यते। नितरां दृश्यते तावद् यद्यदेव हितमामनन्ति आर्य्यमिश्राः, न तत्तदधिगन्तुं महदपि वा लवमात्रं वा दुःखमन्तरेण न सुखयतितराम्। एवमपि च निसर्गत एव जन्तवः परिणामसुखाभिलाषिणः सन्तो दुःखसाध्यं कार्य्यजातं समनुतिष्ठन्तः सुखं लभन्ते। तत्र केऽपि दरिद्रा धनिकसुखाभिलाषिणः स्वयोग्यतामनुसरन्तः परिश्रमशीलाः क्षुत्पिपासादिगुरुकठोरक्लेशमगणयन्तः सागराम्बरां वसुधां पर्य्यटन्तो लब्धधना दुःखविनिमयेन धनिकसुखं लभन्ते, केऽपि वा पारत्रिकसुखैषिणो व्रतोपवासादिविधिविहिताशेषकार्य्यजातानुष्ठानक्लेशान्निरतिशयं दुःखं प्राप्य स्वर्गसुखं साधयन्ति। केऽपि च गुरुशुश्रूषापरवासाध्ययनादिक्लेशैर्लब्धज्ञानास्तीर्थादिपदवीं समासन्नाः पित्रादीनां निरतिशयामानन्दधारामुत्पाद-

यत्नो नानासुखं समनुभवन्ति । ध्रुवप्रह्लादहरिश्चन्द्रादीनां बहूनामेव राजर्षीणां पुराणाख्यायिकात्र प्रकृष्टप्रमाणम् ।

तथाच—आसीत् वेदप्रियो नाम कश्चिद्ब्राह्मण: भिक्षालब्धेन भक्ष्येण क्रमशस्त्रीणि दिनानि यावदतिथिं परिपूज्य नि:स्वो भूत्वा भूयो भिक्षया गृहस्थपीड़नं विसृज्य भिक्षाविमुख: फलमूलार्थी पत्न्या समनुगम्यमानो वनं विवेश । तत्र च कालवशादसौ कालभोगिना दष्ट: मृतश्च, ततस्तत्पत्नी शुभव्रतं नाम कुमारं प्रतिवेशिनो हस्ते समर्प्य सहमृताभूत् । ततो गच्छति काले स बाल: वयस्यसविधे स्वपित्रोरश्रुतपूर्वमुदन्तमाकर्ण्य बहुधा विललाप । ततस्तु निजदौर्भाग्यमालोचयन् जगदाश्रयं परमेशमाराधयितुं कृतसङ्कल्प:, उपनेतु: सकाशात् कावेरीतीरमाससाद । तत्र कृच्छ्रैरेव तपोभिर्भगवन्तमाराधयामास । ततस्तस्य तप:प्रभावेण समुपागतो नारायण: सुनृतया गिरा शुभव्रतं सन्तोष्य ब्रवीति—"उन्मील्य नयनं वत्स ! पश्य मे रूपमव्ययम् । अभीष्टं वृणु नो किञ्चिददेयं तुभ्यमस्ति मे ॥" इति । शुभव्रतश्च विगलिताश्रु: सगद्गदमाह—भगवन् समागतोऽसि ? त्वमतिकठोर: खल्वसि, पश्य मे दुर्दशाम्, तपोदु:खात् कङ्कालमात्रं शरीरं, त्वच्चरणसंस्पर्शने न मे करौ प्रभवत:, वाक् च सम्यक् प्रसर्तुं नालम् । घोरान्धकारतश्चावृणोति मे चक्षु: पिपासया नितरामर्दितोऽस्मि । इयमेव समुपस्थिता दीनस्य शेषदशा,

इत्थं क्लेश्यमानः शुभव्रतो निपपात। ततो हि भगवान् तमङ्के निधाय प्राह—हंहो वत्स, तपसा परतुष्टोऽस्मि, अत निखिलज्ञानविज्ञानादिसमग्रविभूतीनां त्वमेव आश्रयो भूयाः, इति वरं दत्त्वा ब्रवीति—अयि पुत्रक, तपःप्रभृतिसदनुष्ठानदुःखमन्तरेण कुतः सुखस्य सम्भवः? जगति यानि यानि पदानि सन्ति, तानि तपःक्लेशलभ्यानि इत्युक्त्वान्तर्दधे।'

वस्तुतः समवलोकयामो यदत्र राजधर्म्माधिकरणिकपदादारभ्य यान्यपि वर्त्तन्ते यशस्कराणि सुखमूलानि कार्य्यप्रपञ्चानि, तानि दुःखमृते न लभ्यानि। धर्म्माधिकरणिकपदप्रार्थी बहुकष्टार्ज्जितप्रचुरधनव्ययजनितं क्लेशं अध्ययनचर्चासमुत्थं दुःखञ्च सहित्वा पश्चात्तत्पदं लभते। इत्थमेव बहुशः वर्त्तन्ते दृष्टान्ताः, बाहुल्यभयेन परित्यक्ताः। अतः सुष्ठु तावदभिहितमाचार्य्यपादैः यत्—"न हि सुखं दुःखैर्विना लभ्यते" इति शम्।

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।

न लसति न सोत्साहेन कार्य्याणि विदधातीति अलसः, उत्साहरहितो जनः, तस्य भावः, आलस्यम्। आलस्यान्वितो नरः न जगतामात्मनश्च किमपि सौख्यम्, हितञ्चापि कार्य्यं

सुसम्पादयितुं प्रभवति! दृश्यते च जगत्यत्र प्रायश एव तादृक् मन्दभाग्यः, बाल्ये वयसि अनृतेन वचसा हितकामिनो गुरून्, स्नेहमयं पितरं, महीयसीं मातरञ्च प्रतार्य्य कृत्स्नं दिनं रुजाव्यपदेशेन किमपि वा करचरणहृद्रोगादिविविधदुर्द्दमनीय-व्याधेरुत्पत्तिलक्षणं कल्पयित्वा आत्मीयानां मनसि सुसमानयति स्ववियोगजं दुःखदैन्यम्। सम्भाव्य च तस्मान्निखिलस्नेहै-कायनस्य सुतस्य विच्छेदं पिता तस्य शिक्षायां सर्व्वथैव भवति मन्दादरः, तेन च प्राप्ते वयसि शिक्षाशून्यतया पदे पदे समनु-भूय दुःखं जठरदैन्यमपनेतुं न कथञ्चिदपि समर्थोऽस्ति स खलु वराकः। अत एव उन्नतिकामिनामवधारणार्थं कलकण्ठेन संगीयते नीतिशास्त्रचतुरचूड़ामणिना महापण्डितेन विष्णु-शर्म्मणा—

"षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥" इति

समवलोकयामो वयं इह तावल्लोके कोऽपि धर्म्मार्थं, कोऽपि वा अर्थसिद्धये, केचन कामाय, केचन वा मोक्षार्थं, केचित् त्रिवर्गहेतोः, केचिद्वा चतुर्वर्गफलप्राप्तये अल्पमनल्पं शरीरपातपर्य्यन्तमपि वा यतन्ते। तत्र यद्यपि दैवगत्या कश्चिद्विफलकामो धर्म्मार्थ-कामानां किञ्चिन्मात्रलाभात् पर्य्याप्तमिति मन्वानः परिभवति। कोऽपि वा यावत् प्रज्ञाबलं, यावच्च सामर्थ्यं, तावदेव यतन् भाग्यानु-रूपं फलं लभते, कोऽपि वा आमरणान्तं यतमानः अवशेषदर्शन-

लोलुप आस्ते। कश्चिद्वा निर्व्वाणार्थं धर्म्मार्थादीनपहाय मोक्षक्षेत्र-मारोहति इत्येवमुद्देश्यवस्तुनि प्रयतमानानां साधूनामुच्चपदवीमनुसर्त्तुमनलसः एव सर्वथा अधिकारो, किन्तु नानागुणसम्पन्नोऽपि अलसः किञ्चिन्मात्रमनुसर्त्तुं नार्हत्येव। अस्य च रिपोः प्रभावात् अङ्घ्रिवानपि खञ्जवदास्ते, धृतकरोऽपि नादत्ते, श्रुतिमानपि वधिरतां भजते, चक्षुष्मानपि नावलोकयति। प्रत्यक्षतोऽपि दृश्यते बुद्धिमानपि विद्यार्थी आलस्यप्रभावा-दध्ययनं परिहरन् तत्त्वोपदेशतः चिरं वञ्चितो भवति। नितरां यानि यानि खलु वर्त्तन्ते मनुजानामतिप्रकृष्टसुखा-वहानि कार्य्याणि, यानि च तेषामवश्यकर्त्तव्यानि तेषु तेषु सदा पराङ्मुखत्वेन क्षीणा भवति अतुरत्तमापि जीवनगतिः, प्रक्षीणञ्च संसारसुखं, नष्ट एवास्ते स्वजनस्नेहः, एवञ्च प्रति-कार्य्यं समासाद्य सुमहन्तमेव विघ्नमन्तर्दुःखेन भृशं ज्वलति शुष्ककाष्ठलग्नवह्निरिव कृत्स्नं जीवनम्। एवमपि च सर्व्व-सुखनिदानरूपेण स्वाधीनतासुखेन नूनं प्रवञ्चितो दुर्भाग्यः पर-मुखापेक्षितया स्वशरीररक्षणोपायपरिचिन्तनेऽपि घटते शिथिलप्रयत्नः, सुतरां क्षुधया पिपासया वा शुष्ककण्ठतालुरपि पादमेकमुपसृत्य सन्निहितं भक्ष्यं पानीयं वा ग्रहीतुं न समर्थोऽस्ति जाड्यभावेन। दृश्यते तावत् लौकिकव्यापारेषु यमेव शत्रुसंज्ञया परिगणयन्ति सभ्याः। स तु एकैकविषयमवलम्ब्य सूचयति अनर्थान्। तथाहि—एको विषयाधिकारेण, अपरश्च

स्वाधीकारपदवीं लब्धुमिच्छया, तथान्यः ऋद्धिमतः धनकलङ्कासेन, केऽपि निन्दया, केऽपि वा स्वार्थभङ्गबाधाशङ्कया परस्परं वैरायते, किन्तु ते हि सपत्नयः कति दिनानि, कति मासान्, कतिवत्सरान् वा विपक्षतामाचर्य्य स्वाभीष्टं प्राप्य किमु कालवशेन प्रतिनिवर्त्तन्ते, परन्तु आलस्यं नाम महानेव शत्रुः आबाल्यात् निधनं यावत् सर्व्वस्वमधिकृत्य इहामुत्र फले च वञ्चयित्वा लोकान् परमदुर्गतपथमधिरोहयति सर्व्वात्मना जगत्यमुष्मिन्।

दयादाक्षिण्यनम्रतादिभिरतिविनयो माणवको गुरुमुखाल्लब्धोपदेशोऽपि आलस्यसेवया प्रणिधानाभ्यासाचरणवैमुख्यादुपदेशसाफल्यं नापद्यते। तथाहि—

"इतरेषामिह गुणानामाधारे प्रियालसमाणवके च।
प्रयत्नादपि न्यस्तो न भविष्यति फलवानुपदेशः॥"

दैवगत्या प्राप्तश्रीः श्रियमभिलषन् वा अलसो जनः सर्व्वथा तया वञ्चितो भवति। अत्रास्ति विद्यापतिप्रणीतपुरुषपरीक्षायामेका हास्योद्दीपिनी उपकथा! तथाहि—

आसीन्मिथिलाप्रदेशे वीरेश्वरो नाम कश्चिन्मन्त्री। स च स्वभावाद्दानशीलः परमकारुणिकश्च सर्व्वेभ्यो दीनानाथातुरपङ्गुखञ्जबधिरासमर्थवृद्धेभ्यः प्रत्यहमिच्छाभोजनमर्पयति। तथा अलसेभ्योऽपि भोज्यं प्रयच्छति। तेन हि परमसुखेन ते

दनानि व्याहन्तत्रासते। अनन्तरं तेषां सुखं दृष्ट्वा वञ्चका अपि कृत्रिमालस्यं दर्शयित्वा तैः समं पिण्डं गृह्णन्ति। तदनन्तर-मलसागारे बहुद्रव्यक्षयं दृष्ट्वा तन्नियोगिपुरुषैः परामृष्टम्—'यदस्मत्प्रभुः दयया करुणया केवलमलसेभ्यः स्वामी वस्तूनि अर्पयति, तानि कपटेन निरलसा अपि परिगृह्णन्ति, तद्धि मामकानां प्रमादः। यदस्मद्दोषेण स्वामिधनं वृथा नष्टं भवति, तर्हि वयं प्रत्यवायिनो भवामः, अतः अलसपुरुषाणां परीक्षां कुर्म्मः' इति परामृश्य प्रसुप्तेषु तेषु अलसशालायां ते नियोगिपुरुषाः वह्निं दापयित्वा निरूपयामासुः। ततो गृहलग्नं प्रवृद्धमग्निं दृष्ट्वा धूर्त्ताः सर्व्वे पलायिताः। किञ्चिद्विलम्बेन ईषदलसा अपि निर्गताः, किन्तु, चत्वारः पुरुषाः तत्रैव सुप्ता अन्योऽन्यमाल-पयन्ति। एकेन पटाच्छादितवक्त्रेण उक्तं—'अहो! कथमयं कोलाहलः?' द्वितीयेनोक्तं—'तर्क्यते अत्र हि गृहे अग्नि-र्लग्नोऽस्ति।' तृतीयेनोक्तं—'य इदानीं जलार्द्रवासोभिः कटैर्वा अस्मानावृणोति।' चतुर्थेनोक्तं—'अहो! वाचालाः, कति वचनानि वक्तुं शक्नुथ; तूष्णीं तिष्ठथ।' ततश्चतुर्णा-मपि परस्परालापं श्रुत्वा प्रवृद्धं वह्निञ्चापि समवलोक्य वधभयेन चत्वारस्ते नियोगिपुरुषैः बहिष्कृत्य रक्षिताः। इति सुभाषितं परमविदुषो विद्यापतेः। यत्प्रभावेन जीवनपातमपि नागणयन्तः अलसाः, ततोधिकं किमिहास्ति हेयास्पदम्? सर्व्वापदामाश्रयस्थानञ्च? अतः साधु खलु कीर्त्त्यते, निखिल-

करतलामलकवद्दर्शिना नीतिज्ञेन—'आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः' इति ।

———

प्रीणाति यः सुचरितैः पितरौ स पुत्रः ।

जगत्यस्मिन् ययोरनुग्रहेणैव तनयाः सुखमयं संसारं सर्व्वसौन्दर्य्यनिदानं ज्ञानञ्च अधिकर्त्तुं शक्नुवन्ति । ययोरेव प्रयत्नेन स्वस्वभद्रं गृहीतुमपि प्रभवन्ति । ययोर्मन्दाकिनी-पूतधारा एव पवित्रस्नेहप्रवाहाः त्रायन्ते सुतान् कलुषसमूहात् । यौ हि स्वीयतनुक्षयसम्भवेनापि कर्म्मणा, हेलया सर्व्वस्वं विनिमयेन च सुखयितुं कामयेतेऽतिमात्रम् । यावेव क्षुधातृष्णाया च जठरदंदह्यमानावपि बिभृतः तनुजान् । यावेव च आजन्मार्ज्जितकष्टलब्धेनापि वैभवेन शिक्षायै कल्पयित्वा मनुष्यपदवीं समानयतः स्वाङ्गजान् । तौ परमकारुणिकौ पितरौ कल्पपादपाविव कठोरायामपि संसारकर्म्मभूमौ समुपदिशन्ति आर्य्य-मिश्राः । तयोरेव प्रत्यक्षदेवतयोरुपासनमपहाय यददृष्टचरं देवमुपासन्ते साधकाः, तद्धि तेषामज्ञानान्धता एव भूमिः । न चानयोः स्नेहेन समं किमपि वर्त्तन्ते विषयाः, अन्यान्यपि च निरुत्तमानि वस्तूनि, यत्तावत् पित्रोः स्नेहपवित्रधारायाः शतांशेन सह तेषामनुकर्त्तुं शक्नुवन्ति कथञ्चिदपि ।

यावदपोगण्डा एव वर्त्तन्ते अर्भकाः विषममृतञ्च तुल्यमूल्येन परिगृह्णन्ति, हितमहितञ्च परिकल्पितुं न प्रभवन्ति, तर्हि प्रतिनियतच्छायेव पश्चादनुसृत्य पितरौ रक्षतः निखिलपापात् । कठिनव्याधिग्रस्तेषु च तनयेषु अवस्थातिरिक्तेनापि धनव्ययेण सुयोग्यचिकित्सकान् विनियोज्य झटिति निरामयं कर्त्तुं समीहेते परमसंख्यानि दैवकार्य्याणि च समनुष्ठाय विपदमपाकर्त्तुं निरन्तरमेव यतेते । पुत्रसुखस्वाच्छन्द्यार्थं पिता वर्षातपादिस्वभावप्रभवं गुरुकठोरमपि कार्य्यमकरणीयामपि दस्युतस्करवृत्तिञ्च समालम्बितुं न कथञ्चिदपि वितर्कयति । इत्थं कति कति समाकलयामो महीयसीः पित्रोर्म्माहात्म्यम् । अनन्तयुगकीर्त्तनेनापि तयोः महिमानं व्यक्तीकर्त्तुं न समर्थोऽस्ति भोगिराजवासुकिरपि रसनासहस्रेण । तयोः परिचर्य्या स्वर्गद्वारमनन्तधर्म्मसमवायं कृत्स्नं तपसः फलञ्च समानयत्यतितरां, नवनीलनीरदनिर्घोषेणापि नितरां समवगायन्ति आर्य्यपादाः—

"पिता स्वर्गः पिता धर्म्मः पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्व्वदेवताः ॥
पृथिव्यां गुरुतरा माता गगनादुच्चतरा पिता ।" इत्यादि ;

अहो ! त एव धन्याः ये तावत् प्रत्यक्षदेवतयोः पित्रोः प्रीतिमुत्पादयितुमर्हन्ति । समवलोकयते च पिता पुत्रार्थं कां कां नाम निकृष्टां वृत्तिमनभ्यस्तां क्रियाञ्च नाधि-

गच्छति ? असीमविलाससामग्री-सुसज्जित-हर्म्यतलवासी अपरिमितानुगतदासदासीजनजुष्टो धनेश्वरः नानाविधबहुसुखसम्भोगपरोऽपि च ऋते पुत्रप्रीतिं सम्यक् तदनुभवितुं नालम्, अपि तु नितरामनिर्वृत्तिमेवालम्बते । अपि चेत् लभते तदनुपमं पुत्ररत्नं दैववशात् तन्निरन्तरं परिहाय स्वसुस्पृहां तमेव सुखयितुं समीहते समन्तात् । सत्यपि सेवकजने स्वयमेव तत्परिचर्य्यापरोभूत्वा आत्मानं बहु मन्यते । दीनस्तावद् आयासबाहुल्येन स्वोदरपूर्त्तिं कुर्व्वन् भिक्षालब्धेनैवान्नेन प्रतिपालयितुकामः कामयते सर्व्वथा पुत्रम् । ईदृशयत्नबाहुल्यलब्धोऽसौ तनयः कीदृशलक्षणलक्षितः पितॄणामानन्दमातनोति सम्यक् तन्निश्चेतुं वयमसमर्थाः स्मः । शास्त्रवाक्यं पुनर्जीवतो वाक्यपालनं, मृततिथौ विप्रेभ्योऽन्नप्रतिपादनं, गयायां पिण्डदानम् । तथाहि—

"जीवतो वाक्यपालञ्च मृताहे भूरिभोजनम् ।
गयायां पिण्डदानञ्च त्रिभिः पुत्रस्य पुत्रता ॥" इति

हन्त ! खलु महतो महीयसः पितुरविचारितैवाज्ञा परिपालनीया पुत्राणाम् । पिता हितमहितं वा युक्तमयुक्तं वा कठोरमकठोरं वा नययुक्तमनयपूर्णं वा यद्यदादिशति, तत् सर्व्वथा विधातव्यं पुत्रैः । पित्राज्ञानुसंशीलयतस्तनयस्य वचनमिदम्—

"पितुर्हि वचनाद्देवि, पतेयमपि पावके।
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे॥" इति

न चैषा साधारणी वाणी, न चानन्यसाधारणं महत्त्वम्; यत् श्वस्तनं यौवराज्याभिषेकमपहाय रामचन्द्रस्य तादृशी वचनप्रवृत्तिः। धन्यो रामचन्द्रः! धन्या तस्य पितृभक्तिः!! अपरस्य सोमवंशप्रसुतस्य शान्तनुनन्दनस्य भीष्मस्य पितृसन्तोषार्थमविचलितभावेन ससागराया धरण्याः परित्यागः स्मारयति पित्राज्ञानुवर्त्तित्वम् जनानां मनांसि अतिमात्रम्। तृतीयतः क्षत्रियकुलचड़ामणिः पूरुरेव समाकर्षति चेतनानां चेतः। स तु यौवनसुलभं सुखजातं तृणवन्मन्यमानः पितुर्य्ययातेर्ज्जराग्रहणेन तमतितरामतर्पीत्। पित्राज्ञानुवर्त्ती तनयः स्वर्गराज्याधिगतोऽपि रौरवचरः, महाधनेश्वरोऽपि दीनहीनः, सर्व्वसौभाग्ययुक्तोऽपि मन्दभाग्यः। येन हि निखिलगुणोपेतस्य जनकस्य वचनपरिपन्थी स खलु वराकः। यस्य ईषदपि निश्वासपवनः प्रपञ्चयति कलुषपुञ्जमात्मजस्य। शास्त्रवाक्यं तावत् पुन्नामनरकपरित्राणात् मातापित्रोः पुत्रतासंपादानात् पित्रोरवशिष्टकर्म्मसम्पादनाच्च पुत्रत्वं विज्ञापयति। यथाहि—

"पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः।
तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयम्भुवा॥" इति

तेषु पुनः किं लक्षणमस्माभिः स्मर्त्तव्यमिति चिन्तनीयम्, सद्यः प्रसूतपुत्रस्य मुखसन्दर्शनादेव नरकत्राणं पुनरस्मादृशाम-

दुष्टचेतसां स्मर्त्तुमयोग्यम् । देहावसानात् परं पिण्डदानादिभिः पितृतृप्तिसाधनमपि कर्म्मणामतिशयितानामसाध्यत्वात् तत् सुसम्पन्नं स्यान्नवेति महानसौ संशयः । अतो मन्यामहे सर्व्वथा-विचलितभावेन शास्त्रवाक्यमनुस्मर्त्तव्यं सत्पुत्राणां यत्— "प्रीणाति यः सुचरितैः पितरौ स पुत्रः" अथवा 'पिता स्वर्गः पिता धर्म्मः' इत्यादि । कृतमधिकवाक्प्रपञ्चेन, इति ।

परोपकरणं कायादसारात् सारमाहरेत् । *

परोपकरणं किल विपन्नानां तथा दुर्गतानामपि उद्धरणम् । ये तावन्महान्तः जरामरणसङ्कुले संसारसद्मनि जलबुद्बुदोपमं जीवितमासाद्य परार्थे सर्व्वस्वमर्पयन्ति, ते हि दयावतारा नरविग्रहरूपैरमरपुरविलासिनो वपुष्मन्तः धरामलंकुर्व्वन्ति। ते च कायेन मनसा वाचा तथा अन्येनापि येन केनचनोपायेन परान् सन्तोष्य आत्मानं बहुमन्यन्ते । त एव खलु धन्याः महाजनगणैरभ्यर्च्चचरणाः सार्थकजन्मानो महापुरुषाः । अन्ये

* परोपकाराय सतां विभूतिः ।

ये पुनः स्वार्थसिद्धिमभिसन्धाय परदुःखमपाकर्त्तुमभिलषन्तः, तेऽपि किल कियतीं साधुपदवीमनुगन्तुं प्रभवन्ति। धार्म्मिकगणनायां तेषां नामानि च नयनपथे समवर्त्तन्ते सामाजिकानाम्। दृश्यते तावत् स्वार्थलेशपरिशून्यानां परसन्तुष्टमात्रोपचितमनसां विधातुः नियमशृङ्खलेन कालैर्द्दिनैर्हायनैर्व्वा समुपजायते तेषां सार्थाधिकापि विपुला सिद्धिः। न चापि सुखदुःखमयेऽस्मिन् संसारे तादृशा एव संख्यावन्तो विरलाः, ये पुनः सत्शिक्षामाहात्म्येन अन्यदीयार्थे आत्मानं बलिमुपहर्त्तुं नार्हन्ति। केचन निसर्गत एव दयाप्रवणहृदयाः जातिं स्थानं पात्रमपात्रञ्च नासमीक्ष्य आर्त्तदुःखमपनेतुं यतन्ते। आहुस्तावदार्य्यपादाः—

"ते वै सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये
तेऽमी मानुषमध्यमाः परहिताः स्वार्थाविरोधेन ये।
ते वै मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥"

इह तावच्चक्रनेमिवदेव सुखदुःखैः संपृक्तमाने जगति न कस्यापि भागधेयस्य कल्पने न सुखं दुःखं वा चिरमवतिष्ठते। न वा एकदा यः परमदुर्गतः, अन्यदा स तथाविध एव संवृत्तः। उक्तञ्च—

"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥" इति

यद्यप्येवम्भूतेस्संसारे एकस्य व्यसने अपरः सहानुभूतिमास्थाय स्वीयसामर्थ्यानुरूपं यतते। तर्हि तस्य विपदि सोऽपि यथाशक्ति-साहाय्यं विधास्यतीति जगतो नियमः। किन्तु अशेषगुणास्पदोऽपि स्वार्थपरः सर्व्वथैव घृण्यते परमविधेयैराचार्य्यमिश्रैः। नितरां सर्व्वेषामेव परोपकरणमवश्यमेवावलम्बनीयम्। इह तावत् वर्त्तन्ते धर्म्मार्जनार्थं यावन्ति वर्त्मानि परोपकरणं हि तेषामेकतममतिप्रशस्यं वर्त्म। परोपकारिणो मृता अपि सुमनस इव जगत्यत्र राजन्ते। किं बहुना परममङ्गलमयस्य भगवतो नामनिकरेण समं परोपकारिणामृतुपर्णयुधिष्ठिरनल-प्रभृतिभूपालानां नामानि संकीर्त्त्य विभावरीं सुप्रभातां मन्यन्ते मनुजाः। उक्तञ्च—

"शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम्।
शरीरं क्षणविध्वंसि कल्पान्तःस्थायिनो गुणाः॥" इति

परदुःखं हातुमभिलषन्तो महान्तः जीवनपातसम्भवतोऽपि कर्म्मणो न विरतिमालभन्ते। तथाहि—

एकदा राजाधिराज उज्जयिनीपतिर्महात्मा विक्रमादित्यः स्वसचिवेषु धराभारं निधाय यतिवेशेन पर्य्यटन् कदा कस्मिंश्चिन्नगरोपकण्ठे भागिरथीतीरधौतपाददेशं किमपि देवायतनमगच्छत्। तत्र देवगृहे बहवो महाजनाः पौराणिकात् पुराणं शृण्वन्ति। राजापि नद्यां स्नात्वा देवालयमुपगम्य देवं

नमस्कृत्वा महाजनान्तिके उपविष्टः। तस्मिन् समये पौराणिकाः पुराणवाक्यानि पठन्ति—

"अनित्यानि शरीराणि विभवो नैवशाश्वतः।
नित्यं सन्निहितो मृत्युः कर्त्तव्यो धर्म्मसंग्रहः॥
श्रूयतां धर्म्मसर्व्वस्वं यदुक्तं ग्रन्थकोटिभिः।
परोपकारः पुण्याय पापाय परपोड़नम्॥"

इत्यादि पुराणकथनसमये कश्चित् स्थविरो ब्राह्मणः भार्य्यया सह नदीमुत्तरन् दैवगत्याम्भसि निपतितः। महापूरेण नीयमानो हाहाकारं कुर्व्वन् नदीमध्ये स महाजनान् प्रति वदति—'भो भो महाजनाः, धावध्वं धावध्वं वृद्धः सपत्नीको ब्राह्मणोऽहम् नदीप्रवाहेन बलात् नीयमानः। कोऽपि सत्त्वाधिको धार्म्मिको मम सपत्नीकस्य जीवनदानं करोतु, इति जले नीयमानस्य दीनध्वनिं श्रुत्वा महाजनाः सर्व्वेऽपि सकौतुकं पश्यन्ति, परं न कोऽपि नदीमध्ये प्रविश्य प्रवाहादपनेतुं तस्मै अभयं प्रयच्छति। ततो राजा विक्रमो 'मा भैषीः' इत्युक्त्वा नदीमध्ये पत्न्या सह ब्राह्मणं महापूरादाकृष्य तटभूमिमनयत्। ततो ब्राह्मणः स्वस्थीभूत्वा राजानमाह—'भो महासत्त्व, मदेतच्छरीरं प्राक् मातापितृभ्यामुत्पादितम्, इदानीं तत्त्वो द्वितीयं जन्म प्राप्तम्। अतः किमपि ते प्रत्युपकारः करणीयः। न चेत् अनन्तकालं मे रौरववासः स्यात्। नितरां पुण्यतोयाया गोदावर्य्या उदकमध्ये द्वादशवर्षपर्य्यन्तं मन्त्रजपस्य पुण्यं तेऽद्यदीयते।

अन्यच्च, यत्त्वाच्छ्रचान्द्रायणादिना किमपि सुकृतमुपार्ज्जित-मस्ति, तत्सर्व्वं गृहाण' इत्युक्त्वा महावाक्येन तत्पुण्यं भूपतये समर्प्य आशिषञ्च दत्त्वा पत्न्या समं निजस्थानं गतः। अत्रान्तरे अतिभीषणः कायः कोऽपि ब्रह्मराक्षसः राजसमीपमागतः तम-वलोक्य भूपतिः साश्चर्य्यमाह—'भो भो महासत्त्व, कोऽसि-त्वम् ?' तेनोक्तम्—'अहमत्रैव नगरे कश्चन ब्राह्मणः निरन्तरं गुरून्, साधून् महतश्च दूषयामि, तद्दुष्कृतिवशेनैव अस्मिन् अश्वत्थपादपे ब्रह्मराक्षसो भूत्वा अत्यन्तदुःखितो दशवर्षसहस्रं तिष्ठामि। अद्य भवतः प्रसादादुत्तीर्णो भवामि' इत्याकर्ण्य स भूपतिः तदेव पुण्यं तस्मै अदात्। सोऽपि राक्षसः तेन पुण्य-चयेन स्वकर्म्मणस्तीर्त्वा दिव्यरूपं परिगृह्य विविधकागुपन्या-सेन राजानं स्तुत्वा दिवं गतः। भूपतिरपि स्वनगरमगात्।

वस्तुतः परोपकारिणां जगत्यत्र अर्थिभ्यः सर्व्वस्वदानम् उत जीवनार्पणपर्य्यन्तमपि शतशो दृश्यते दृष्टान्तः, नितरां "परोप-करणं कायादसारात् सारमाहरेत्" इति यदुक्तं तदतिशोभनमति-समीचीनमनन्तसत्यञ्च वचः सुसूक्ष्मदर्शिनामिति कृतं बाहुल्येन।

विनयो भूषणं महत्। *

विनयो हि नाम चेतनानां चित्तोत्कर्षज्ञापको धर्म्मविशेषः। स खलु सर्व्वेष्वेव गुणगणेषु गरीयान्। तेन परिहीनो नानागुणविमण्डितोऽपि विचक्षणः गर्हत्वमिवावहति प्रेक्षावताम्। यैरेव गुणचयैः पुरुषा जगत्यत्र श्रेष्ठपदवीं भजन्ते, ऋते च विनयं ते हि तेषामपकर्षमेव ज्ञापयन्ति। विनयी तावत् सर्व्वासु अवस्थासु तथा सुखेषु दुःखेषु वा तुल्यरूपेण समाकर्षन्ति परेषां मानसबलम्। स च विद्यया तथा वैभवेन विधुरतोऽपि स्वीयासाधारणविनयगुणेन परान् नियम्य सर्वथात्मवशमानेतुं प्रभवति। स्वदेशेषु विदेशेषु च तस्य समानोऽधिकारः। किन्तु विनयहीनस्य सन्त्यपि च विविधगुणग्रामाः, वर्त्तन्ते चापरिमिताः अर्थाः, तथापि ते हि केवलं मुधैव किंशुककुसुमानीव दूरत एव सुसम्पादयन्ति दर्शकानां नयनानन्दधाराम्। वस्तुतो विनयविवर्ज्जितं नरं गर्व्वप्रतिमूर्त्तितया परिकल्पयन्ति सज्जनाः। यथैव च स्त्रीगुणचयैर्व्विवर्ज्जिता कामिनी महार्घरत्नालङ्कारविमण्डितापि न सुखयति केषामपि चेतः, परं स्वकीयविघ्नकूटिकेन पदे पदे समावहति क्लेशम्। तथैव विनयपरिहीनस्य संसारकार्य्यनिबन्धेषु घटते महत्येव

* विनयस्य तुल्यो गुणो नास्ति।

विड़म्बना, सम्भवति च तस्मादेव सर्व्वानर्थस्य सूचना, समुपजायते ततोऽपि जीवनपातः। तथा च निखिलविभूतिसमन्वितस्य सृष्टिस्थितिप्रलयकारिणो भगवतो नारायणस्य कुलसत्तमाः प्रख्यातशौर्य्यवीर्य्यबलान्विता यादवाः पुरा किल तपोधनं महर्षिदुर्व्वाससमविनयेनावमत्य तदभिशापेन परस्परं विरोधमुत्पादयन्तः समूल-मन्तकपुरमवापुः। तथा पुनः सर्वसमृद्धिसम्पन्नाः महाहवविजयिनः प्रवलबलवाहनाः दुर्य्योधनादयः कौरववीरमुख्याः केवलमविनयदोषेणैव अपूर्णेनैव संसारसुखेन कालकवलिताः बभूवुः। अन्ये च शिशुपालदन्तवक्रादयोऽपि समरकुशलिनोऽपरिमेययोद्गुणविमण्डिताः महीपालाः विनयहीनतया अकाले परेतराजभवनातिथित्वमुपययुः। इत्थमेवाविनयस्य परिणतिं समवलोक्यामनयन्ति सज्जना यत् प्रभूतपयसि लवमात्रमपि गोमूत्रं तावन्ति दुग्धानि दधित्वेन परिणमयति। तद्वदेव प्रभूतगुणसत्त्वेऽपि अन्तरेण विनयं पुरुषं विकृतिमानयन्ति शरीरसहजा मानवधर्म्माः। वर्त्तते किल गुणरत्नस्य विनयस्य तथैव दिशाविकाशः, तथा हि—

"गौरवं गुरुषु स्नेहं नीचेषु प्रेमबन्धुषु।
दर्शयन् विनयो धर्म्मः सर्व्वप्रीतिकरो भवेत्॥" इति

अत्र गुरुजनेषु गौरवं तावत् वयोवृद्धजनान् प्रति यथोचितसम्मानप्रदर्शनम्, तेषामाज्ञानुवर्त्तित्वम्, सुनृतेन वचसा तैः

समं संलापः, कुलवृद्धानां तथा राजपुरुषाणामनुद्धतवाग्वैभवैरभ्यर्थना, तदन्तिके चापल्यपरिहारः; वयःकनिष्ठान् प्रति नयधर्म्मकथनं हितानुकीर्त्तनञ्च, एकस्य दुःखमपरेण स्वमिव परिगणनीयम्, सततं सदयव्यवहारः; बन्धुषु कापट्यवर्ज्जनम्, तेषामभावे आत्मनोऽपि अभावबोधः, सुखे दुःखे च समे कृत्वा एकात्मनोः विभिन्नवपुर्भ्यां संसारकार्य्यनिर्वाहनमित्यादिभिस्तावत् परिव्यज्यते विनयविभूतिः, विनयान्वितस्य पुरुषधौरेयस्य। विनयः किल न कमपि लघयति, नवा खर्व्वयति, किमपि वा पदमर्य्यादातः परिवर्ज्जयति, परं सर्व्वासु अवस्थासु ततः उन्नततरामेवावस्थां घटयति। दृश्यते तावदत्र निकृष्टस्थानजनमभिलभ्य विनयमाहात्म्येन जनसमाजशीर्षस्थानमलंकरोति लोकः। पुरा नैमिषारण्ये महर्षिणोपेतमाश्रमपदं सूतमुखादुद्गतेन पुराणवचसा मुखरितमासीत्। वर्त्तमाने च बहवः एव निकृष्टस्थानसम्भवाः विनयभूषणमण्डिताः साधवः अव्याहतप्रभावेन शासति सामाजिकानां पदम्। द्वापरे अजातशत्रोर्म्महाक्रतौ निखिलगुणैश्वर्य्यवता श्रीमन्नारायणेन ब्राह्मणानां चरणधौतमकारि। एवञ्च यूरुपादीनां पुराणवार्त्तापर्य्यालोचनावसरे समवलोक्यते अस्माभिर्यन्महापुरुषधौरेयेण योशुना कदा शिष्यवर्गाणां पादप्रक्षालनार्थमुदकमदायि। तेन सङ्कोचितान् विपदमपि गणयतः शिष्यान् सुनृतेन वचसा प्रतिबुध्य परमा प्रीतिरापेदे। नितरामबाधमगर्हितमविसंवादितञ्च

वचः यद् विनय एव राजाधिराजचक्रवर्त्तिनां शीर्षचुम्बिमुकुटापेक्षया समधिकार्घसम्पन्नं भूषणमिति । दृश्यते तावत् महापुरुषचरितादौ, समवगम्यते च लोकव्यवहारतः विनयमन्तरेण न विमलां शान्तिं नापि वा परमाभ्युदयपदवीमधिकर्त्तुं शक्नोति लोकः । अत एव यदुक्तम्—'विनयो भूषणं महत्' इति सुभाषितं कस्यचित् संख्यावतः तदतिसत्यमतिहृद्यमतिशयश्लाघनीयञ्च वचः, इति कृतं बहुभाषणेन ।

यो ध्रुवाणि परित्यज्य अध्रुवाणि निसेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥

इह किल संसारे आशा नाम किमपि परमरमणीयं सत्वङ्गतमतिहृद्यञ्च वस्तु । सा चाशा स्वप्रभुधर्म्मेण सर्व्वेषामेव चेतनानां चेतः आयत्तीकृत्य विनश्वरेऽपि निखिलराज्ये त्रिदिवसन्ततिरिव जनान् परिपालयति । किमहो ! यद्यप्याशानाम कापि मनुजानां ललितदर्शनातिपेसला विश्वस्ता सहचरी नाभविष्यत्, तर्हि सुजला सुफला शस्यश्यामलाशेषप्रीतिविधायिनी धरापि ऊषरभूरिव कर्कशभावेनापीड़यिष्यदनुक्षणं जन्तून् । दृश्यते तावदाक्षुद्रान्महत्पर्य्यन्तमपि कृत्स्नं जगदैन्द्रजालिकक्रीड़ासाम्येन सा:

विस्मयमातनोति, प्रतारयति च कुलटेव विश्वस्तहृदयम्। क्वापि वा दीनहीनमूर्द्धनि दापयति राजाधिराजचक्रवर्त्तिनः शिरस्त्रम्। कदा सा शान्तमधुरदर्शना, कदापि घोरभीषणविग्रहा, विभीषयते वा कदा अव्याहतप्रभावस्य भूभृतोऽपि शासनदण्डम्। धन्या आशा! धन्यं ते कुहकम्!! संसारेऽस्मिन् राजानो धनिनो वा भिक्षवोऽभिक्षवो वा उदासीना गृहिणो वा सर्व्वान् प्रति ते समानो दृष्टिपातः। आशाबन्धनेन पुत्रशोकातुरा माता गुरुकठोरेष्वपि दुःखेषु विस्मारयति मृतपुत्रमुखं, धारयति च दुर्विसहं देहम्। आशाप्रणोदिता च मुहूर्त्तं पतिविच्छेदमसहमाना कुलवधूरपि भाविसुखाशया प्रेषयति पतिं दुष्पथमपि देशम्।

एवञ्च दृश्यते तावत् लोकव्यवहारेषु 'इदं मया लब्धम्, अपरमपि लप्स्ये' इति निश्चिन्वानाः सर्व्व एव प्राणिनोऽभिकाङ्क्षन्ति निरन्तरम्। भूभृतः परराष्ट्रं विजित्य, ऋद्धिमन्तो धनकनकादिव्यवसायतः, एके धनिसेवया, अपरे भिक्षया वा स्वं स्वं प्रवर्द्धयितुमतितरां यतन्ते; किन्तु एतेषामर्थार्थमतिप्रयतमानानां निखिलजनानामेवावश्यमिदं प्राप्तव्यमिति निश्चयात्मिका बुद्धिः स्वाभीष्टफललाभस्य प्रकृष्टा सरणीति नास्ति तस्मिन् किमपि वाच्यं वचः।

अपि नाम दुराशाप्रणोदितो य एव स्वल्पायासलभ्यं सद्यः प्राप्तमकिञ्चित् करं कपर्द्दकमपहाय बहुतिथे काले वा प्रभूतार्थ-

प्राप्तये मनोऽभिनिविशयति, विधिवशात् प्राय एव स लब्धवस्तु-भ्रंशनात् परमदुःखितोऽतिशयक्लेशमनुभवति । तथाहि--

अस्ति कस्मिंश्चिद्वनोपकण्ठे कोऽपि स्थविरकाष्ठिकः । स च स्वभावदारिद्र्येण कथं कथमपि कष्टेन काष्ठानि संछिद्य स्वजनान् परिपालयति । अथैकदा परशुहस्तेन स समुद्ररोधसि गत्वा कुठारेण पादपं कर्त्तितुमुपचक्रमे । परं दैवगत्या तस्मिन्नेव क्षणे हस्तात् भ्रष्टः परशुः अम्भसि पतित्वा चक्षुरविषयोऽभवत् । तेन स परमनिर्व्विसः उच्चैः क्रन्दितुमारेभे । तत् परिवेदनं श्रुत्वा जलाधिपतेस्तं प्रति निरतिशया रतिरुपजाता । तस्माच्च यादःपतिस्तस्यान्तःकरणपरीक्षार्थं प्रथमतः शातकुम्भविनिर्म्मितं परशुमेकं गृहीत्वा तत्समीपमेत्य ब्रवीति स्म—'भद्र, किमयं ते कुठारः ?' सोऽप्याह—'हंहो ! दयावतार, नहि नहि ममायं कुठारः, स तु भाग्यवशेनाद्य नष्टः ।' तदाकर्ण्य स पुनरम्भसि निमज्ज्य द्वितीयक्षणेन रजतनिर्म्मितमपरकुठारं गृहीत्वा तस्य पुरतः पुनरागत्य ब्रवीति—'साधो, किमयं ते नष्टकुठारः ?' स पूर्व्ववदेव ब्रवीति—'हे ममोपकारमिच्छो,' मायं स कुठारः, स तु अयोनिर्म्मित एवासीत् ।' तदाकर्ण्य जलाधिपतिर्भूयः सलिलं गत्वा लौहमयकुठारमादाय तदन्तिकमागम्य ब्रवीति स्म—'अयं किं तव कुठारः ? स काष्ठकृत् तमतिप्रणिधानेनावलोक्य सगद्गदमाह—

हे मदेकसदय, कृतोपकारिन्, वाढ़मयं मे स नष्टः परशुः ।

चेन्मयि करुणा तर्हि प्रत्यर्पताम्।' तस्य काष्ठकृतः तादृशं सरल-भावं तथा लोभराहित्यञ्च परिज्ञाय सः जलाधिपतिः निरतिशय-मानन्दमनुभवन्, तस्मै स्वर्णरजतमयौ द्वावेव कुठारौ प्रत्यर्पित-वान्। स तौ गृहीत्वा यावद् गृहं प्रति गतः, तावत् कश्चित् प्रतिवेशी तत्कुटीरमेत्य समुद्रतीरगमनात् कुठारद्वयप्राप्तिं यावत् समस्तमुदन्तमाकर्ण्य परेऽह्नि कुठारहस्तः समुद्रतीरं गत्वा स्वेच्छापूर्व्वकं कुठारमम्भसि निःक्षिप्य कपटप्रबन्धेन उच्चैः क्रन्दितुमारेभे। ततः तस्य रोदनमाकर्ण्य जलदेवता तमेत्य ब्रवीति—'भद्र, किन्ते शोककारणं किमर्थं वा तारेण स्वरेण रोदिषि?' सोऽतिसम्भ्रमं प्रदर्श्याह—'महाभाग, अहमत्यन्त-दुर्गतः, परशुना काष्ठं संछिद्य कथंकथमपि कष्टेन स्वोदरं पूरयित्वा, जीवनं धारयामि किन्त्वद्य दैववशेन मे हस्तात् च्युतः परशुरप्सु विनष्टः। तेनाहं रोदिमि, नास्ति किमप्यन्यत् रोदनस्य कारणम्' इत्याकर्ण्य सलिलपतिः तं परिक्षितुं पूर्व्ववत् पुनर्जले निमज्य विशुद्धहेमसम्भवं परशुमेकं गृहीत्वा समीप-मेत्य ब्रवीति स्म—'अपि एष ते कुठारः?' सोऽपरिजानन् पूर्व्वोक्तकाष्ठिकस्य हेमरौप्यकुठारप्राप्तिमार्गं नितरां जलाधिपते-र्व्वाक्योच्चारणमात्रमेव साग्रहं—'अयमयं भोः, स मे नष्टपरशुः' इत्युक्त्वा यावत् करौ प्रसार्य्य ग्रहीतुमुपचक्रमे; तावत् सा जल-देवता तस्य धूर्त्ततामवगम्य किञ्चिद्दूरं गत्वाम्भसि निमज्यान्त-र्दधे। ततोऽसौ कृत्स्नं दिनं विलप्य यदा पुनर्नकोऽपि समा-

यातीत्यवालोकयत्, तदालब्धाशयालब्धस्वकुठारक्षयजनितदुःखेन स्वीयभाग्यं निन्दन् गृहं प्रति चलितः इति।

दृश्यते तावदिह जगति य एव निश्चितार्थमपहाय अनिश्चिते यतते, तस्य इत्थम्भूतैव विड़म्बना सर्व्वथा प्रतिपद्यते। तदुपजीव्यकाककूर्म्ममूषिककथाच्छलेन महानीतिज्ञेन श्रीमद्विष्णुशर्म्मणातिसुन्दरी उपकथा विरचिता, पाठार्थिनां धैर्य्यच्युतिसम्भवतया परित्यक्ता। तत् कथाविषयिणी च इयमेव सुभगावाणी तस्य पण्डितकुलवरेण्यस्य—'यो ध्रुवाणि परित्यज्य' इत्यादिरिति कृतं बाहुल्येन।

उपायं चिन्तयेत् प्राज्ञस्तथापायञ्च चिन्तयेत्।

जगत्यत्र परिणामचिन्ताकुशलिनो महान्तो भाविनि यद्भाव्यम्, तत् सर्व्वं प्रागेव विनिश्चित्य कर्म्मणि प्रयतन्ते। न केवलं विषयं समीक्ष्य ते प्रचोणदृश इव कार्य्येष्वन्तरायसमापतनादेव विफलाः कार्य्येषु विरक्तिप्राप्तियोग्यं कञ्चनभावमुपादधति। परिणामचिन्तायाः सन्ति बहव एव सुखावहाः गुणा, तथाहि—यद्यपि केष्वपि कार्य्येषु संप्रवर्त्तमानाः केचिदपरिणामसमीक्ष्यकारिणो मानवाः, ते हि साधारणविपत्पातेन सुमहन्तमन्तरायं मन्यमानाः सातिशयमुद्विग्ना अकाण्डे कार्य्य-

जातं विन्यस्य परिणामे क्लेशभागिनो भवन्तीति प्रतिनियत एव निखिलजनानां कार्य्यसंघेषु सुव्यक्तमेवावलोकयामः। एवमपि च यदि तेषां भाग्यविपर्य्ययेण स्वानुष्ठितकार्य्यमध्ये सुमहानन्तरायो घटते, तर्हि ते कथं कथमहो एतस्मात् समुत्तीर्णा भविष्याम इति चिन्तापर्य्याकुलितमानसः तत्प्रहाणोपायचिन्तनेन दीर्घदिनमतिवाह्य स्वकर्त्तव्यतः स्खलिता इति प्राय एव दृश्यते। परिणामचिन्तापाटवो हि प्राज्ञाः अपरिणामदर्शिनां वैपरीत्यमेव सततमुपगच्छन्ति। ते हि यथायथमुपायमुद्भावयन्ति, तथातथा अपायमपि परिचिन्त्य नूनं शृङ्खलया निर्व्वाहयन्ति आत्मनः इतरेषामपि क्षुद्राणि महान्त्यपि च कर्म्माणि। समवलोकयामो वयं यद्धर्म्माधिकरणेषु ये खलु व्यवहारशास्त्रार्थदर्शिनः सुविचक्षणाः ते नूनमग्रत एव समालोचनीयविषयस्य ये ये अपायाः सम्भवन्ति, तान् सुचिन्त्य विपक्षवादप्रतिषेधोपायञ्चापि स्थिरीकृत्य स्वप्रज्ञया विपक्षपक्षान् पराजित्य आत्मनः पक्षं प्रभुपदे स्थापयन्ति। उक्तिमिमामुपजीव्य सकलार्थशास्त्रपारंगतेन श्रीमता विष्णुशर्म्मणा निर्म्मिता काचिद् बालककौतुकविधायिनी उपकथा, या हि प्रतिपदमेवातनोति रसधारां बालश्रोतॄणां श्रवणविवरे अतिमात्रम्। तथाहि—

निवसन्ति तावदुत्तरापथे गृध्रकूटाद्रौ रेवासरिच्चरणचुम्बितशैकतस्थलसंस्थं न्यग्रोधपादपमधिकृत्य बहवो बलाकाः। एवमपि च तिष्ठत्यत्र तत्पादपपाददेशे विवराभ्यन्तरे हरगल-

गरलसन्निभो महानेको विषधरः। स च तत्रत्यपतत्रिणां बालापत्यानि कवलीकृत्य निरतिशयसुखमनुभवन्नास्ते। परन्तु येषामपत्यानि खादितानि ते परमनिर्व्वेदमालभमानाः इतस्ततो विलापेन मुखरीकृतां काननभूमिम्, तदाकर्ण्य केनचन वृद्धवकेनोपदिष्टम्—भो भो नष्टप्रजा विहङ्गमाः, एवं कुरुत यूयं, मत्स्यानानीय नकुलविवरादारभ्य मामकशतुबिलं यावद् एकशो मत्स्यान् पंक्तिक्रमेण संस्थापयत। ततस्तल्लुब्धकैः आहारवर्त्मना नकुलैरागत्य भुजगो द्रष्टव्यः, स्वजातिविद्वेषवशात् व्यापादयितव्यश्च। अथ उपदेशानुरूपे कृते कार्य्ये नकुलैरागत्य सर्पो भक्षितः, पक्षिशावकानां रावं श्रुत्वा वृक्षमारुह्य तेऽपि खादिताश्चेति सुभाषितं नीतिविदो विष्णुशर्म्मणः। कथायामेतस्यामुपायमनुशीलयन्तः विहगाः अपायचिन्तनाभावेन परिणामे सुमहान्ति स्वकुलक्षयजनितदुःखानि प्राप्नुवन्तीति।

अपि च दृश्यते तावत् क्षुद्रप्राणिषु पिपीलिकाः स्वीयासाधारणप्राज्ञत्वतया उपायमपायञ्च स्थिरीकृत्य स्वसञ्चितवस्तुजातं सुनिभृतान्धतमसि संरक्ष्य निरतिशयमानन्देन जीवनमुद्यापयन्ति। अन्ये च केवलमुपायं संशीलयन्तो कतिपयमत्स्याः प्रक्षीणे सलिलजाते नवजलधरगर्ज्जनं श्रुत्वा स्थलवर्त्मना गच्छन्तः धीवरेण प्राप्ताः व्यापदिताश्चेति सुष्ठूक्तम् 'उपायं चिन्तयन् प्राज्ञस्तथापायदञ्च चिन्तयेत्' इति।

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति॥

जगत्यस्मिन् वर्त्तन्ते य एव सन्तः, ते हि प्राणात्ययेनापि नोन्मार्गमधिगन्तुमभिलषन्ते मनसापि। समवलोकयामो वयं ते चातिकठोरमपि महाजनभाषितमनुकृत्य दैनन्दिनकार्य्यजातं सुमहत् क्लेशमनुभवन्तोऽपि अविकृतेन चेतसा सुसम्पादयन्तीति। तेषां हृदयमन्दिरे सततमेव जागर्त्ति मूर्त्तिमती विग्रह इव महाजनगणोदिता पूततमा सुनृता वाणी, या हि प्रतिपदमेव समुन्नयति संसारकलुषविषयात् नरान्। ऊर्द्धतमे वर्त्मनि दृश्यत एव प्रायशः अनुभूयते च स्वयमपि नित्यशः यत् साधारणेनैवासत्कर्म्मणा च्यवमानत एव विपदमपमानं वा लभामहे, यद्यप्येकदा वा उच्चारयामि अनृतां वाचं तां चापि च यदि कश्चिदवगच्छति, तर्हि चेष्टाशतकेनापि भूयस्तस्य न प्रत्ययभागी भवितुमर्हामि। तेन च हीनैर्व्वा प्रधानैर्व्वा लघुरिति मन्यमानः पराभूये इत्यादि सन्तं पन्थानमवलम्बमाना महाजनरीतिमनुसरन्तः सर्वदा संसारेषु विचरितुं तथा शिक्षामः। तर्हि सर्व्वे एव नः साधुतया प्रशंसिष्यन्ते, सर्व्व एव च अस्मासु विश्वसन्तः गुरुकठोरमपि कार्य्यं साधयितुमस्मासु भारमर्पयिष्यन्ति। तेन च संभविता वा जीविकानामपि कश्चिदुपायः।

एवं बहुधा दृश्यते सत्पथगतो न कदाचिदात्मश्लाघया परिच्युतो न कदाचिदन्येन विरम्बितो नापि वा कार्य्यादिषु भगवदनुकम्पावञ्चितत्वं समधीगच्छतीति । तेन च समधिगतेन सद्गुणराशिना चिरस्मरणीयतां लोकेषु वयमालब्धुं प्रभवामः । तथा च ते ते खलु निदर्शनान्यत्र प्रकृष्टतमाः भारतमण्डनरूपाः हरिश्चन्द्रादयो भूपालाः । यद्यपि च तेषां कृत्स्नमनुकरणं मासकानां सामर्थ्यातीतं, तथापि तदाचरितपन्थानामंशत एवावलम्बितुं कर्त्तव्यः सुमहान् यत्नः । तेनैव च प्रभवति जीवानां जीवनयात्राप्रसङ्गेषु निरतिशयमङ्गलमतिमात्रम् । अतः साधु खलूच्यते—'अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते । स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति' इति ।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः । *

उद्योगः, अध्यवसायः कार्य्येषु निरालस्यं, सोऽस्यास्तीति [णिच्] इन् । उद्योगी पुरुषः संसारेऽस्मिन् परमाभ्युदयं तथा शाश्वतिकीं ख्यातिञ्च संलभते । इह किल लौकिकं न एवं किमपि दुष्करं कार्य्यमस्ति, यद्वि विहिता-

* उद्योगात् किं न सिध्यति ।

ध्यवसायेन सुसम्पादयितुं न समर्थयते लोकः। नूनं दृश्यते तावत् केवलमध्यवसायमवलम्बमानो नितान्तदुर्गतोऽपि परमसुखसमृद्धिसौधतलमध्यास्ते। उद्योगानां पौनःपुण्येन नितान्तमनभिज्ञोऽपि विज्ञायते, क्षुद्रोऽपि महतीं पदवीमधिकरोति, शीर्णपर्णकुटीरोदरवासी दीनोऽपि प्राकारपरिवेष्टितप्रासादतलमधिकरोति, एकान्तमपटुरपि पटीयान् भवति, अतिशयनिस्वोऽपि कनकधनसमृद्धया ऋद्धिमतामग्रेसरतामुपगच्छति, निर्मेधसोऽपि परिस्फुरति मेधा निरन्तरमध्यवसायेन। नितरामध्यवसाय एव जगतामशेषसुखसमृद्धेरसाधारणो हेतुः।

दृश्यते तावत् कार्य्यमयेऽस्मिन् संसारे कार्य्यत एव समुपजायते बदभिव्यक्तिः, परं न पुनस्तद्धि मननमात्रेण सिद्धिफलं घटयति न वा सुव्यक्तयति च जगतामुन्नतेः सरलं मार्गम्। उक्तञ्च—

'उद्यमेन हि सिद्धन्ति कार्य्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥' इति

वस्तुतश्चेष्टासहकृतोद्यमेन विना सुराचार्य्यकल्पापरिमेयधी-सम्पन्नोऽपि विचक्षणः कल्पकोटिं यावन्मननद्वारा कार्य्येषु न प्रभवति लवकल्पामपि सफलतामानेतुम्। ये तावत् कार्य्यस्य गुरुत्वमगुरुत्वञ्चागणयन्तः बहुशो विघ्नैः पुनः पुनः प्रतिवार्य्यमाणा अपि स्थिरतरसङ्कल्पेन स्वाभीष्टान् प्रति यतन्ते, तेषामेव कार्य्य-

सिद्धिरप्रतिहतेति परमविधेयानां नीतिकुशलानां सुसिद्धान्तितं मतम् । तथाहि—

'प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणाः सततं वहन्ति ॥' इति

समुन्नतिमभिकाङ्क्षन्तः पुरुषधौरेया न पुरुषकारमन्तरेण तावन्ति कार्य्याणि दैवेसन्निवेश्य स्वामुन्नतिमधिकर्त्तुं शक्नुवन्ति । ये तावदात्मनः सामर्थ्यमसोमप्रज्ञाबलमितरमपि च समुन्नतेरनुकूलं कार्य्यजातं नियतेरायत्तीभूतं मन्यमानास्तस्यै समर्प्य परमां प्रीतिं भजन्ते, तेषां सुदुर्लभा उन्नतिः व्यर्थतामपि च भजते स्वजीवनप्रवाहः । अस्य तावल्लौकिकव्यापारेषु वर्त्तते क्षुद्रो महानपि च शतशो दृष्टान्तः, बाहुल्यभयेन सहृदयानां महामूल्यसमयापचयशङ्कया वा नातिविस्तरणीयेऽस्मिन् प्रबन्धे परिहृतस्तेषामवतारः ।

पुरावृत्तपर्य्यालोचनया समवलोक्यतेऽस्माभिर्यदुद्योगिनः पुरुषा एव समालम्बत उन्नतेः पराकाष्ठां जगतामपि लोचनलोभनीयां दृष्टिञ्च । तथा च पुराणकथासु ध्रुव-प्रह्लादादीनां भगवत्सान्निध्यप्राप्तिः, निषादसूनोरेकलव्यस्य धनुर्व्वेदाध्ययनं प्रथमत एवास्माकं नयनपथे पतित्वा स्मारयति उद्योगिपुरुषाणां कियन्तमधिकारम् । एवमपि च नवीनेषु दृष्टान्तेषु

तैमुरलङ्गो नाम कश्चिद्यवनस्तुर्कजातीयोऽत्र प्रकृष्टमन्यदुदाहरणम्। स खलु तैमुरलङ्गः तातारप्रदेशे समरकन्दनगरान्तिके कस्यामपि पल्ल्यां जातः। ततोऽसौ बाल्ये वयसि विविधविद्याभ्यासेन सह सामरिकविद्याञ्चापि समधिगतः। ततो गच्छता कालेन समरकन्दनरपतेः सैन्याधिपत्यमासाद्य निरतिशयबलविक्रमेण रिपूनभिभूय राज्ञः इतरेषामेव च प्रियदर्शनोऽभूत्। तेन च तस्य क्रमश एव राज्याधिकारतृषा प्रबला बभूव। समरकन्दभूपतिस्तदानीं अन्येन राज्ञा सह विग्रहेण हीनं बलं ज्ञात्वासौ आत्मनोऽधीनानि सैन्यानि वशमानीय प्रभोः प्रतिकूलं युद्धमघोषयत्। तत उभयोराहवे राजपक्ष एव प्रभूतबलविक्रमेण तैमुरलङ्गं पराजित्य विजयश्रियमलभत। ततश्च निर्ज्जितोऽपि तैमुरलङ्गः स्वकीयोत्साहादविच्युतो भूयो द्विगुणबलविक्रमेण भूपं पराभवितुमिच्छन् समरमवतारयत्। तस्मिन्नपि च पूर्ववदेवावनीपतेः पक्षो जयसम्पदमविन्दत। एवं क्रमेण सप्तकृत्वस्तुमुलसंग्रामं विदधन् प्रतिवारमेव पराजितो विध्वस्तागण्यसैन्यक्षयजनितदुःखेन निर्व्विण्णः आत्महत्यार्थमेव कृतमतिः शोणितकर्त्तरिकया सह कामपि गिरिगुहां गत्वा प्राणान् त्यक्तुमुपचक्रमे। तस्मिन्नेव क्षणे कृत्स्नजीवनस्य क्षुद्राणि महान्त्यपि च कार्य्याणि मनसि समुदयन्ति। मुहूर्त्तादेव मरणात् प्रतिनिवर्त्तय कर्त्तरिकाहस्तेन इतस्ततः सञ्चर्य्य पित्रोः स्नेहः, भार्य्यायाः प्रेम, बन्धु-

जनस्य सौहार्दम्, इष्टानां हितोपदेशः, अपत्यानां वात्सल्यभावः, भगिन्याः आदरः, अधीनस्थानां सेनानां व्यवहारः, ग्रामणीनां विश्वासः, इत्येतेषामपरस्य च कस्यचिद्भविष्यद्दर्शिनो महापुरुषस्य 'उत्तरकाले त्वमेव ससागराया धरित्र्या राजा भविष्यसि' इति भविष्यदुक्त्याः स्मरणेन, पूर्व्वपूर्व्वानुष्ठितयुद्धायासं मनसालोचयन् क्षणं तस्थौ। इत्यन्तरे च काचित् पिपीलिका तस्य दृष्टिविषयीभूतात् शिलातलात् शस्यमुखेन ऊर्द्धस्थावासं प्रति गन्तुकामा कियद्दूरं गत्वा तस्मात् परिभ्रष्टा, क्रमेण सप्तकृत्वश्चेष्टमानापि विफलमनोरथा संवृत्ता, ततश्च सा पूर्व्वपूर्व्वतोऽधिकमुद्यममास्थाय यावच्चलितुमारब्धा, तावदेव गन्तव्यस्थानमधिगतेति समीक्ष्य तस्य मनसि पुनरप्यरातिनिधनाकाङ्क्षा प्रबलतया परमुपयाता। अहो! क्षुद्रप्राणिनोऽध्यवसायदर्शनच्छलेन शिक्षयितुमेवात्र संप्रेषितः परमकारुणिकेन विश्वसृजा नूनमहम्, तद् भूयोऽष्टकृत्वः कृतप्रयासः युद्धमभिनिष्पन् सपत्नकुलं समूलमुन्मूलयेयमिति विमृष्य ततो निर्गत्य भूयोऽसीमबलचयेन समरकन्देश्वरं पराजित्य तस्य राज्ञः सिंहासनमधिकृत्य तत्रैव स्वीयराजधानीमकल्पयदिति।

अहो! का नामास्मिन् दुर्घटताध्यवसायिनो मानवस्य? प्रतिपदं प्रतिक्षणमेव समवधायन्तः पश्यामो यदघटनमपि संघटयति उद्योगो नाम। अतएव शोभनभाषितं कस्यचिद्दैवप्रतिकूलवादिनः कर्म्ममयं संसारं पश्यतो महात्मनः—

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्धति कोऽत्र दोषः॥" अथवा "उद्योगात् किं न सिध्यति" इति कृतं पल्लवितेन।

नानृतात् पातकं महत्।

अनृतम् असत्यं मिथ्याकथनमिति यावत्। इह किल वसुधायां यावन्ति सन्ति दुष्टकार्य्याणि, तेषु मिथ्याकथनरूपमयशस्यमवमानकरमतिघृणितञ्च कर्म्म न किञ्चिद् विद्यते मनुजानाम्। य एव मिथ्या भाषते स हि तुषराशिनिलग्नवह्निः, अङ्कुशाच्छन्नो मातङ्गः, निष्पतन्नशनिः, निष्प्रतिकारो द्रोहः, निर्निमित्तं वैरम् एवं किल स विद्वानपि न विशिष्यते, पण्डितोऽपि न परामृष्यते, वर्णश्रेष्ठोऽपि न महीयते, ऋद्धिमानपि न बहु मन्यते, महाकुलप्रभवोऽपि न सम्मान्यते, तं गृहीतरूपान्तरमिव कृतान्तं मन्यन्ते, अपथ्यमिव गृह्णन्तोऽपि जिहासन्ति, शुनोमिव स्पृशन्तोऽपि स्वमशुचिमाकलयन्ति, भुजङ्गमिव तं विप्रकृष्टात् परिहरन्ति, तत्कथाकर्णाधिगतेनापि विकर्णायन्ते, दूरतः समवलोकनाच्च बिभ्यन्ति, न जातु तेन

भाषितं सत्यमपि याथार्थ्येन न परिगृह्णन्ति, धर्म्माधिकरणे साक्ष्यं दधद्भूतार्थं विब्रुवन्नपि न परमार्थेनाददति ; नितरामेतादृशं जुगुप्साहं जीवनं किं नु मुधैव वहन्नसत्यवादिनो जनस्य ? किमहो ! जीवनावसाने प्रेतलोकेऽपि भीषणतो भीषणतरं शासनमस्य नरकुलपांशुलस्य ?

सर्व्वजनविदितस्तावद् राजन्यकुलविनिःशेषमहाप्रलयसंघट्टनकरे भारतीयमहाहवे कुरुपाण्डवानां विरोधवृत्तान्तः । तस्मिन् द्रोणवधार्थं वासुदेवेन निर्बन्धातिशयेन मुहुरनुरुद्धमानस्य राज्ञो युधिष्ठिरस्य 'अश्वत्थामा हतः' इत्युच्चैः 'गजः' इत्यनुच्चैर्भाषितेन द्रौणिर्हत इति बुद्धा द्रोणस्तत्शोकेन नाशाग्रवर्त्तिप्राणो रथलग्नो धृष्टद्युम्नेन हतः, इति यदवितथभाषणाद्दुष्कृतमुपजायते आजन्मसत्यव्रतानुसंशीलयतोऽजातशत्रोस्तेनैव दुष्कृतमूलेन महाप्रस्थानपथे शमनभवनदर्शनव्यपदेशेन पापासक्तानां का शास्तिः, कियती वा यन्त्रणा, कियानिव भोगः, कियांश्चापि यमानुचराणां व्यवहारः, इत्याद्येकैकशो दर्शनक्रमेण चतुरशीतिरौरवादिनरकाणां दर्शनमजायत । नितरां मिथ्यावादिनो नेहामुत्र च श्रेयः संघटते मनाक् । उक्तञ्च प्रज्ञादृशा निखिलजनाधिगतमर्म्मज्ञेन केनचित्तत्वदर्शिना—

'नासत्यवादिनः सौख्यं न पुण्यं न यशो भुवि ।
दृश्यते नापि कल्याणं कालकूटमिवाश्नतः ॥

जिह्वैकैव सतामुभे फणवतां स्रष्टुश्चतस्रश्च ताः।
ताः सप्तैव विभावसोर्नियमिताः षट्कार्त्तिकेयस्य च॥
पौलस्त्यस्य दशाभवन् फणिपतेर्जिह्वासहस्रद्वयम्।
जिह्वालक्षशतैककोटिनियमो नो दुर्ज्जनानां मुखे॥' इति

वस्तुतो जगत्यत्र यद्यपि प्रज्ञावानेवावितथभाषी स्यात्, तर्हि तस्य प्रज्ञाफलमत्यल्पेनापि काञ्जिकेन यथा चीरस्य वैक्लव्यं जनयति, तथैवास्वाभाविकत्वमेव विदधातीति कः पुनस्तत्र सन्देहसन्दोहावसरः! परिहासमिषेणापि मिथ्यारटनात् कस्मिन् कस्मिन्नपि समवजायते महानेवानिष्टपातः, तेनैव च जीवनस्यापि विनाशः सम्भव इत्याद्यवधारणार्थं गोपालशार्दूलक्-कथाच्छलेन केनापि तत्त्वदर्शिना समवतारिता कापि विचित्रा कथा, तथाहि—अस्ति कस्मिंश्चिदधिष्ठाने कोऽपि गोपबालकः। स प्रत्यहनि गोचारणार्थं नगरोपकण्ठं काननमवनीमुपेत्य 'मम गोयूथः शार्दूलेनाक्रान्तः, क कुत्र भोः! तूर्णं त्रायध्वं त्रायध्वमयमहो!! मन्दभाग्यः' इत्युच्चैरेव रावैर्जनानाकार्य्य कौतुकं मन्वानः साहाय्यार्थमुपागतान् समीक्ष्य अट्टट्टं जहास। इत्थमेव दिवान्यहान्यतिवाह्य स खलु वराकः जनान् मृषा प्रतार्य्य परमां प्रीतिमविन्दत। ततो गच्छति काले दैवगत्या कस्मिन्नेवाहनि सत्यमेव तस्य गवां यूथः व्याघ्रेणाक्रान्तः। ततश्चासौ पूर्व्ववन्मुहुर्मुहुराकलितेनापि कः पुनरेकोऽपि तस्य वचसि विश्वासमास्थाय तत् साहाय्यार्थं न समुपस्थितः। तेन च साहाय्यपरि-

हीनतया स तावद्दुर्भाग्यो व्याघ्रेणागत्य व्यापादितः, गवामपि समजो विनष्टः खादितश्च। अतएव 'नानृतात् पातकं महत्' इति यदुच्यते तदतियथार्थमेव कस्यचिद्दूरदर्शिनः पदवाक्यप्रमाणपारावारीणस्य महाजनस्येत्यलमतिविस्तरेण।

काव्येषु माघः कविकालिदासः।

अविनश्वरेण परमकारुणिकेन ईश्वरेण अखण्डब्रह्माण्डमिदं रमणीयैर्व्वस्तुजातैः समलङ्कृतम्। विचित्रपत्रावलीचित्रितमनोहरारामनिकरः, मानसहरप्रसूनपरिशोभिता वल्ली, कुसुममधुलोलुपमधुकरगुञ्जनगुञ्जितकुञ्जनिचयः, सिंहशार्दूलादयो नृशंसश्वापदाः, शोभना मृगयूथाः, अगणितरत्नजातपरिशोभितरत्नाकरजातलभ्यसुवर्णाकरः निकरः,तालतमालनीला पर्व्वतमाला, नीलाम्बरशोभना धवलकादम्बाः, कमनीया मणयः, लवनादि सप्तसमुद्राः, ऐरावतादिदिग्जा,ः महेन्द्रादिकुलपर्व्वताः, उष्णरश्मिरश्मिजालोष्णो ग्रीष्मः, अजस्रधारापातशिक्तकलेवरा वर्षाः, नानापुष्पपरिशोभिता शरत्,शान्तप्रकृतिर्हेमन्तः,तुषाराषाढ़शरीरः शिशिरः, अशोकुसुमवासवासितमलयवातप्रशान्तो वसन्तः, पूर्णशशधरपरिशोभिता पौर्णमासी, घोरान्धकारातिभीषणा अमा-

रजनीव, किमधिकम् अकृत्रिमसुन्दराणि सर्व्वाणि मनोहराणि वस्तुजातानि यथायथं नियोजितानि, परन्तु कृत्रिमचित्रपटघटादिना नानाविधविज्ञाननिवहेन च अधिकतरं परिशोभयितुं खेतत्कषणरताङ्गा बहुवा मानवर्गा प्रयुज्यन्ते सन्ततम्। तेषां केचन वर्ष्मचर्म्मादिरचने, केचन घटपटादिप्रकटनविधौ, केऽपि विचित्रविज्ञाने केऽपि शृङ्गारादिनानारसपीयूषस्राविकाव्यनिचयविरचने मनोनिवेशयन्ति। एतेषां सर्व्वेषां मध्ये सुललितकाव्यमेव अधिकतरं रमणीयम्। नैतत् केवलं श्रुतिरमणीयं दृष्टिरमणीयञ्च, किन्तु समाजशिक्षाविधौ गुरुरिव वर्त्तमानं चतुर्व्वर्गफलसिद्धिदं, यदुक्तं "चतुर्व्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव" इति, अपि च "काव्यालापाश्च ये केचित् गीतकान्यखिलानि च शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः" एवञ्च 'काव्यालापांश्च वर्ज्जये'दिति यदुक्तं तत्तु हास्यार्णवादि असत्काव्यविषयपरम्। आदि कविर्वाल्मीकिरखिलशास्त्रसागरं समालोड़यन् पवित्ररामचरित्रसम्बलितं रामायणं नाम महाकाव्यमेकं विरचय्य धर्म्मामृतरसस्रोतसा प्रसिक्तमकार्षीत् जगत्त्रयम्। परन्तु रामस्य राजनीतिं गार्हस्थ्यनीतिं कर्त्तव्यपरायणताञ्च यथायथं निवेशयामास। एतेनायं ग्रन्थः सर्व्वेषां काव्यानामादर्शभूतः। ततः परं द्वापरावसानसमये कृष्णद्वैपायनः कुरुपाण्डवचरित्रमाकलयन् सर्व्वरत्नाधारं महाभारतं प्रणिनाय। ततःपरं असीम-

भावालङ्काररसविलासः कालिदासः, अशेषभावविभवसम्भवो भवभूतिः, प्रभूतप्रतिभो भारविः, निखिलपण्डितमण्डलीहर्ष-विनाशप्रकर्षवान् श्रीहर्षः, कविशङ्कविलङ्घनो माघः, काव्य-सागरतरङ्गे भासमानो भासः, साहित्यरससमुद्रः शूद्रकः, एवमन्ये च कवयः काव्यानि विरचय्य अमरा इव वर्त्तन्ते। न खलु सर्व्वेषां सर्व्वस्मिन् विषये समा प्रतिभा प्रतिभाति। को वालङ्कारेषु, को वार्थविस्तारचातुर्य्येषु, को वा सुललित-शब्दबन्धेषु प्रदर्शयति पाण्डित्यं, तदेवोक्तं "उपमा कालिदासस्य भारवेरर्थगौरवं। नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः॥" अत्र प्रथमचरणत्रये नास्ति कस्यापि आपत्तिर्लेशतोऽपि, चतुर्थ-चरणमस्माभिर्विचार्य्य स्वीक्रियते नाम, 'माघे सन्ति त्रयो गुणा' इति किन्तु एतदेवात्र प्रष्टव्यं, यत् रघुवंशकिरातार्जुनीयनैषध-चरितेषु किं निर्द्दिष्टात् इतरे गुणा लेसतोऽपि न सन्ति? उत अप्राधान्येन वर्त्तन्ते? मन्ये च यत्र यो गुणः प्रधान्येन वर्त्तन्ते, तत्र तस्यैव निर्द्देशः श्लोककृतोऽभिप्रायः, तर्हि काव्येस्मिन् त्रयो गुणाः किं प्राधान्येन स्वीक्रियन्ते? नैतत् सम्भवति, अस्मिन् शिशुपालवधे शास्त्रसागरपारदर्शिणा मल्लि-नाथेनोक्तं यत् 'वीरप्रधानो रसः' इति वीररसे ओजोगुणस्यैवा-वकाशः निखिलालङ्कारशास्त्रसम्मतः। तथा च साहित्यदर्पणे "ओजश्चित्तस्य विस्तारो रूपं नीप्तत्वमुच्यते वीरबीभत्स-रौद्रेषु क्रमेणाधिक्यमस्य तु" इति ओजोगुणे च गौरीरितिः प्रचारः

स्तत एव, तथात्वे सति ग्रन्थेऽस्मिन् प्राधान्येन पदलालित्यकथनम् उन्मत्तप्रलापवदुपेक्षणीयम् । ये नाम माधुर्य्यादयो गुणा राजन्ते, ते तु शृङ्गाराद्यङ्गरसानुरोधेन वर्णिता अङ्गगुणा न त्वङ्गिनः । यदि नाम अङ्गगुणानुरोधेनैव त्रयोगुणा इत्युक्तं तदपि न समीचीनतया प्रतिभाति, यतः रघुवंशादिषु कालिदास-ग्रन्थेषु पदलालित्यादिगुणा वर्त्तन्त एव तेऽपि ग्रन्था बहुगुण-समलङ्कृताः कथं नोच्यन्ते ? अतएव शिशुपालवधं प्राधान्येन गुणत्रयसमन्वितमिति न वक्तुमीहामहे वयम् ; माघपक्षपातिनां नितान्तभ्रान्तिसन्तानसमन्वितानां वचनमेतत् त एव समर्थयन्तु एतेनास्माकं किमपि नायाति याति वा । केचित्तु पद-लालित्यलोलुपा नैषधचरितस्य प्राधान्यं समर्थका एवमाह यत्—"भारती भारवेर्भाति यावन्माघस्य नोदयः । उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥" इति नैतत् कथमपि स्वीकुर्म्मो वयम्, केवलं शब्दसौष्ठवातिशयोक्तिप्रियाः सततं स्तुवन्तु किं नामास्माकम् । वयन्तु मन्यामहे यत् तादृशपदलालित्यं विनापि शिशुपालवधं अनेकेभ्यः काव्येभ्यो वरम् । अस्य भावगाम्भीर्य्यं रचनाचातुर्य्यम् अलङ्कारप्राचुर्य्यं रसमाधुर्य्यञ्च प्राचुर्य्येण वर्त्तन्ते । अपि च केनचित् समीक्ष्यकारिणा प्रोक्तं, यत् "नवसर्गगते माघे नवशब्दो न विद्यते" इति वस्तुत एव काव्येऽ-स्मिन् अद्वितीयशब्दबन्धो बध्नाति सहृदयवतां हृदयानि, नायं कविः केवलं साहित्यशास्त्रपारगामी, संगीतशास्त्रेषु चास्य

ममधिकव्युत्पत्तिं समवलोकयामः तथा च—'रनङ्गिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः । स्फुटीभवद्ग्रामविशेष-मूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः" । एवमपि च 'सर्व्व-कार्य्यशरीरेषु मुक्ताङ्गस्कन्दपञ्चकम् । सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्" इत्यनेन कवेर्बौद्धशास्त्रसमालोड़न-पाटवं प्रतीयते । "विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् । फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि" इत्यनेन च सांख्य शास्त्राभिज्ञता परिस्फुरति, परन्तु आयुर्व्वेदे चापि कवेः सम-धिकव्युत्पत्तिमधिगच्छामः । यथोक्तं तेन "स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् । अयथा बलमारम्भो निदानं क्षय-सम्पदः ॥" इत्यादि बहव एव श्लोका अस्य नानाशास्त्रे पाण्डित्यं सूचयन्ति, अतएव सर्व्वशास्त्रसमन्वितं काव्यमिदं सर्व्वाङ्गसुन्दरम् । पुनः पुनरध्ययनेनापि चास्य अभिनवमधुरता न ह्रासमुपैति । काव्याम्बुधिसमालोड़नगृहीतकाव्यामृतरसेन केनचिदुच्यते यत् 'माघे मेघे गतं वयः' वस्तुत एव माघाध्यायिनो मेघाध्यायिनश्च अशेषरससागरं माघं मेघं वा परित्यज्य अपरकाव्याध्ययनलालसा न जायते, मेघदूतं कालिदासस्य स्वानुभूतिसम्भूतं खण्डकाव्यम् । तदादर्शं कृत्वा अन्ये कवयः पदाङ्कदूतं वातदूतम् इत्यादि विरचयामासुः । कालिदास-लेखनीप्रसूतं मेघदूतं काव्येषु तिलकम् । विरहिणां हृदयम्, विज्ञानस्याकरः, भाषायाः कल्पवृक्षः, मानचित्रस्यादर्शः, अलङ्कारस्य

मूलधातुः, रसस्य जलधिः, कवीनामाश्रयः, अलं नाम सर्व्वजन-परिचितस्यास्य उत्कर्षसाधकप्रमाणसंग्रहेण, कालिदासो न केवलं मेघदूतं विरचय्य प्रतिनिवृत्तः, परन्तु रघुवंशकुमारसम्भवे महाकाव्ये, अभिज्ञानशकुन्तल-मालविकाग्निमित्रादिनाटक-निवहं, आदिरसाकरं शृङ्गारतिलकं, श्रुतिमात्रबोधप्रं श्रुत-बोधं नाम छन्दःशास्त्रञ्च विरचयामास। सर्व्वस्मिन्नेव काव्ये अस्य रचनाचातुरी रचयति रतिमतितरां विद्वज्ज-नानाम्। यथोक्तमभिज्ञानशकुन्तले—'पातुं न प्रथमं व्यव-स्यति जलं युष्मास्वपीतेषु या, नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्। आदौ वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्-सवः, सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम्॥' अपि नास्यैषां श्लोकानामुपमा वर्त्तते किं न वा तन्न जानीमहे, नितरां समीक्ष्य केनचिदुक्तं "कवयः कालिदासाद्याः कवयो वयमप्यमी। पर्व्वते परमाणौ च पदार्थत्वं प्रतिष्ठितम्॥' इति। कालिदास इव कालिदासः शयने स्वपने पथि जागरणे प्रान्तरे कान्तारे अन्तरीक्षे क्रीड़ायां व्यायामे भोजने पाने ध्याने किम-धिकं सर्व्वत्र सर्व्वदा सर्व्वस्मिन्नेव विषये कवीनां मनसि अनिशं चकास्ति। उक्तञ्च "पुरा कवीनां गणनाप्रसङ्गे अनामिकाधिष्ठित-कालिदासाः। अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।" इति, एतदप्यस्माकं विस्मयसमुत्पादकं नाम, यत् कवेरिदं काव्यं काव्यमार्गेणैव कविः परिचीयते। अतएव न कथमप्ये-

प्र—१७

तत् समीचीनतया प्रतिभाति, तत् किमेतत् असमीक्ष्यकारि-कपोलकल्पितं, किमु मृषा जल्पितम्, उतास्य गूढार्थोऽपि कश्चिद्विराजते खलु ? अत्रास्माकं मानसलतिका विकाशयति नास्मेवं सिद्धान्तकुसुमं, न जानीमहे सदैवैतत् विद्वज्जनप्रपूजनविधौ विधिनिबद्धं भवेन्न वा ? अपि च माघस्य चिन्ताशक्तिप्रसूतमेतत् काव्यमिति अनायासेनैवावगन्तुमर्हन्ति धीराः, एतेन काव्यस्य उत्कर्षः समजनि न कवेः, 'कविकालिदासः' इत्यस्य न कश्चित् विकत्थनावसरः ; कालिदासः कस्यापि उच्छिष्टं न जग्राह, न जिघ्रति स्म च,स खलु निजप्रतिभाबलेनैव स्वग्रन्थे भावादिकं निवेशयामास । सरस्वती तु तस्यानुवर्त्तिनी, तद्ग्रन्थविरचनविधौ च एवमेवानुमिनुमो, यत् कविरयम् अलङ्कारादिकं नानुससार, अलङ्कारादय एव तमनुसरन्ति स्म । काव्यलिखनकाले कालिदासश्चिन्तां नाश्रिश्राय ; तस्य स्वभावलेखनसुखे सुललितपदावली स्वत एव समागतासीत् । उक्तञ्च "कविता वनिता चैव सरसा स्वयमागता बलादाकृष्यमाणा चेत् सरसा विरसायते ।" अस्य कवेर्मेघदूतस्य रचना नूतनभावसम्पदा सम्पादितासीत्, नात्र कविः कमप्यादर्शं स्वीचकार ; एतेन किल 'कविकालिदासः' इति यथार्थत एव साधु प्रयोगः, कालिदासविरचितवचनपीयूषधाराप्रसिक्तहृदयः कश्चित् प्राह—"कालिदासकविता नवं वयः माहिषं दधि सशर्करं पयः । एनमांसमबला च कोमला सम्भवन्तु मम जन्म जन्मनि ।" अपि च काव्यशास्त्रं

तावज्जगति समाजशिक्षार्थं परिचरति, सर्व्वे खलु समाजचराः शास्त्रविज्ञानतत्परा न वर्त्तन्ते। तेषामुपदेशविषये सरल-भाषोद्भाभितमनुशासनमेवोपयोगीति किः पुनस्तत्र तर्कः? यो हि सर्वमनोरमेण वचनेन सर्व्वानेव मनुजनिकरान् विनोद-यितुमर्हति, स एव प्रधानकविपदमारोढ़ुं शक्नुयात्। माघः खलु शिशुपालवधे दीर्घचिन्ताप्रसूतातिकठोरपदानि सन्निवेश्य काव्यस्यैवोत्कर्षमसाधयत्, किन्तु स यदि सामाजिकान् स्वयमेव अध्यापयति, तदैव सामाजिकास्तत्काव्यार्थमवगन्तुं प्रभवन्ति, एवम्विधकार्य्यस्यासम्भवतया तेन काव्येन तादृक् समाजहितं न विहितम्। ये तावत् आभिधानिका व्याकरण-शास्त्रपारगामिनस्तदर्थपरिग्रहे प्रभवन्ति। अत एव शिशुपालव-धस्योत्कर्षं प्रत्याययन्ति। यो हि साधारणजनानां मनसि स्वकीयरचनामाधुर्य्यप्रकाशयितुमसमर्थस्तस्य कवेः किंनाम माहात्म्यं? कालिदासस्य कविता श्रुतिगोचरमात्रेणैव सर्व्वेषां हृदयविनोदिनी समवर्त्तते। अत एवोक्तं "काव्येषु माघः कविकालिदासः" इति यत् तत् तथ्यमेव चकास्ति। अलमति-विस्तरेण नाभिकाङ्क्षामो वयं मण्डूककण्ठनिर्घोषसदृशकठोर-शब्दप्रचारेणालभवतः सामाजिकान् व्यथयितुमिति शम्॥

———

स्मृतौ ।

जगत्यस्मिन् मानवाः सर्व्व एव निसर्गत इहामुत्र च इष्टमभीप्सवोऽनिष्टं परिजिहीर्षवश्च भवन्ति, परं न स्वरसत एव तदभिलषितं लब्धुं क्षमन्ते धर्म्ममन्तरा। धर्म्मलक्षणन्तु "धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनं" मिति भविष्य-पुराणादवगतं। सत्येव सुखस्य साधनोपाये शतशः पुनरपाय-दर्शनात् बिभ्यतां तत् प्राप्तुकामानां धर्म्म एव समाश्रयणीयः। यथा हि हास्यसम्वर्द्धमानं स्वागतसम्भाषणप्राप्तपुलक-मात्मानमभिलक्ष्य आह्वानकारिकरक्रोड़नकमिव तं प्रत्यभि-मुखीभवति क्रूरदृष्टीन् तर्ज्जयतो बलवत उपलक्ष्य दूरादेव पलायते सर्व्वो जनः। तथा इतरः पश्वादिरपि प्राणभृद्वर्गः निसर्गत एव स्नेहाञ्जन-रञ्जित-नयनं हरितलवपूर्णपाणि-मभिलक्ष्य तं प्रत्यभिमुखीभवति। कुटीलभ्रूकुटीभीषणान् दन्तोद्यतकरान् उपलभ्य प्रपलाय्यात्मानं रक्षितुमीहते। इत्थमा-हारनिद्रादिभिरपि अपरेषां प्राणिनां मनुजानाञ्च सत्यपि साम्ये एक एव परं धर्म्मः साधयत्येतेषां महदन्तरं। अयमेव धर्म्मः संस्काररूपेण प्राणि-निकायमाकलयन् प्रेरयति प्राणिवर्गं स्वस्वकर्म्मनिवहेषु। ततः सर्वप्रयत्नेन पूर्व्व-पूर्व्वजन्मजनितसंस्कार-क्षयसाधनं परम-पदप्राप्त्युपायभूतं धर्म्मं समाश्रयितुकामेन अखिलनिगूढ़-वेदतात्पर्य्यपर्य्यालोचनपरम्पराप्राप्तस्थिरांशा मुनि-जनयोगसमृद्धिलब्धमर्य्यादा स्मृतिरेव शरणी करणीया। यतः

खलु निखिलधर्म्माचाराचरणभास्वरे भारते वर्षे परमकारुणिकै-र्निगमागमपारावारपारीणैर्वैदिककर्म्मोपासना-ज्ञानकाण्डधुरन्धरैः लोकोपकृतये स्मृतिशास्त्रसरण्यः सादरं समाविष्कृताः। परं तेषु अनेकर्षिप्रणीततया परस्परविरुद्धत्वेन मौलीभूतश्रुत्येकवाक्य-तावगतार्थयाथार्थ्येन मनोः स्मृतेः प्राधान्यं तथाहि—"मन्वर्थ-विपरीता या सा स्मृतिर्न प्रशस्यते, वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृत"मिति। भवतु वा अन्यासां स्मृतीनां प्राधान्यं तत्र न काश्चिदस्माकं विप्रतिपत्तयः, यतः "सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते" इति शास्त्रबलमालम्ब्य सर्व्वस्मृतीनामेक-वाक्यतया येन सर्व्वपरिग्रहः स्यात्, तस्यैव ग्रहणमिति युक्त्या सर्व्वासामेव प्रामाण्यं परिगृहीतं प्रमाणतत्त्वज्ञैः। परममूषां स्मृतीनामुपर्य्ययमेवाक्षेपदण्डः, भण्डैः कैश्चित् शास्त्र-तात्पर्य्यमजानद्भिः पात्यते तद्यथा—बलवद् विधिबहुल-कर्म्मसु फलश्रुत्या प्रलोभयन्त्यः स्मृतयः बहुव्ययायाससाध्ये कर्म्मणि प्रवर्त्तयन्त्यः प्रताड़यन्ति मुधा मुग्धान् जनान्। प्रत्युत स्मृत्युदितकर्म्मानुष्ठानेन वासनाविवृद्ध्या बन्धहेतुभूतकर्म्म-परम्परासु प्रवर्त्तन्ते जनाः। तदानीं नार्हन्त्युदेतुं कैवल्य-विषयिणी काचित् कथापि मनसि। श्रुतिरपीममर्थमनुगृह्णाति "तद् यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत" इति। "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्तीति" स्मृतिरपि इममेवार्थमनुमोदते।

"यत् कृतकं तदनित्यम्" इति व्याप्तिश्च श्रुतिस्मृत्योस्तात्पर्य्य-मेतदेवेति वर्णयद्भिर्महतीं वाग्भटीमारभ्य स्मृतिप्रणोदित-कर्म्मणां क्षयित्वं प्रतिपाद्यते, तदपर्य्यालोचनविजृम्भितमित्ये-वावधार्य्यते। तथाहि—"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्।" "पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकम्। पित्रैव मुक्तः पिबति न फलं तावदेव हि।" इति विष्णुपुराणीयानुशासनात् यथा पथ्यसेवायां उत्कटानुरागवशेनारोग्यमपि तुच्छमधिगच्छन्तः रोगिणोऽपथ्यप्रदानतोऽप्यौषधपाने प्रवर्त्तयितव्यास्तथैव विवेक-विहीना बहुतरदुःखशवलसुखमात्रलिप्सया अमृतमप्यवधीरयन्तः पुत्रपश्वादिफलप्रलोभनेनैव प्रवर्त्तिताः क्लेशकरकर्म्मसु स्मृति-विधिना। एवञ्च पुनः पुनरपथ्यसेवनेन विवृद्धिमापन्नस्य दोष-निवहस्यागदप्रयोगेण स्तोकशोऽपगमात् यथा सुदीर्घकाले-नाप्यारोग्यं सम्भाव्यं तथा रागिणोऽपि तत् तत् फलभोगावस्य-म्भावात् दुष्कृतनाशस्याल्पशः सम्भाव्यमानतया सुचिरेणापि कालेन कैवल्यं सम्भवत्येव। ये पुना रोगिण आपातमधुरं रोगवृद्धिनिदानभूतमपथ्यमस्पृहयन्तः स्वत एव पिबन्ति भैषज्यं, तेषां दोषवृद्धेरभावात् पूर्व्वसञ्चितदोषस्यागदेनापनयनात् सपद्यारोग्यं सम्भाव्यं, तद्वत् सुखखद्योतविद्योतनाकुलमपि दुःखदुर्द्दिनान्धकारितं संसारं व्यालविततफणच्छायमिव मन्य-माना विवेकवन्तो बन्धकारिणीभूतफलान्यवधीरयन्तः कर्म्मसु

प्रवर्त्तमाना अपहतपाप्मानस्तूर्णमेव लभन्ते कैवल्यं। इति परसहस्रं तर्कमनुसन्दधाना अवधानाय चित्तशुद्धिनिदानं स्मार्त्तं कर्म्मेति व्यवस्थापयति जनानुकम्पापरवशा स्मृतिः। तथा यथाविधिसंस्कारकर्म्मभिरपि वीजगर्भसमुत्पन्नपापप्रणाशेन विशुद्धसत्त्वप्रधानतया चित्तनैर्म्मल्यमाधीयते इति संस्कारकर्म्मसु सनिर्व्वन्धमनुरुध्यते जनसंघो भगवत्या स्मृत्या। तत्राह हारीतः— "गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति, पुंसवनात् पुंसीकरोति, फलस्थापनात् मातापितृजं पाप्मानमपोहति, रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्म्मणा प्रथममपोहति, नामकरणेन द्वितीयं, प्राशनेन तृतीयं, चूड़ाकरणेन चतुर्थं, स्नापनेन पञ्चमम् एतै-रष्टाभिः संस्कारैर्गर्भोपघात् पूतो भवतीति।" इममेवार्थं समर्थयितुं दृष्टान्तयत्यङ्गिराः—"चित्रं कर्म्म यथानेकैरङ्गैरु-न्मीलयते शनैः। ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्व्विधिपूर्व्वकै-रिति।" अहो! दुर्द्दैवं!! यत् इत्थं धर्म्मकर्म्मकरणसामर्थ्य-मुपयच्छन्तं संस्कारमवधीर्य्याधुनिका यथेच्छमाचरितुं प्रायशः प्रवर्त्तन्ते जनाः। किं बहुना सर्व्वसंस्कारमौलि-लालितं विवाह-संस्कारमपीदानीन्तना विलासलालसाप्रशमनोपायं मन्यमाना अधःपातयन्ति स्वीयान् वंश्यान् यथाविध्यनाहितसंस्कारगर्भोत्-पत्त्यादिना। अतस्तद्दोषप्रशमनकामैर्धर्म्माभिलाषुकैः संस्कार-शुद्धौ सर्व्वथा यत्नो विधेयः।

अपि च नाममात्रावशेष्यमृतस्य किमपि परिग्रहीतुम-

समर्थस्य श्राद्धादिविधयः केवलं कर्म्मसु रुच्यर्था न तत्र किमपि फलमुपलभामहे इत्यु पहासयतैः स्मृत्युदितश्राद्धकर्म्मणि केषाञ्चिदाक्षेपावतारं भगवत्यः स्मृतयः समादधिरे। तथा हि नित्यस्य विभोरात्मनो विजातीयमनःसंयोगध्वंसः मृत्युरित्यभिधीयते। वस्तुतो देहविगमेऽप्यात्मनो विनाशाभावः "अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति। अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्ये"त्यादिभिः सहस्रशः स्मृतिवाक्यैरवगम्यते। अतो विगतपूर्व्वदेहस्यापि पूर्व्वपूर्व्वजन्मजनिताहितसंस्कारस्य सूक्ष्मशरीरावच्छिन्नजीवस्य श्राद्धादिना तृप्तिरवश्यम्भाविनी। तथाहि विष्णुपुराणम्—"श्राद्धासमन्वितैर्द्दत्तं पितृणां नाम गोत्रतः। यदाहारास्तु ते जातास्तदाहारत्वमेति तत्।" तथा मत्स्यपुराणम्—"देवो यदि पिता जातः शुभकर्म्मानुयोगतः। तस्यान्नममृतं भूत्वा देवत्वे नानुगच्छति। दैत्यत्वे भोगरूपेण पशुत्वे च तृणं भवेत्। श्राद्धन्तु वायुरूपेण नागत्वेऽप्युपतिष्ठते। दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकम्। मनुष्यत्वेऽन्नपानादिनानाभोगरसं भवेदिति।" तथा तेषां तृप्तये प्रतिसम्वत्सरीयमृताहनिमित्तकश्राद्धमप्युपदिशन्ति भविष्यपुराणप्रभासखण्डप्रभृतयः—"मृताहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात्। मातुश्चैव वरारोहे! वत्सरान्ते मृताहनि। नाहं तस्य महादेवि! पूजां गृह्णामि नो हरि"रिति। तथाकरणे दोषश्रुति-

मपि दर्शयति मरीचिः—"पण्डिता ज्ञानिनो मूर्खाः स्त्रियोऽथ ब्रह्मचारिणः। स्वलाहं समतिक्रम्य चाण्डालेष्वभिजायते" इति। इत्थमगणितमुपदेशमनुसन्दधाना स्मृतिरपौरुषेयश्रुतिवाक्यगत-गूढ़ार्थमुद्घाटयन्ती सर्व्वथानुग्टह्णात्यस्मान् जड़मतीनपि कर्म्मसु प्रवर्त्तयति। अतः स्मृतिमन्तरा धर्म्मप्रचुरतिरवश्यम्भाविनीति सर्व्वप्रयत्नेनास्माकमनुसरणीयेति शम्।

वेदान्ते।

स्थूलतो वेदस्य द्वौ विभागौ कल्प्येते—कर्म्मकाण्डो ज्ञान-काण्डश्चेति। तस्य प्रथमे भागे सकामयज्ञादिकर्म्मणः, शेषे च परमार्थज्ञानस्योपदेशः प्रधानतो लच्यते। यद्यपि ज्ञानकर्म्मणो-रुभयोरेव परस्परोपकार्य्योपकारकभावेन कैवल्यसाधकत्वमस्ति, तथापि कल्पितप्रतिभागस्य प्रथमांशे यज्ञादेः प्राधान्यं लच्चीकृत्य पूर्व्वभागः कर्म्मकाण्डप्रधानः सकामप्रवृत्तिमार्गप्रदर्शकः, पर-भागे च परमात्मज्ञानस्योपदेशप्राधान्यं दृष्ट्वा तत् कैवल्यमार्गस्यो-पायभूत इति संगिरन्ते वेदविदः। तस्य तावदेतौ द्वौ भागा-ववलम्ब्य द्वे प्रधाने दर्शने रचिते। एकं जैमिनिकृतं पूर्व्वमी-मांसादर्शनमपरं महर्षिवादरायणकृतमुत्तरमीमांसादर्शनं वेदान्तदर्शनं वा। यज्ञादिकर्म्मणा कालक्रमेण मोक्षः समजायते इति जैमिनेर्न्यायः। व्यासस्तु 'सकामयज्ञादिकर्म्मभिः मोक्षः

कदापि न साध्यः' यतो हि—'न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते' इति। यद्यपि यज्ञादिना उत्तरोत्तराणि उत्तमोत्तमानि लोकादीनि, आभूतसंप्लवरूपञ्च अमृतत्वमपि लभन्ते, तथापि केनापि प्रकारेण आत्यन्तिकदुःखनाशककैवल्यप्राप्तिश्च न भवेत्, यतः श्रुतिराह—"क्षीणे पुण्ये मर्त्त्यलोकात् च्यवन्ते।" यच्च वेदस्य परभागे परमात्मज्ञानं प्राधान्येनोपदिष्टं, न तावत्तत्र कस्यचित् मतविरोधलवोऽपि। तस्य शेषभाग उपनिषदिति नाम्ना प्रसूयते। उपनिषद् वेदान्तश्च एकपर्य्यायवाचकः शब्दः। वेदान्तशब्दस्य तावदर्थत्रयमाहुरार्य्यपादाः—वेदानां अन्तः वेदान्तः। अत्र किलाभिधानिको हेमचन्द्रस्तत्कृताभिधाने तमेवार्थं समर्थयामास ; केचिच्च— वेदानां अन्तः चरमोद्देश्यः प्रदर्शितो यत्र स एव वेदान्तः। अपरे वेदस्य ज्ञानस्य अन्तः परमात्मसाधनरूपचरमोत्कर्षः प्रदर्शितो यत्र स वेदान्त इति। मतत्रयस्य साम्यार्थबोधकत्वात् न तद् विचारसहम्। वेदान्तशब्दस्य यौगिकार्थो यथा भवतु वा,प्राचीनकालादद्यावधि वेदविद्भिर्महामहोपाध्यायैर्व्वेदान्तशब्देन उपनिषदभिहिता।

तेषां खलु पूर्व्वाचार्य्याणां केचिद् गौणमुख्यभेदेन वेदान्तशब्दस्य अर्थद्वयं कल्पयित्वा मुख्यतः उपनिषदं गौणतश्च उपनिषद्भित्तिकानि अन्यानि शास्त्राणि निर्द्दिशन्ति। केचिद्वा उपनिषद्वेदान्तदर्शनभगवद्गीतात्मकं प्रस्थानत्रयं 'वेदान्तः' इत्या-

मनयन्ति। केऽपि आर्यमिश्राः वेदान्तशब्देन प्रधानतो-व्यासकृतं वेदान्तदर्शनमाकलयन्ति। यथाह वेदान्तसार-रचयिता परमहंसः सदानन्दो वेदान्तसारे "वेदान्तो नाम उप-निषत्प्रमाणं, तदुपकाराणि शारीरकसूत्रादीनि च।" तस्य टीकाकारः नृसिंहसरस्वती च अस्मिन्नुपष्टम्भे सुबोधिनी-टीकायां—वेदान्तनामेति उपनिषद एव प्रमाणम्; उपनिषदो यत्र प्रमाणमिति वा। तदुपकाराणि वेदान्तवाक्यसंग्राहकाणि "अथातो ब्रह्मजिज्ञासा" इत्यदीनि सूत्राणि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते, तेषामुपनिषच्छब्दवाच्य-त्वादिति भावः"। तस्यान्यतमटीकाकारो विद्वन्मनोरञ्जिन्यां ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु विद्वज्जननिर्मितनिबन्धेषु चाविशेषेण वेदान्तशब्दस्य लोके प्रयोगदर्शनात् सर्वत्र मुख्यवृत्तितः प्रतीतिं वारयन् मुख्यगौणभेदेन वेदान्तशब्दं व्युत्पादयन्ति वेदान्तो नाम इत्यादिना। वेदान्तशब्दस्य पुनः प्राचीनत्वपरि-कल्पनमसम्भवम्। आधुनिकाः पाश्चात्यपण्डिताः पञ्चसहस्रवर्ष-पूर्व्वो महाभारतस्य काल इत्यङ्गीकुर्व्वन्ति। उपनिषत्त तद्-बहुसहस्रशो वत्सरपूर्व्विकेति क्व तावदत्र सन्देहः? केचिद्-विंशसहस्रवत्सरपूर्व्वां केचिद्वा दशसहस्रवर्षदेशीयेति प्रस्तुवन्ति अतोऽत्र वयमुदासीनाः श्रुतावुल्लेखत्वात् तत्समयनिरूपणम-साध्यं। अत्र तावद्यानि दर्शनषट्कानि सुप्रचलितानि वर्त्तन्ते। तेषु किमपि दर्शनम् न मूलतः स्वाधीनं। सर्व्वाण्येव उपनिष-

न्मूलकत्वात् । वेदान्तदर्शनञ्च प्राधान्येन श्रुतिप्रमाणं श्रुति-समन्वयं श्रुतेः समीचीना व्याख्या वेति वक्तुमलं क्षमः । अस्मिन् किल सृष्टितत्त्वेश्वरस्वरूपजन्मान्तरतत्त्वादिनिरूपक-विविधविषयज्ञानं ब्रह्मज्ञानञ्च सुष्ठु पर्य्यालोचितम् । अवाङ्-मनसगोचरस्य तद्ब्रह्मणो नान्वयेन व्यतिरेकेण वा केनापि दृष्टान्तेन वा विशेषणेन वा स्वरूपं वेद्यं । तथाच श्रुतिः—"यद्वाचा नाभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा । येन वा रूपं पश्यति, येन वा शब्दं शृणोति, येन वा गन्धानाजिघ्रति येन वाचं व्याकरोति, येन वा स्वादु चास्वादु च विजानाति । यदेतत् हृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधादृष्टिर्धृतिर्मतिर्मनीषा ज्योतिः स्मृतिः सङ्कल्पः क्रतुर्य्यम् कामो वश इति सर्व्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति । अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यगन्धवच्च यत् । अनाद्यनन्तम्महतः परं ध्रुवं निवाय्य

तं मृत्युमुखात् प्रमुच्यते ॥ न तत्र सूर्य्यो भाति न चन्द्रतारके नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्वमिदं विभाति ॥" ब्रह्मप्रतिपादकाभिराभिः श्रुतिभिः कथञ्चित् ब्रह्मस्वरूपज्ञानं घटेत ; परं निर्गुणस्य तस्य न किमपि कार्य्यञ्चाह तथाहि "न तस्य कार्य्यं करणञ्च विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते । स्वाभाविकीज्ञानबलक्रिया च । अपानिपादो जवनो ग्रहीता, पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥ न तस्य कश्चित् पतिरस्ति लोके, न चेशिता नैव च तस्य लिङ्गम् । न कारणं करणाधिपाधिपो, न चास्य कश्चिज्जनिता न चाधिपश्च ॥" सगुणेऽप्यत्र सर्गादिकार्य्यजातकर्तृत्वमधिक्षिपन्ति तत्रभवन्तो महर्षयः तथाहि—"आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चनमिषत् स ईक्षते लोकान् नु सृजा इति । स इमान् लोकान् असृजत । ऋतञ्च सत्यञ्चाभीद्धात् तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रोऽर्णवः । समुद्रादर्णवादधिसम्वत्सरोऽजायत अहोरात्राणि विदधत् विश्वस्य मिषतो वशी । सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयत् दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः ।" इति क्षुद्रतनेऽस्मिन् प्रबन्धे विस्तरशो वेदान्तविषयप्रतिपादनमसम्भवं ।

अनतिप्रसरे प्रबन्धे उपनिषत्प्रतिपाद्यं ब्रह्मस्वरूपादि-

कीर्त्तनमङ्गुल्या समुद्रपरिमाणवत् सम्पूर्णमुन्मत्तचेष्टितम्। अतस्तु हन्त! वयं प्रतिनिवृत्तत्र सर्व्वोपनिषच्छसारं प्राचीनवचनं संस्मृत्य प्रतिनिवृत्ता भवामः—

"श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥" इति शम्।

व्याकरणसम्बन्धः

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या व्याकरणं नाम शब्दशास्त्रमुच्यते, "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चितिः। ज्योतिषामयनञ्चैव वेदाङ्गानि वदन्ति षट्।" इत्यादिना वेदाङ्गत्वमपि विश्रूयते शास्त्रेष्वस्य। तच्च व्याकरणं बहुभिरेव नामभिः श्रूयते सर्व्वेषामेव तेषां दृष्टो भाषासु व्युत्पत्तिसम्पादनोपयोगः। शब्दार्थप्रतिपत्ति-प्रयोजकत्वञ्च व्याकरणस्य उपलभ्यते "शब्दग्रहं व्याकरणोपमान-कोषाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद् विवृतेर्व्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इत्यादिप्राचीननिरुक्तेः। तथाहि व्याकरणात् पदानां प्रकृतेः प्रत्ययस्य च भेदेन ज्ञानं, तज्ज्ञानात् शक्तिसम्बन्धेन तदर्थज्ञानं, ततो विषयेषु प्रवृत्तिः, प्रवृत्तिमूलञ्च इष्टम्। तद्धि व्याकरणं सन्धिशब्दधातुकारकसमासादि-भेदेन बहुधा विभक्तम्। तेषु द्वयोः सुसन्निकर्षः सन्धिः, शब्दाः

स्यादियोग्या वृक्षादयः, धातवः तिङ्योग्या अस्-भू-प्रभृतयः, कारकाणि अपादानादीनि षट्, समासाश्च कर्म्मधारादयः षट् इत्यादि। एतेषां प्रत्येकमेव वस्तुतो व्याकरणस्य अङ्गभूतं, एतेषामेकस्यापि अपाये व्याकरणज्ञानस्य उद्देश्यभूतं विपर्य्येस्येत्, तद् व्याकरणं वेत्ति यः सः वैयाकरणः,स न भवतीत्यवैयाकरणः व्याकरणप्रतिपादितपदार्थज्ञानविरहितो वेत्यर्थः। अन्धः अन्धतुल्य एव। तथाहि यथा अन्धः सत्स्वपि आलोकसमवधानादिषु घटादिप्रत्यक्षयोग्येषु कारणेषु केवलेनैकेन चक्षुरिन्द्रियसन्निकर्षरूपकारणविरहतो न घटादिप्रत्यक्षं प्रपद्यते, तथैव सत्स्वपि बोधयोग्येषु मनःसंयोगादिषु केवलेन भाषाबोधसाधकेन व्याकरणज्ञानेन विना न पदार्थान् परेण सुतरां बोधयितुमुपक्रान्तानपि प्रतिपत्तुं क्षमते इति समवलम्बितस्य विषयस्य निर्गलितार्थः। सर्व्वासामेव भाषाणां बोधविषये समुपयुज्यते व्याकरणम्, अज्ञातव्याकरणतत्त्वः नाधिगन्तुमर्हति कथमपि तत्तद्भाषाणामर्थान्, अभिभूताश्च भवन्ति परैरुच्चारितासु अपि कथासु, परेषामादेशादिविधौ सुतरामेव अगृहीततत्त्वा नालं भवन्ति, प्रभूनामप्यादेशपालनादिकं कर्म्म कृत्वा जीविकामपि अर्ज्जयितुम्, तथाहि'घटमानय'इति आदिष्टं प्रभुणा भृत्यं प्रति स च भृत्यः घटशब्दस्य तदुत्तरद्वितीयाविभक्तया आनयेति तिङन्तपदस्य च प्रतिपाद्यमनवधार्य्य, मातरं प्रति घटग्रहानुरोधं वा अवगत्य प्रकृतं घटानयनं न कुर्य्यात्, प्रभुश्च

क्रुद्धः तं कार्य्याधिकारादवरोपयेत् इति। एवं श्रूयते शालिवाहनस्य व्याकरणमविजानतो निजपत्नीसमीपतः कृतसन्धिकस्य 'मोदकं देहि राजन्' इति वाक्यस्थस्य मोदकमिति पदस्य प्रतिपाद्यानिर्द्धारणेन भूयान् निकारः, तदनन्तरमेव तस्य व्याकरणजिज्ञासया सर्व्ववर्म्मनिर्म्मितकलापाध्ययनेन व्याकरणार्थपारदर्शिता, सर्व्वा एव भाषा नियन्त्रिताः प्रायेण व्याकरणविधिषु अतएव तत्तन्नियमानविजानतामेकस्य स्थाने अपरस्य विनियोगे भवति भूयसोऽर्थस्य हानिः, प्रकृततत्त्वापरिज्ञानञ्च विदुषाम्। तदेवं क्रमेण व्याकरणज्ञानम् उपयुज्यते भाषाविधौ तेन विना अन्ध इव हस्तामर्षी न प्रकृतं तत्त्वम् अधिगन्तुमर्हति कोऽपि, अधिगतव्याकरणश्च सर्व्वं यदेव शास्त्रं अध्येतुं प्रवर्त्ततां पाठार्थी तत्र तत्रैव प्रयोजनं व्याकरणस्य, अनेकेषामेव वर्त्तते धारणा, तथा यत् तर्कादिदर्शनशास्त्रेषु न उपयुज्यते व्याकरणज्ञानं, वस्तुतः तन्मिथ्यैव, यतस्तत्रापि वर्त्तते भाषा, भाषाभावश्च व्याकरणसाहायकेन अधिगन्तव्यम्, अन्यथा अध्यापकानां वचनमात्रमेव सर्व्वत्र सम्बलं स्यात्, न तु विस्मृतगुरुवृत्तान्तानां कथमपि परिस्फुरितुमर्हति प्रकृतविषयस्तत्त्वः अधिगतव्याकरणानाञ्च भाषाविदां,गुरुवाक्यविस्मृतावपि भाषासाहायकेन वर्त्तेत प्रकृतविषयाधिगतिक्षमतेति भूयसा समालोचनेन शोभनमेव समीरितं केनापि 'अवैयाकरणस्त्वन्धः' इति कृतं पल्लवितेन।

———

कथञ्चिद्भावसाम्यानि पद्यानि ।

मानुषीभ्यः कथं नु स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ [शकु]

नान्यत्र राघवात् वंशात् प्रसूतिर्वत्सयोः क्षमा ।
दुग्धार्णवादृते जन्म चन्द्रकौस्तुभयोः कुतः ॥ [वीर]

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ [भारवि]

अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ [माघ]

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ [शकु]

पतन्ति नास्मिन् विशदाः पतत्रिणः
धृतेन्द्रचापा न पयोदपंक्तयः ।
तथापि पुष्णाति नभः श्रियं परां
न रम्यमाहार्य्यमपेक्षते गुणम् ॥ [भारवि]

गर्ज्जन् हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान्निशम्य ।
क्रमं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥ [भट्टि]

न तेजस्तेजस्विप्रसृतमपरेषां प्रसहते
स तस्य स्वोभावः प्रकृतिनियतत्वादकृतकः ।

मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥ [उत्तररा]

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ [भारवि]

शमप्रधानेषु तपोवनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्य्यकान्तास्तदन्यतेजोऽभिभवाद्दहन्ति ॥ [शकु]

पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ [कुमार]

तपेन वर्षाः शरदा हिमागमो-
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तिं दधतः सदर्त्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥ [माघ]

त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसम्पत्प्रसरस्य सीमा ।
अदृश्यतादर्शतलामलेषु छायेव या स्वर्ज्जलधेर्ज्जलेषु ॥ [माघ]

विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या ।
परिखाकपटस्फुटस्फुरत् प्रतिबिम्बानवलम्बिताम्बुनि ॥

गुर्व्वपि विरहदुःखमाशाबन्धः साहयति ॥
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् ।
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥ [मेघ]

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च ॥

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ [मेघ]

यात्येकतोऽस्तशिखरं पतिरोषधीना-

माविष्कृतोऽरुण:पुर:सर एकतोऽर्क: ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥ [शकु]
उत्पत्तिपरिपूताया किमस्या: पावनान्तरै: ।
तीर्थोदकञ्च वह्निश्च नान्यत: शुद्धिमर्हत: ॥ [उत्तरराम]
निसर्गत: पवित्रस्य किमन्यत् पावनं तव ।
तीर्थोदकञ्च वह्निश्च नान्यत: शुद्धिमर्हत: ॥ [वीरच]
सावज्ञमुन्मील्य विलोचने सकृत्
च्चणं मृगेन्द्रेण सुसुप्सुना पुन: ।
सैन्यान्य: यात: समयापि विव्यथे
कथं सुराजभ्भमन्यथायवा ॥ [माघ]
शशंस तुल्यसत्तानामित्यादि ।
अस्या: कचानां निखिनश्च किन्न, । [नैषध]
मृदुपवनविभिन्नो मत्प्रियाया: प्रणाशात् । [विक्रमो]
नवजलधर: सन्नद्धोऽयं न दृप्तनिशाकर:
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न वाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया मम नोर्व्वशी ॥ [विक्रमो
हृदिविसलताहारी नायं भुजङ्गमनायक:
कुवलयदलश्रेणी कण्ठे न सा गरलद्युति: ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग, क्रुधा किमु धावसि ॥
तेनाम्बा यदि सूतिनी वद वन्ध्या कीदृशी भवति । [हितोप]
मा जीवन् य: परावज्ञादु:खदग्धोऽपि जीवति ।

तस्या जननिरेवास्तु जननीक्लेशकारिण: ॥ [माघ]
उद्यमेन हि सिद्धन्ति कार्य्याणि न मनोरथै: ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगा: [हितोप]
उपायमास्थितस्यापि नश्यन्त्यर्था: प्रमाद्यत: ।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥ [माघ]
वयं क्क वर्णाश्रमरक्षणोचिता
क्क जाति हीना गुणजीवितच्छिद: ।
सहापकृष्टैर्महतां न सङ्गतं
भवन्ति गोमायुसखा न दन्तिन: ॥ [माघ]
प्रतिवाचमदत्तकेशव: शपमानाय न चेदिभूभुजे ।
अनु हुं कुरुते घनध्वनिं न हि गोमायुरुतानि केशरी ॥ [माघ]
श्यामास्वङ्गं चकितहरिणी प्रेक्षणे दृष्टिपातम्
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रू विलासान्
हन्तैकस्मिन् क्कचिदपि न ते चण्डि, सादृश्यमस्ति ॥

प्राय: सदृशम्—

कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमा: ॥
त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिता: सत्यममी गुणास्तया ।
विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमा ॥ [रघु]

अंशत: सदृशम्—

मृदुपवनविभिन्नो मत्प्रियाया: प्रणाशात् । इत्यादि
सति कुसुमसनाथे कं हरेदेष बर्ह: ॥ [विक्रमो]
प्रतिक्षणेनापि पतिं सेवन्ते भर्तृवत्सला: साध्व्य: ।

अन्यसरितामपि जलं समुद्रगाः प्रापयन्त्युदधिम्॥ [मालवि]
महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः॥ [माघ]
परिपाण्डुदुर्ब्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।
करुणस्य मूर्त्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी॥ [उत्तर]
वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणी।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति॥ [शकु]
अनियतरुदितस्मितं विराजत् कतिपयकोमलदन्तकुड्मलाग्रम्।
वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमञ्जुजल्पितं ते॥ [उत्तर]
आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति॥ [शकु]
नच न परिचितो न चाप्यरम्यश्चकितमुपैमि तथापि पार्श्वमस्य।
सलिलनिधिरिव प्रतिक्षणं मे भवति स एव नवो नवोऽयमक्ष्णोः॥ [मालवी]
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादो रत्नैरिवार्णवः॥ [रघु]

प्रयोजनीयविषयसंस्थानम्।

अक्षारलवणम् ... गोक्षीरं गोघृतं चैव धान्यमुद्गास्तिला यवाः।
सामुद्रं सैन्धवं चैव अक्षारलवणं स्मृतम्॥
अग्नयः ... दक्षिणाग्निर्गार्हपत्याग्निः आहवाग्निश्च त्रयः।
अतिरथः ... अमिताद्‌ योधयेद्‌ यस्तु स प्रोक्तोऽतिरथस्तु सः।

अथ शब्दार्थाः ··· मङ्गलानन्तरारम्भप्रश्नकात्‌स्न्र्येषु चाप्यथ ।

अध्यग्निः ··· विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम् ॥

अध्यायः ··· सर्गो वर्गः परिच्छेदोद्‌घाताध्याङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च ॥
स्थानं प्रकरणञ्चैव पर्व्वोल्लासाह्निकानि च ।
पुराणादौ परिच्छेदा अनेके परिकीर्त्तिताः ॥

अनात्मा ··· अप्राप्तः प्राप्यते योऽयमत्यन्तं त्यज्यतेऽथवा ।
जानीयात्तमनात्मानं बुध्यन्तं वपुरादिकम् ॥

अनुग्रहः ··· विरूपोन्मत्तनिःस्वानमकुत्सापूर्व्वकं हि यत् ।
पूरणं दानमानाभ्यामनुग्रह उदाहृतः ॥

अन्नं ··· शस्यं चेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते ।
आमन्तु वितुषं ज्ञेयं खिन्नमन्नमुदाहृतम् ॥

अभ्यन्तरकला ··· अभ्यन्तरकला या तु स्पृश्याङ्गस्पर्शनं रतौ ।

अर्द्धमत्तली (संस्थानं) उपेतापसृतौ पादौ वामश्चेद्रेचितः करः ।
कट्यामन्यस्तदा त्वर्द्धमत्तली तरुणे सदे ॥

अवीरा ··· अजातपुत्रा विधवा सावीरा परिकीर्त्तिता ॥

अष्टका ··· अष्टका तु समाख्याता सप्तम्यादिदिनत्रयम् ॥

अष्टाङ्गः ··· जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया ।
शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः ॥

अष्टाङ्गोऽर्घः ··· आपः क्षीरं कुशाग्रञ्च दधि सर्पिः सतण्डुलम् ।
यवः सिद्धार्थकञ्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः ॥

अष्टादशविद्या ··· सषड़ङ्गा चतुर्वेदी मीमांसा न्यायविस्तृतिः ।
आयुर्वेदो धनुर्वेदो गान्धर्व्वमर्थशासनम् ॥

पुराणं धर्म्मशास्त्रञ्च विद्या अष्टादश स्मृताः। ...

अष्टैश्वर्य्यम् ... अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता॥

अस्वामिकः ... अटव्यः पर्वताः पुण्या नद्यस्तीर्थानि यानि च।
सर्व्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः॥

आचित्रिका [गीतिः] चच्चत्पुटादितालेन मार्गत्रयविभूषिता।
आचित्रिका स्वरपदग्रथिता कथिता बुधैः॥

आक्षेपकः ... यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः।
तदा क्षिपत्याशु मुहुर्मुहुर्देहं नभश्चरः।
मुहुर्म्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः॥

आयुः ... विभवे सति नैवात्ति न ददाति जुहोति न।
तमाहुराखुम्।

आगमं ... आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ।
मतञ्च वासुदेवस्य तस्मादागमसुच्यते॥

[अन्यच्च] ... सृष्टिश्च प्रलयश्चैव देवानाञ्च तथार्च्चनम्।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च।
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्व्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदोविदुः॥

आचार्य्यः ... उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते॥
आम्नायतत्त्वविज्ञानाच्चराचरसमानतः।
यमादियोगसिद्धत्वादाचार्य्य इति कथ्यते॥

आततायी ... अग्निदोगरलश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षड़ेते आततायिनः॥

आर्य्य: ··· कुलं शीलं दया दानं धर्म्म: सत्यं कृतज्ञता ।
अद्रोह इति येष्वेतत् तानार्य्यान् सम्प्रचक्षते ॥

[अथवा] कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।
तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृत: ॥

आर्य्यावर्त्त: ··· आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यमार्य्यावर्त्तं प्रचक्षते ॥

आलीढ़ं ··· नमिता पूर्व्वजङ्घा तु पश्चिमा प्रगुणा भवेत् ।
असमोमध्यकाय: स्यादालीढ़स्य च लक्षणम् ॥
[अथवा] अलीढ़ं दक्षिणं पादम् ।

आश्रम: ··· गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे ।

इच्छा ··· निर्दु:खत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्य्यदि ॥

इतिहास: ··· धर्म्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।
पूर्व्ववृत्तकथायुक्तमितिहासं प्रचक्षते ॥

इतिशब्दशक्ति: ··· स्वरूपाविर्भावकता, कारकाविर्भावकता, पदार्थाविर्भावकता च ।

इन्द्रियवध: ··· बाधिर्य्यं कुष्ठतान्धत्वं जड़ताऽजिघ्रता तथा ।
मूकता कौण्यपङ्गुत्वक्लैव्योदावर्त्तमत्तता ॥

इन्द्रियवृत्ति: ··· शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति: ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥

इलावृत्तम् ··· इलावृत्तं नीलगिरेर्य्याम्यतो निशधादुदक् ।

इष्टम् ··· एकाग्निकर्म्म हवनं वेतायां यच्च हूयते ।
अन्तर्वेद्याञ्च यद्दानमिष्टं तदभिधीयते ॥

[अथवा] अग्निहोत्रं तप: सत्यं वेदानाञ्चार्थपालनम् ।
आतिथ्यं वैश्यदेवञ्च इष्टमित्यभिधीयते ॥

इष्टापूर्त्तफलम् ··· इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षमाप्नुयात् ।

ईतयः ··· अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षड़ेते ईतयः स्मृताः ॥

उत्कलः ··· जगन्नाथप्रान्तदेशः उत्कलः परिकीर्त्तितः ।

उत्खातकेलिः ··· उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीड़ा निगद्यते ।

उपधातुः ··· सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ।
तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतुः ॥

उपमावाचकम् ··· इववद्वा यथाशब्दाः समाननिभसन्निभाः ।
तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाः ॥
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक् सदृशसंवादिसजातीयानुवादिनः ॥
प्रतिबिम्बप्रतिच्छन्दस्वरूपसमसम्मिताः ।
सलक्षणसदृक्षाभसपक्षोपमितोपमाः ॥
कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधीः अपि ।
सवर्णतुलितौ शब्दौ ये च नूनार्थवादिनः ॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
स्पर्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्ज्जति ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति सन्धत्ते हसतीर्षत्यसूयति ॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्द्धं विगृह्णाति तुलां तेनाधिरोहति ॥
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति ॥
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ।

	उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥
उपसर्गाः ···	निपाताश्चादयो ज्ञेयाः प्रादयस्तूपसर्गकाः ।
	द्योतकत्वात् क्रियायोगे लोकादवगता इमे ॥
उपोद्घातः ···	चिन्तां प्रकृतिसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ।
ऊर्म्मिः ···	बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ ।
	शोकमोहौ शरीरस्य जरामृत्यू षडूर्म्मयः ॥
[अथवा] ···	पंक्तीकृतानामश्वानां नमनोन्नमनाकृतिः ।
	अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृता ॥
ऋत्विक् ···	अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
	यः करोति कृतो यस्य स तस्यर्त्विगिहोच्यते ॥
ऋष्यमुकाद्रिः ···	ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितो द्रुमः ।
एकोद्दिष्टम् ···	एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते ।
एवकारस्त्रिधा ···	अयोगमन्ययोगञ्च अत्यन्तायोगमेव च ।
	व्यवच्छिनत्ति धर्म्मस्य एवकारस्त्रिधामतः ॥
ओजः ···	भ्रमरैः फलपुष्पभ्यो यथा सम्भ्रियते मधु ।
	तद्वदोजशरीरेभ्यो धातुः सम्भ्रियते नृणाम् ॥
ओङ्कारस्याथशब्दौ	ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
	कण्ठं भित्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ ॥
औद्भिदम् ···	विदार्य्य भुमिं निम्नां यत् महत्या धारयास्रवेत् ।
	तत्तोयमौद्भिदं नाम— ।
औरसः ···	सवर्णायां संस्कृतायां स्वयमुत्पादयेत्तु यम् ।
	औरसं तं विजानीयात्— ।
ककुभः [रागः]	मध्यमापञ्चमी चैव त्युद्भवः ककुभोभवेत् ।
	धांशग्रहः पञ्चमान्तो धैवतादिकमूर्च्छनः ॥

प्रसन्नमधयारोहिण्यां करुणे यमदैवत:। गेय: शरदि—

कदर्थ्य: ··· आत्मानं धर्म्मकृत्याञ्च पुत्रदारांश्च पीड़येत्।
लोभात् य: पितरौ भृत्यान् स कदर्थ्य इति स्मृत:॥

कम्बोज: ··· पञ्चनदं समारभ्य म्ले च्छाद्दक्षिणपूर्ब्बत:। कम्बोजदेश:—

करमाला ··· आरभ्यानामिकामध्यं दक्षिणावर्त्त योगत:।
तर्ज्जनीमूलपर्य्यन्तं करमालाप्रकीर्त्तिता॥

कर्णाटदेश: ··· रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि। कर्णाटदेश:—

कर्म्मसाची ··· सूर्य्य: सोमो यम: कालो महाभूतानि पञ्च च।
एते शुभाशुभस्येह कर्म्मणो नव साक्षिण:॥

कलहान्तरिता··· कोपात् कान्तं परानुद्य पश्चात्तापान्विता यदि।
कलहान्तरिता प्रोक्ता—।

कलिङ्गदेश: ··· जगन्नाथात् पूर्ब्बभागे कृष्णातीरान्तरं शिवे।
कलिङ्गदेश: संप्रोक्त:—।

कलिनाशनम् ··· कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षे: कीर्त्तनं कलिनाशनम्॥

कवीनां पुनरुक्ति:···प्रायेणैकार्थमप्यनेकं श्लोकमुक्तिविशेषलाभाल्लिखन्ति कवय:॥

काञ्ची ··· एकयष्टिर्भवेत् काञ्ची मेखलाष्टयष्टिका।
वलय: षोड़श ज्ञेया:—।

काण्डपृष्ठ: ··· स्वकुलं पृष्ठत: कृत्वा यो वै परकुलं व्रजेत्।
तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृत:॥

कानीन: ··· कानीन: कन्यकाजातो मातामहसुतो मत:।

कामवाणा: ··· सम्मोहनोन्मादनौ च मोहनस्तापनस्तथा।
स्तम्भनश्चेति कामस्य पञ्चवाणा: प्रकीर्त्तिता:॥

कामवाणपुष्पाणि···अरविन्दमशोकञ्च शिरीषं चुतमुत्पलम्।

पञ्चैतानि प्रकीर्त्त्यन्ते पञ्चवाणस्य सायकाः ॥

अथवा … अरविन्दमशोकञ्च चुतञ्च नवमल्लिका ।
नीलपद्ममिमानि स्युः सायकाश्चित्तजन्मनः ॥

किरातदेशः … सप्तकुण्डं समारभ्य रामक्षेत्रान्तिकं शिवे ।
किरातदेशो देवशि, विन्ध्यशैलेऽवतिष्ठति ॥

किलकिञ्चितम्… हर्षाद्रुदितगीतादिव्यामिश्रं किलकिञ्चितम् ।

कुक्कुटः … शूद्राज्जातो निषादात्तु स वै कुक्कुटकः स्मृतः ।

कुक्कुटजातिः … दीर्घग्रीवः सितवपुर्महाप्राणः स्ववन्मनाः ।
बलाकाजातिरित्युक्तास्तदन्यो नारिकेलजः ॥

कुटिलिका [नाट्यं] रागेण रहितं यत्तु चाङ्गमत्तलिकायुतम् ।
भषयैव च तन्नाट्यं कुटलीसंज्ञकं मतम् ॥

कुट्टमितम् … केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् ।
प्राहुः कुट्टमितं नाम शिरः करविधूननम् ॥

कुम्भः … दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः ।

कुरुदेशः … हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे ।
पाञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः ॥

कुलपतिः … मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

कुलपर्व्वताः … महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्व्वताः ॥

कृतयुगम् … चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।

कृष्णः … कृषिर्भूवाचकः शब्दः णश्च निर्वृत्तिवाचकः ।
तयोरैक्यं परब्रह्म कृष्ण इत्यभिधीयते ॥

केरलदेशः … सप्तब्रह्मण्यं समारभ्य यावद्देशो जनार्द्दन ।

तावत् केरलदेशः स्यात्— ।

केशवः ··· यस्मात् त्वयैव दुरात्मा हतः केशी जनार्द्दन ।
तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसि ॥

कोङ्कणदेशः ··· अथाभ्यङ्गं समारभ्य कोटिदेशस्य मध्यगे ।
समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः ॥

कोचः ··· तीवरस्यैव स पुत्रः मांसच्छेदसमुद्भवः ।
कोचजातिरिति ख्यातः— ।

कौमुदी ··· कौ मोदन्ते जना यस्मान्नानाभावैः परस्परम् ।
हृष्टास्तुष्टाः सुखापन्नास्तेन सा कौमुदी मता ॥

क्षत्रियः ··· क्षतजं सेवते कर्म्म वेदाध्ययनसंयुतम् ।
दानादानबहिर्भूतः स वै क्षत्रिय उच्यते ॥

क्षमा ··· बाह्ये चाध्यात्मिके चैव दुःखे चोत्पातिके क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता ॥

[अथवा] ··· आक्रुष्टोऽभिहतो वापि नाक्रोशेन्न च हन्ति वा ।
अदुष्टैर्वाङ्मनःकायैस्तितिक्षा सा क्षमा मता ॥

क्षात्रतेजः ··· शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रकर्म्म स्वभावजम् ॥

क्षेत्रजः ··· यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजो मतः ॥

क्षेत्रज्ञः ··· क्षेत्राख्यानि शरीराणि तेषां चैव यथा सुखम् ।
आत्मानं वेत्ति संयोगादतः क्षेत्रज्ञ उच्यते ॥

खगगतिः ··· डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।
विडीनमवडीनञ्चातिडीनं डीनडीनकम् ॥
गतागतं प्रपतितं संपातः पक्षिणां गतिः ।

खण्डक:[गीति:]···विरहव्यापृता या तु पठेद्गीतिं कुशीलवौ ।
प्राकृतेन प्रबन्धेन खण्डक: स उदाहृत: ॥

[अथवा] ··· पूर्व्वं चतुर्व्विंशतिभिरष्टाविंशतिभि: परम् ।
मात्राभिरिह यस्यार्द्धं खण्डक: स प्रकीर्त्तित: ॥

खण्डधारा[गीति:] यद्गीतं गुणकार्थ्या च रागेण क्रीड़केण च ।
तालेन सा खण्डधारा षष्ठिकेन प्रकाशिता ॥

[अथवा] ··· चतुर्द्दशकलायुक्तैश्चतुर्भिश्चरणैरिह ।
खण्डाख्या द्विपदी गीति: खण्डधारापि सा भवेत् ॥

खण्डिका [गीति:] पर्य्यायेण शनैस्तीर्य्यङ्नतमुक्तं धुतं शिर: ।
श्रीरागकुम्भतालेन निबद्धा खण्डिकागीति: ॥

खर्व्वट: ··· एकतो यत्र तु ग्रामो नगरं चैकत: स्थितम् ।
मिश्रन्तु खर्व्वटो नाम नदीगिरिसमाकुलम् ॥

खुरक: [गेय:]···पूर्व्वपूर्व्वाचरत्यागे योऽन्यवर्णचय: स्मरेत् ।
उत्तरोत्तरसंवादी खुरक: परिकीर्त्तित: ॥

खुरक: [नृत्यं] पठमञ्जरीरागसंयुतं यत् द्रुतमध्येन लयेन प्रयुक्तम् ।
प्रतितालयुतञ्च नर्त्तनं तत् खुरकाख्यं मुनये शिवेन दत्तम् ॥
लघुद्रुतद्वयं यत्र प्रतिताल: प्रकीर्त्तित: ॥

गजपरिमाणम्··· साधारणनवाङ्गुल्या विंशदङ्गुलिको गज: ।

गान्धर्व्वविवाह:··· इच्छयान्योन्यसंयोग: कन्यायाश्च वरस्य च ॥
गान्धर्व्व: स तु विज्ञेय:— ।

गुड़: ··· इक्षुरसो य: सम्पक्वो जायते लोष्ट्रवत् दृढ़: ।
स गुड़ो गौड़देशे तु मत्सण्डिव गुढ़ोमत: ।

गुहाशया: ··· सिंहव्याघ्रवृकाच्छचतरक्षुद्वीपिनस्तथा ।
वभ्रुजम्बुकमार्जारा इत्याद्या: स्युर्गुहाशया: ॥

गौड़: ··· वङ्गदेशं समारभ्य भुवनेशान्तरं शिवे ।
गौड़देश: समाख्यात:— ।

[अथवा] सारस्वता: कान्यकुब्जा गौड़मैथिलकोत्पला: ।
पञ्चगौड़ा इतिख्याता विन्ध्यस्योत्तरवासिन: ॥

ग्राम: ··· विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि ।
स तु ग्राम इति प्रोक्त: शूद्राणां वास एव वा ।

अथवा] ··· तथाशूद्रजनप्राया: सुसमृद्धकृषीवला: ।
क्षेत्रोपयोगभूमध्ये वसति ग्रामसंज्ञिका ॥

[अथवा] ··· यथा कुटुम्बिन: सर्व्वेऽप्येकीभूता भवन्ति हि ।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥

घटिका ··· गुर्व्वक्षराणामुदितञ्च षष्ट्या पलं पलानां घटिका किलैका ।

चतुरस्रक: (संस्थानं) नद्यावर्त्तस्थयोरूर्व्वो भवेदष्टादशाङ्गुलम् ।
अन्तरे चतुरे: स्थानं चतुरस्रं तदोदितम् ॥

चतुर्द्दशविद्या: ··· अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर: ।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश ॥

चतुर्व्वर्गा: ···
(धर्म्म) विहितक्रियया साध्यो धर्म्म: पुंसां गुणो मत: ।
(किंवा) वेदप्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्यय: ॥
(अर्थ:) अर्ज्जनवर्द्धनसंरक्षणात्मकं धर्म्मम् ।
(काम:) पुंसो या विषयापेक्षा स काम इति भण्यते ।
(मोक्ष:) जीवात्मापरमात्मनोरुपाधिभेदादैक्यं मोक्षम् ।

चर्च्चरी[गीति:]··· द्रुतमध्यलयं समाश्रिता पठति प्रेमभरान्नटी यदि ।
प्रतिमण्ठकरासकेन वा द्रुतमध्या प्रथमा हि चर्च्चरी ॥

चित्रशिखण्डिन:···मरीचिरङ्गिरा अत्रि: पुलस्त्य: पुलह: क्रतु: ।
वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिन: ॥

चोदना ··· चोदना चोपदेशश्च विधिश्चैकार्थवाचिन:।

जम्भालिका (गीति:) उद्ग्राहो द्वि: सकृद्वैक खण्डो द्वि: शकलोऽथवा।

यत्र ध्रुवोद्विराभोगो ध्रुवे मुक्ति: स जम्भक:॥

एतस्यैव नाम जम्भलिकेति मतङ्गमतम्।

[अथवा] ध्रुवे मुक्तिरहिता जम्भकलचणलचिता जम्भलिका इति सोमचरणा:।

[अथवा] शुद्धा द्विपदिका गीति: सैव जम्भलिकोच्यते।

जयपत्रम् ··· पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृप।

प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते॥

जलदिव्यम् ··· समकालमिषुं मुक्तमानीयान्यो जवी नर:।

गते तस्मिन्निमग्नाङ्गं पश्येच्चेत् शुद्धिमाप्नुयात्॥

जाया ··· पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते।

जायायास्तद्धि जायात्वं यदस्यां जायते पुन:॥

जाह्नवी ··· जानुद्वारा पुरादात्तां जाह्नु: संपीयकोपन:।

तस्य कन्या स्वरूपा च जाह्नवी तेन कीर्त्तिता॥

जितेन्द्रिय: ··· श्रुत्वा दृष्ट्वा तथा पृष्ट्वा भुक्त्वा घ्रात्वा च यो नर:।

न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रिय:॥

जीवन्मुक्त: ··· सुषुप्तिवद्दजाग्रति यो न पश्यति द्वयन्तु पश्यन्नपि चाद्वयत्वत:।

तथा च कुर्व्वन्नपि निष्क्रियश्च य: स आत्मविन्नान्य इतीह निश्चय:॥

ज्ञानम् ··· ज्ञानं द्विधा वस्तुमात्र द्योतकं निर्व्विकल्पकम्।

सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा॥

संकल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चया:।

ऊहोऽनध्यवसायश्च तथान्योऽनुभवादय:॥

डित्थ: ··· श्यामरूपो युवा विद्वान् सुन्दर: प्रियदर्शन:।

सर्व्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते॥

तड़ागः ... प्रशस्तभूमिभागस्थो बहुसत्त्वसरोषितः ।
जलाशयस्तड़ागः स्यात्— ।

[अथवा] शतेन धनुर्भिः पुष्करिणी, त्रिभिर्दीर्घिका,
चतुर्भिर्द्रोणः, पञ्चभिस्तड़ागः ॥ इति वशिष्ठः ।

तानः ... विस्तार्य्यन्ते प्रयोगाय मूर्च्छना शेषसंश्रयाः ।
तानास्तेऽप्यनपञ्चाशत् सप्तस्वरसमुद्भवाः ॥

ताराव्यावर्त्तनम् ... दृष्टिराकेकरा किञ्चित् स्फुटापाङ्गप्रसारिता ।
निमीलिताङ्गी या लोके ताराव्यावर्त्तनोत्तरा ॥

तेना ... ओं तत्सदिति निर्द्देशात् तत्त्वमस्यादिवाक्यतः ।
तदिति ब्रह्म तेनायं ब्रह्मणा, मङ्गलात्मकः । लक्षितस्तेन: तेना—

[किंवा] तेकारः शङ्करः प्रोक्तो नाकारश्च उमा तथा ।
गीतादौ तेन वक्तव्यं तेनां इत्यक्षरद्वयम् ॥

तैत्तिरीयाः ... जजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजाः ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥

त्रिजातकम् ... त्वदेलापत्रकैस्तुल्यैस्त्रिसुगन्धिस्त्रिजातकम् ।
नागकेशरसंयुक्तं चतुर्जातकमुच्यते ॥

त्रियामा ... त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥

त्रिमधु ... घृतं सिता माक्षिकञ्च विज्ञेयञ्च मधुत्रयम् ।

दधिकूर्च्चिका ... दध्ना सह पयः पक्वं यत् स्यात्तधिकूर्च्चिका ।

दमः ... निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ।

[अथवा] ... कुत्सितात् कर्म्मणो विप्र, यच्च चित्तनिवारणम् ।
स कीर्त्तितो दमः— ।

दया ... यत्नादपि परक्लेशं हर्त्तुं या हृदि जायते ।

इच्छाभूमिः सुरश्रेष्ठ सा दया परिकीर्त्तिता ॥

दशस्मरदशाः ··· नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संङ्कल्पः ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशादशैव स्युः ॥

[अथवा] ··· अभिलाषचिन्तास्मृतिगुणकथनोद्वेगसंलापाश्च ।
उन्मादोऽथ व्याधिजड़ता मृतिरिति दशात्र कामदशाः ॥

दशाश्वः ··· रथस्त्रिचक्रः सोमस्य कुन्दाभास्तत्र वाजिनः ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥

दामोदरः ··· दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो नाम— ।

दीक्षाः ··· दीयते विमलं ज्ञानं क्षीयते कर्म्मवासना ।
तेन दीक्षेति सा प्रोक्ता— ।

दृष्टिः ··· चक्षुर्जन्यमनोवृत्तिश्चियुक्ता रूपभासिका ।
दृष्टिरित्युच्यते— ।

देवः ··· दीव्यति क्रीड़ते यस्माद्रोचते द्योतते दिवि ।
तस्माद्देव इति प्रोक्तः स्तूयते सर्व्वदैवतैः ॥

देवलः ··· देवकोषोपजीवी च नाम्ना देवलको भवेत् ।

देवलोकः ··· भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।
तपः सत्यञ्च सप्तैते देवलोकः प्रकीर्त्तितः ॥

देशान्तरम् ··· वाचो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः ।
महानद्यन्तरं यत्र तद्देशान्तरमुच्यते ॥

दवम् ··· प्राग्जन्मनि कृतं कर्म्म शुभं वा यदिवाशुभम् ।
दैवशब्देन निर्द्दिष्टमिहजन्मनि तद्बुधैः ॥

दैवी मानुषी चापत् हुताशनो जलं व्याधिदुर्भिक्षं मरणं तथा ।

इति पञ्चविधं दैवं मानुषं व्यसनं ततः ॥
आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् ।
पृथिवीपतिलोभाच्च नराणां पञ्चधा मतम् ॥

द्यूतम् ··· अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ॥

द्वन्द्वः ··· क्षुत्पिपासे शोकमोहौ रागद्वेषौ तथैव च ।
कामक्रोधप्रभृतयो द्वन्द्वशब्देन वर्णिता ॥

द्वादश मदिरा ··· माध्वीकं पानसं द्राक्षं खर्ज्जूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ॥
मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव च ॥

द्वादशमण्डलम् ··· अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् ।
तथारिमित्रमित्रञ्च विजिगीषोः पुरःसराः ॥
पार्ष्णिग्राहास्ततः पश्चादाक्रन्दस्तदनन्तरम् ।
आसारावनयोश्चैव विजगीषोस्तु पृष्ठतः ॥
अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः ।
अनुग्रहे संहतयोः समर्थो व्यस्तयोर्व्वधे ॥

द्वादशसूर्य्याः ··· विवस्वानर्य्यमा पूषा त्वष्टा च सविता भगः ।
धाता विधाता वरुणो मित्रः शक्रुरुक्रमः ॥

द्विपदिका (गीतिः) शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्विधा
द्विपदीकरणाख्येन तालेन परिगीयते ॥
पादेन छः पञ्चभागोऽन्त्ये जौ षष्ठद्वितीयकौ ।
चतुर्भिरीदृशैः पादैः शुद्धा द्विपदिकोच्यते ॥
अर्द्धान्ते ऽन्ये स्वरानाहुः खण्डा स्याच्छुद्धयार्द्धया ।
षष्ठेनैकेन गुरुणा मात्रा द्विपदिका मता ।
ज्ञेया शुद्धैव सम्पूर्णा गुरुणान्ते ऽधिकेन तु ॥

द्वीपम् ... जम्बुशाककुशक्रौञ्चशाल्मलिप्लक्षपुष्कराः ॥

द्वैपायनः ... द्वीपे न्यस्ततया बालस्तस्मात् द्वैपायनोऽभवत् ॥

धर्म्मक्षेत्रम् ... ब्रह्मवेदिः कुरुक्षेत्रं पञ्च रामह्रदान्तरम्।
धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि ॥

धर्म्मदानम् ... पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्म्मबुद्ध्या यत् धर्म्मदानं प्रचक्षते ॥

धर्म्मपादाः ... सत्यं शौचं दया दानमिति धर्म्मस्य वृषरूपिणश्चत्वारः पादाः।

धर्म्माधिकरणम् ... समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणे भवेत् ॥
धर्म्मशास्त्रानुसारेण अर्थशास्त्रनिरूपणम्।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत् ॥

धातवः ... रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।

[अपि च] ... सुवर्णरूप्यताम्राणि हरितालं मनःशिला।
गैरिकाञ्जनकासीससीसलोहं सहिङ्गुलम्।
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः ॥

[किञ्च] हेमताराराणागाश्च ताम्ररङ्गे च तीक्ष्णकम्।
कांस्यं कान्तलौहञ्च धातवो नव कीर्त्तिताः ॥

[एवञ्च] हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च।
वङ्गमायसं रैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः ॥

[अपरञ्च] ... सुवर्णं रजतं ताम्रं लौहं कुप्यञ्च पारदम्।
रङ्गञ्च सीसकञ्चैव इत्यष्टौ दैवसम्भवाः ॥

धारणा ... यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि।
धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः ॥

धीगुणः ... शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा।

ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥

धैर्य्यम् ... स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति गीयते ॥

ध्यानम् ... ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्याता परमानन्ददायिनी ॥

[अथवा] ध्यै चिन्तायां स्मृतो धातुश्चिन्तातत्त्वेन निश्चला ।
एतद्ध्यानमिह प्रोक्तम्— ।

नक्षत्रमाला ... सा तु नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः ।

नगरम् ... पुण्यक्रियादिनिपुणैश्चातुर्व्वर्ण्यजनैर्युतम् ।
अनेकजातिसंबद्धं नैकशिल्पिसमाकुलम् ॥
सर्व्वदैवतसंबद्धं नगरित्यभिधीयते ॥

नञर्थाः तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ।

नतिः ... त्रिकोणमथ षट्कोणमर्द्धचन्द्रप्रदक्षिणम् ।
दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणम् ॥

नन्दा: ... नन्दते सुरलोकेषु नन्दने वसतेऽथवा ।
हिमाचले महापुण्ये मन्दादेवी ततोऽभवत् ॥

नन्द्यावर्त्तम् (संस्थानम्) अस्यैव चेच्चरणयोरन्तरं स्यात् षड़ङ्गुलम् ।
वितस्तिमात्रमथवा नन्द्यावर्त्तं तदुच्यते ॥

नपुंसकम् ... स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥

नरोत्तमः ... यः स्वकात् परतो वेह जातनिर्वेद आत्मवान् ।
हृदि कृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः ॥

नवरत्नम् ... मुक्तामाणिक्यवैदुर्य्यगोमेदावज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्च— ।

नवाम्बिका ... ब्राह्मणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही नारसिंही च माहेन्द्री चण्डिका तथा॥
महालक्ष्मीरिति प्रोक्ताः क्रमेणैता नवाम्बिकाः॥

नवद्वीपाः ... भारतस्यास्य वर्षस्य नव भेदान्निशामय।
इन्द्रद्वीपः कशेरुमांस्ताम्रकर्णगभस्तिमान्॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्तथ वारुणः।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः॥

नववर्षाः ... नाभि (भारत) किंपुरुषहरिवर्षैलावृतरम्यकहिरण्मयकुरुभद्राश्व-
केतुमालसंज्ञकाः नववर्षाः—।

नवशायकाः... गोपो माली तथा तैली तन्त्री मोदकवारुजी।
कुलालः कर्म्मकारश्च नापितो नव सायकाः॥

नष्टचन्द्रः ... नष्टचन्द्रो न दृश्येत भाद्रे मासि सितासिते।
चतुर्थ्यामुदितोऽप्युड्डः प्रतिसिद्धो मनीषिभिः॥

नादः ... नाभेरूर्द्ध्वं हृदिस्थानात् मारुतः प्राणसंज्ञकः।
नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः॥

[अथवा] आकाशाग्निभरुज्जातो नाभेरूर्द्ध्वं समुच्चरन्।
मुखेऽभिव्यक्तिमापन्नः यः स नाद इतीरितः॥

नाम ... उणाद्यन्तं कृदन्तञ्च तद्धितान्तसमासजम्।
शब्दानुकरणं चेति नाम पञ्चविधं स्मृतम्।

नियमः ... अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम्।
अप्रमादश्च सततं पञ्चैते नियमाः स्मृताः व
वायुनाभिहते वायौ गगनाच्च पतत्यधः।
प्रचण्डघोरनिर्घोषो निर्घात इति कथ्यते॥

निसृष्टार्थः ... उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्।

सन्दिष्टः कुरुते कर्म्म निसृष्टार्थस्तु स स्मृतः ॥

नृपो देवांशः ··· अष्टाभिश्च सुरेन्द्राणां मात्राभिनिर्म्मितो नृपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

नेपालदेशः ··· जटेश्वरं समारभ्य योगेशान्तं महेश्वरि ।
नेपालदेशो देवेशि— ।

न्यग्रोधपरिमण्डला स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये चीणा भवेद्या सा न्यग्रोधपरिमण्डला ॥

पंक्तिपावनाः ··· अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः ॥

पञ्चकषायाः ··· जम्बुशाल्मलिवाट्यालं वकुलं वदरं तथा ।
कषायाः पञ्च विज्ञेया सर्व्वकार्य्ये शुभावहाः ॥

पञ्चतत्वम् ··· मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ।
पञ्चतत्वमिदं प्राप्तं साधकाभीष्टदायकम् ॥

पञ्चवटी ··· अश्वत्थो विल्ववृत्तश्च वटधात्र्यावशोककः ।
शास्त्रे पञ्चवटीत्युक्ता— ।

पञ्चवीरगोष्ठम् ··· तत्पञ्चवीरगोष्ठन्तु यत्तु जानपदंसदः ॥

पञ्चाङ्गानि ··· त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य शाखिनः ।
एकतस्यन्तु पञ्चाङ्गम्— ।

[अथवा] ··· तिथिर्व्वारश्च नचत्रं योगः करणमेव च ।
पञ्चाङ्गमेतद्विज्ञेयम्— ।

[अपिच] ··· जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥

[किंवा] जानुबाहुद्वयं मूर्द्धा पञ्चाङ्गम् ।

पञ्चाम्राणि ··· अश्वत्थ एकः पिचुमर्द्द एको द्वौ चम्पकौ त्रीणि च केशराणि ।

	सप्ताथ ताला: नवनारिकेला: पञ्चाम्ररोपी नरकं न याति ॥
पञ्चनदा: ···	वितस्तैरावती चन्द्रभागा सद्रे सरिद्वरा ।
	शतद्रुश्च विपाशा च तेन पञ्चनद: स्मृत: ॥
[अथवा]	किरणाभूतपापा च गुप्ततोया सरस्वती ।
	गङ्गा च यमुना चैव पञ्च नद्य: प्रकीर्त्तिता: ॥
पञ्चरत्नत् ···	विद्रुमं हीरकं नीलं पद्मरागञ्च मौक्तिकम् ।
	पञ्चरत्नमिदं प्रोक्तम्— ।
पञ्च लौहकम् ···	सुवर्णं रजतं ताम्रं रङ्गं नाथं तथैव च ।
	पञ्चलौहमिति प्रोक्तम् ।
परपूर्व्वा ···	पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निसेवते ।
	परपूर्व्वेति सा प्रोक्ता— ।
परमर्षि: ···	ऋषति परमं यस्मात् परमर्षिस्तत: स्मृत: ॥
परमात्मा ···	आत्मास्य जगतो यस्मात् सर्व्वकर्षाश्रयो मत: ।
	परमात्मा परंब्रह्म तेन वेदे प्रकीर्त्तित: ॥
परिवेश: ···	वाताद्यैर्म्मलिनीभूता: सूर्य्याचन्द्रमसो: करा: ।
	मलाभा व्योम्नि दृश्यन्ते परिवेशस्तु संस्मृत: ॥
पर्य्युदास: ···	प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता ।
	पर्य्युदास: स विज्ञेयो यत्रोत्तरपदेन नञ् ॥
पर्व्वाणि ···	चतुर्द्दश्याष्टमी चैव अमावस्या च पूर्णिमा ।
	पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥
पर्य्युषितम् ···	यातयामं गतरसं पूतिपर्य्युषितञ्च तत् ॥
पवित्रम् ···	अन्तर्गभितं साग्रं कौशं द्विदलमेव च ।
	प्रादेशमात्रं विज्ञेयं पवित्रं सर्व्वकर्म्मसु ॥
पाठ: ···	पाठो वाद्याचरोत्कर: ।

पाष (ख)ण्ड: ···पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
(ष) खण्डयन्ति तु तं यस्मात् पा (ष) खण्डस्तेन कीर्त्तिताः॥

पितृबन्धवः ··· पितुः पितुः स्वसुः पुत्राः पितुर्म्मातुः स्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबन्धवः॥

पुंवाक्यम् ··· न च पुंवाक्ये स्वनेकार्थत्वं दोषाय।
पुंवाक्येषु प्रसिद्धवाक्येषु इत्यर्थः।

पुण्यश्लोकाः ··· पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः॥

पुत्रः ··· पुन्नाम्नो नरकात् यस्मात् त्रायते पितरं सुतः।
तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयम्भुवा॥

पुनर्भूः ··· कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पुनर्भुः प्रथमा प्रोक्ता पुनः संस्कारकर्म्मणा॥

पुराणम् ··· सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्च लक्षणम्॥

पूर्णपात्रम् ··· अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते॥

[अथवा] हर्षादुत्सवकाले यदलङ्कारांशुकादिकम्।
आकृष्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत्॥

पूर्त्तम् ··· वापीकूपतड़ागादिदेवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते॥

पृच्छाविधिः ··· ब्राह्मणं कुशलं पृच्छेत् क्षत्रं पृच्छेदनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च॥

पैशाचविवाहः ··· सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाच इति कथ्यते॥

पोष्यवर्गः ··· मातापितागुरुर्भार्ता प्रजा दीनः समाश्रिताः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥

प्राचांरीतिः ··· आचार्य्याणामियं शैली यत्सामान्ये नाभिधाय विशेषेण विवृणोति ॥

प्राड्विकारः ··· विवादानुगतं पृष्ट्वा पूर्व्वं वाक्यं प्रयत्नतः ।
विचारयति ये नासौ प्राड्विकार इति स्मृतः ॥

[अथवा] ··· व्यवहारार्थिकं प्रश्नं पृच्छति प्राड् इति स्थितिः ।
विविचयति यस्तस्मिन् प्राड्विवेकं इति स्मृतः ॥

प्राणायामः ··· प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्रणायामं स विज्ञेयः— ।

प्रायश्चित्तम् ··· प्रायोनाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥

बुद्धीन्द्रियम् ··· मनःकर्णौ तथा नेत्रे रसनात्वक् च नासिके ।
बुद्धीन्द्रियमिति प्रोक्तम्— ।

ब्रह्मावर्त्तः ··· सरस्वतीदृशद्वत्योर्द्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥

ब्राह्मणब्रुवः ··· विप्रसंस्कारयुक्तोऽपि नित्यं सन्ध्यादिकं च यः ।
नैमित्तिकञ्च नो कुर्य्यात् ब्राह्मणब्रुव उच्यते ॥

[अथवा] ··· युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः ।
कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मणब्रुवः ॥

[किंवा] ··· गर्भाधानादिभिर्युक्तस्तथोपनयनेन च ।
न कर्म्मकृन्न चाधीते सज्ञेयो ब्राह्मणब्रुवः ॥

[यद्वा] अध्यापयति नो षिष्यान् नाधीते वेदमुत्तमम् ।
गर्भाधानादिसंस्कारैर्युक्तः स्याद्ब्राह्मणब्रुवः ॥

भगः ··· ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इति स्मृतम् ॥

भगवान् ··· ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥

भर्गः ··· आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः।
जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च॥
ध्यानेन पुरुषैर्यच्च द्रष्टव्यं सूर्य्यमण्डले॥

भारतवर्षम् ··· नाम्नेदं भारतं वर्षं हिमाद्रेस्तच्च दक्षिणे।
तेन हैमवतं नाम परिक्षय्य वसुन्नयेत्॥

[अथवा] हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता।
तस्माच्च भारतं वर्षम्—।

भाष्यम् ··· सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारतः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो जनाः॥

भिन्नकः (रागः) षड्जमध्यमिकोत्पन्नो भिन्नको मध्यमो बहुः।
षड्जग्रहांशो सन्यासो मन्द्रसोऽन्तोऽथवा भवेत्॥
षड्जादिमूर्च्छनः शुद्धः सञ्चारिणी सकाकलिः।
प्रसन्नादियुतो दानवीरे रौद्रेऽद्भुते रसे॥
दिनस्य पश्चिमे यामे प्रयोज्यः सोमदैवतः॥

मदिराः ··· माध्वीकं पानसं द्राक्षं खर्ज्जूरं तालमैक्षवम्।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम्॥
मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव तु॥

मद्रदेशः ··· विराटपाण्ड्ययोर्मध्ये पूर्व्वक्रमेण च।
मद्रदेशः समाख्यातः—।

मधुपर्कम् ··· दधिसर्पिजलं क्षौद्रं सिता चैतैश्च पञ्चभिः।
प्रोच्यते मधुपर्कन्तु—।

मध्यदेश: ··· हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेश: प्रकीर्त्तित: ॥

मध्याह्न: ··· प्रात: कालो मुहूर्त्तान् त्रीन् संगवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तं स्यात्— ।

मलमास: ··· अमावस्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितम् ।
मलमास: स विज्ञेय:— ।

महत्शब्दनौचित्यम्, शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥

महाकाल: ··· अवन्त्यां महाकालस्य मठ एवासीत्—
यस्यां वसति विश्वेशो महाकालवपु: स्वयम् ।
शिथिलीकृतकैलासनिवासव्यसनो हर: ॥

महादेव: ··· ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनां ।
तेषां महत्त्वाद्देवोऽयं महादेव: प्रकीर्त्तित: ॥

[अथवा] महती पूजिता विश्वे मूलप्रकृतिरीश्वरी ।
तस्या: देव: पूजितश्च महादेवस्तत: स्मृत: ॥

महानिशा ··· महानिशा तु विज्ञेया मध्यमप्रहरद्वयम्॥

महापातकानि ··· ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागम: ।
महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चम: ॥

महापुरश्चरणलक्षणम्, सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासनावार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ॥
महापुराणं विज्ञेयमेकादशकलक्षणम् ॥

महाप्रसाद: ··· पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषित: ।

महाप्रसाद इत्युक्तं ग्राह्यं विष्णोः प्रयत्नतः ॥

महाभारतम् ··· चत्वारश्चैकतो वेदा भारतञ्चैतदेकतः ।
पुरा किल सुरैः सर्व्वैः समस्य तुलया धृतम् ॥
चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा ।
तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते ॥
महत्त्वात् भारतत्वाच्च महाभारतमुच्यते ।

महारथः ··· एकादशसहस्राणि योधयेद्यस्तु धन्विनाम् ।
शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः ॥

महारातिः ··· ब्राह्मणस्य निपातेन महाकल्पो भवेन्नृप ।
प्रकीर्त्तिता महारातिः । अर्द्धरात्रात् परं यत्तु
मुहूर्त्तद्वयमुच्यते । सा महारात्रिरुद्दिष्टा ॥

महारोगाः ··· उन्मादो राजयक्ष्मा च श्वासस्त्वग्दोष एव च ।
मधुमेहश्चाश्मरी च तथोदरभगन्दरौ ॥
इत्येतेऽष्टौ महारोगा महापातकसम्भवाः ॥

महाशङ्खः ··· नृललाटास्थिखण्डेन रचिता जपमालिका ।
महाशङ्खमयी माला तारा विद्याजपे प्रिये ॥

मातरोऽष्टौ ··· ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥

मुखम् ··· ओष्ठौ च दन्तमूलानि दन्तजिह्वा च तालु च ।
गलो गलादिसकलं सप्ताङ्गं मुखमुच्यते ॥

मुनिः ··· दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते ॥

मूर्च्छना ··· स्वरसंमूर्च्छितो यत्र रागतां प्रतिपद्यते ।
मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवाः ॥

मेदिनी ...	मधुकैटभयोरासीत् मेदसैव परिप्लुता । तेनेयं मेदिनी देवी प्रोच्यते तत्त्वदर्शिना ॥
यक्षकर्द्दमः ...	कुङ्कुमागुरुकस्तूरी कर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्द्दमः ॥
यमः ...	अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्मषम् । अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च ॥
यात्रास्मरणीयाः ...	वैण्यं पृथुं हैहयमर्ज्जुनञ्च शाकुन्तलेयं भरतं नलञ्च । एतान्नरान् यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च ॥
योगक्षेमौ ...	अप्राप्तप्रापणं योगः क्षेमप्राप्तस्य रक्षणम् । द्वयञ्च साधयेद्भूप प्रजानां विधिवत् प्रदः ॥
रत्नम् ...	जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते ॥
रत्नत्रयम् ...	सद्वृत्तिज्ञानवृत्तानि धर्मं धर्मेश्वराः जगुः ॥
लक्षणम् ...	मुख्यार्थबाधे तद्योगे तयान्योऽर्थः प्रतीयते । रूढ़ेः प्रयोजनाद्वापि लक्षणा शक्तिरर्पिता ॥
लयविधा ...	द्रुतो मध्यो विलम्बश्च लयः स त्रिविधो मतः ॥
लावण्यम् ...	मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥
वकवृत्तिः ...	अर्व्वाक् दृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ॥
वनमाला ...	आपादलम्बिनीं मालां वनमालां विदुर्बुधाः।
वन्दनमाला ...	द्वाराद्बहिः संस्थिताया रचिता कुसुमादिभिः । पिशुना मङ्गलानां वै सा स्याद्वन्दनमालिका ॥
वज्रवारकाः ...	जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्यपुलहो जिष्णुः षडेते वज्रवारकाः ॥

तथा ... मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात्।
विद्युदग्निभयं नास्ति लिखिते च गृहोदरे॥

वर्षपर्व्वताः ... हिमवान् हेमकूटश्च निषधो मेरुरेव च॥
श्वेतो नीलश्च शृङ्गी च सप्तैते वर्षपर्व्वताः।

वलन्तिका (रागः) वलन्तिका तदुपाङ्गं स्याद्रिहीनामन्द्रदेवता।
सन्यासांशग्रहा (सा तु) शृङ्गारे शाङ्गिंणोदिता॥

वाङ्मती ... हिमाद्रेस्तुङ्गशिखरात् प्रोद्गता वाङ्मती नदी॥

वामकम् (संस्थानम्)युतेन शिरसा यत्तु पार्श्वेन वलितेन च।
तद्वामकं करणं पार्श्वस्थस्यावलोकने॥

वार्त्तिकम् ... उक्तानुक्तदुरुक्तार्थव्यक्तकारि तु वार्त्तिकम्॥

विप्रलब्धा ... प्रियः कृत्वा तु संकेतं यस्यानायाति सन्निधिम्।
विप्रलब्धेति सा ज्ञेया—।

विप्रलम्भः ... युक्तायुक्तयोर्भावो युक्तयोर्व्वाथवा मिथः।
स्वाभीष्टालिङ्गनादीनामनवाप्तौ प्रहृष्यते।
स विप्रलम्भो विज्ञेयः—।

विलक्षः ... आत्मनश्चरिते सम्यक् ज्ञातेन्येर्य्यस्य जायते।
अपत्रपातिमहती स विलक्ष इति स्मृतः॥

विश्वेदेवा ... क्रतुर्द्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः।
रोचकश्चाद्रवश्चैव तथाचान्यः पुरूरवाः॥
विश्वेदेवा भवन्तीति दश श्राद्धेषु पूजिताः॥

विष्णुः ... यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः।
तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्॥

वृकोदरः ... यस्य तीक्ष्णो वृकोनाम जठरे हव्यवाहनः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥

वृत्तम् ... गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रः ।
प्रवर्त्तनं हितानाञ्च तत् सर्वं वृत्तमुच्यते ॥

वृत्तगन्धि ... भवेत्युत्कलिकाप्रायं समासाद्यं दृढ़ाचरम् ॥
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम् ॥

वृषली ... पितुर्गृहे च या नारी रजः पश्यतासंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥

वेदाङ्गानि ... शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनञ्चैवं वेदाङ्गानि षड़ेव तु ॥

वेदाधिपाः ... ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपो भृगुः ।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदपः ॥

वेदाभ्यासः... वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदभ्यासो हि पञ्चधा ॥

वेड़ालव्रतम् ... यस्य धर्म्मध्वजो नित्यं शक्रध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥

व्यवहारः ... स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥

[अन्यच] ... परस्परमनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यात् न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥

व्यसनम् ... मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥

शक्यमव्यकल्पाः ... शक्यन्तु सुरं कर्म्म भव्यन्तु जनलालितम् ।
कल्पयुक्तं न भङ्गेन सदैवैष समाचरेत् ॥

शिखरिणी... एलालवङ्गकर्पूर-सुरभिद्रव्यमिश्रितं।
दुग्धेन सह गालितं सितासङ्गतं वै दधि॥
दध्यतिरिक्तपूर्व्वोक्तद्रव्यमिश्रित:
पर्व्वकदलीफलान्त:सारो वा॥

श्मशानम् ... श्मन् शब्देन शव: प्रोक्त: शानं तत्स्थानमुच्यते।

श्यामास्त्री ... शीतकाले भवेदुष्णा ग्रीष्मकाले च शीतला।
तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कीर्त्तिता॥

श्रीपूर्व्वम् ... देवं गुरुं गुरुस्थानं चैव चैवाधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत्॥

श्रोत्रिय: ... एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च।
षट्कर्म्मनिरतो विप्र: श्रोत्रियो नाम धर्म्मवित्॥

[अथवा] जन्मना ब्राह्मणो ज्ञेय: संस्कारैर्द्विज उच्यते।
विद्यया याति विप्रत्वं त्रिभि: श्रोत्रिय उच्यते॥

षट्प्रज्ञा ... धर्म्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि।
षट्सु प्रज्ञातु यस्यासौ षट्प्रज्ञा परिकीर्त्तिता॥

षट्नञर्था: ... तत्साद्दश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्था: षट् प्रकीर्त्तिता:॥

षड़ज:.(स्वरभेद:) नासाकण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रित:।
षड्भ्य: संजायते यस्मात् तस्मात् षड़्ज इति स्मृत:॥

षड़्रसा: ... मधुरं लौल्यमित्याहुरिक्षादौ स च लक्ष्यते।
लवणस्तु पटु: प्रोक्त: सम्भवादौ स दृश्यते॥
तिक्तस्तु पिचुमर्द्दादौ व्यक्तमास्वाद्यते रस:।
कषायस्तुवरस्सूक्त: स च पूगफलादिषु॥
कटुस्तु तीक्ष्णसंज्ञ: स्यात् मरिचादौ स दृश्यते॥

षोड़शाङ्गधूपः ... गुग्गुलं सरलं दारुपत्रं मलयसम्भवम् ।
क्लीवेरमगुरुं कुष्ठं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाचां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं दैवे पैवे च कर्म्मणि ॥

षोड़शोपचारः ... आसनं स्वागतं पाद्यमर्घमाचमनीयकम् ।
मधुपर्काचमनं स्नानं वसनाभरणानि च ॥
गन्धपुष्पे धूपदीपौ नैवेद्यं बन्धनं तथा ॥

संस्कारः ... संस्कारो गन्धमाल्याद्यैरधिवासनमुच्यते ॥

सङ्गतिः ... सप्रसङ्गः उपोद्घातो हेतुतावसरस्तथा ।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते ।

सङ्गीतम् ... नृत्यगीतञ्च वाद्यञ्च सङ्गीतं तत्र भाषितम् ।

सदाचारः ... सरस्वतीदृषद्वत्योर्द्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचचते ।
तस्मिन् देशे यः आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार इष्यते ॥

[अथवा] ... साधवः चीणदोषाश्च सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥

सन्दर्भः ... गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा ।
तानर्थवत्त्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः ॥

सन्ध्या ... त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टये ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥
अहोरात्रस्य यः सन्धिः सूर्य्यनचत्रवर्ज्जितः ॥
सा च सन्ध्या समाख्याता— ।

सन्न्यासः ... काम्यानां कर्म्मणां त्यागं सन्न्यासं कवयो विदुः ॥

सप्तजिह्वाः ··· काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णाः।
उग्रा प्रदीप्ता च कपिटयोनेः सप्तैव जिह्वाः किल कल्पिताश्च ॥

सप्तधातवः ··· रसासृमांसमेदोऽस्थिमज्जानः शुक्रसंयुताः।
शरीरस्था इमे ज्ञेयाः पण्डितैः सप्तधातवः ॥

सप्त पातालानि··· अतलं वितलञ्चैव नितलञ्च क्रमादधः।
महातलञ्च सुतलं पातालं सप्तकीर्त्तितम् ॥

सप्तमहाद्वीपाः ··· जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥

सप्तराज्याङ्गानि, साम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥

सप्त सागराः··· नवनीतसुरासर्पिर्दधिदुग्धजलान्तकाः ॥

समह्वयः ... प्राणिभिः क्रियते यस्तु स विज्ञेयः समह्वयः ॥

सम्प्रतिपत्तिः ··· श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते।
सा तु सम्प्रतिपत्तिः स्यात्—॥

सम्प्रदायः ··· शिष्टानुशिष्टगुरूपदिष्टमार्गः सम्प्रदायः ॥

सम्भोगः ··· दर्शनस्पर्शनादीनि निसेवेते विलासिनी।
यत्रानुरक्तावन्योऽन्यः स सम्भोगः उदाहृतः ॥

सम्राट् ... येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः।
शास्ति यश्चाज्ञया राज्ञः स सम्राट् कथितो बुधैः ॥

सर्व्वगन्धम् ... चतुर्जातककर्पूरकक्कोलागुरुकुमकुमम्।
लवङ्गसहितं चैव सर्व्वगन्धं प्रकीर्त्तितम् ॥

सर्व्वतोभद्रप्रासादः, षोड़शास्रसमायुक्तो नानारूपसमन्वितः।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥

साधुलक्षणम् ... न प्रहृष्यति सम्माने नावमाने च कुप्यति।

न क्रुद्धः पौरुषं ब्रूयादेतद्धि साधुलक्षणम् ॥

साध्वी ··· आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता ॥

सान्तपनम् ··· गोमूत्रं गोमयं चोरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः ॥

साहसं ··· मनुष्यमारणं स्तेयं परदाराभिमर्षणम् ।
पारुष्यमनृतं चैव साहसं पञ्चधा स्मृतम् ॥

सिधुः ··· इक्षोः पक्वरसैः सिद्धः सिधुरित्यभिधीयते ॥

सुषुप्तम् ··· यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन ।
सुप्तं पश्यति तत् सुषुप्तम्—॥

सूर्य्यकरसम्पृक्तश्चन्द्रः, तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि
चन्द्रचन्द्रिकाभिश्चकास्ति ।
तदितरदिशि बालाकुण्डलश्यामलश्रीर्घट इव निजमूर्त्ति-
च्छायायैवातपस्थः॥

सौन्दर्य्यम् ··· अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम् ।
सुश्लिष्टः सन्धिबन्धः स्यात् तत् सौन्दर्य्यमुदाहृतम् ॥

स्तयम् ··· प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा ।
यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम् ॥

स्पृष्टकम् ··· यद्योषितः सन्मुखमागताया अन्यापदेशाद् व्रजतो नरस्य ।
गात्रेण गात्रं घटते तदेतदालिङ्गनं स्पृष्टकमाहुरार्य्याः ॥

स्मृतिः ··· वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् ।

स्वर्गः ··· यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत् सुखं सपदास्पदम् ॥

हंसनादिनी ··· गजेन्द्रगमना तन्वी कोकिलालापसंयुता ।
नितम्बे गुर्व्विणी या स्यात् सा स्मृता हंसनादिनी ॥

समाप्तोऽयं ग्रन्थः ।

सूचीपत्रम् ।

शुद्धिपत्रम् ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
५	३	निरतिशयो	निरतिशयः
१४	४	प्रणयस्य गभीरता	प्रणयगभीरता
”	”	विकाशिनीं भारतीं	विकाशिनी भारती
”	”	कविः	कविना
”	९	पमित्या	पमितं
”	१४	विसर्ज्जनं	विसर्ज्जयतः
२१	७	प्रहिता	प्रहितया
”	८	मालिका	मालिकया
२२	१	नायिकाप्रतीतेः	नायिकायाः प्रतीतेः
”	६	दारामीप	दारामव
२६	८	काव्यकृतौ	काव्यकृति
”	१०	सन्निवेशः	सन्निवेशेन
”	१३	मुत्तमत्वे	मुत्तमत्वेन
”	”	विधेयै	विधेयै
२७	६	तामति	ताति
२७	१२	चाय	चय
”	१३	हृदयतायां	हृदयानां
२८	८	प्रागल्भ्यवती	प्रगल्भवती
”	१५	शकुन्तला	शकुन्तला
३१	”	राज्ञः	राज्ञा
३२	१६	सन्दिहते	सन्दिहन्ते
३८	९	मैत्राभावं	मैत्रीभावम्
४२	१	त्यापर	त्यपर
”	१८	वासनयन्ति	वासनन्ति

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
४३	१६	कवितेति	कविनेति
”	”	सन्दहा	सन्देहा
४९	६	तादृगेव	तादृश्येव
५२	७	राज्ञोजयचन्द्रस्य	जयचन्द्रस्य
५३	१४	कथथत्	कथयत्
५४	३	प्रणयति	प्रीणयति
”	९	सारयति	सारयन्ति
”	१३	नव	नैव
५८	५	चतुर्द्दशी	चतुर्द्दश
”	१२	कतिचित्	कियत्
”	१९	शताब्द्यां	शताब्दस्य
५९	८	मिभेण	मिषेण
६०	४	शस्तु	श्मश्रु
”	१२	पुवत्राः	पुत्रा
६३	१	पाठे	पाठेन
६४	१०	मातन्वितेति	मातनोति
६५	१	सुन्दर्य्याः	सुन्दर्य्या
”	१४	चौरं इति	चौर' इति
”	१९	रत्नाद्भवः	रत्नोद्भवः
६६	१	पुष्पोद्भवस्य	पुष्पोद्भवेन
”	”	पित्रास्त्राणं	पितोस्त्राणं
६७	७	वर्म्मणोवधः	वर्म्मणाचण्डवर्म्मणोवधः
”	१०	वसुमत्य	वसुमत्यै
७१	१	स्नाविणी	स्नावि

	पंक्तौ	अशुद्धम्	शुद्धम्
७२	१२	त्यागमुत्	त्यागोत्
,,	१७	प्रभवति	प्रभवन्ति
७३	४	दधाति	दधति
,,	७	शालिनं	शालि
,,	,,	संसार	संसारः
,,	८	नम्यते	नमति
,,	१७	तमिस्रा	तमिस्रां
७५	८	दपह्वयते	दपह्वरति
७६	३	शकाब्दामेवा	शकाब्द एवा
,,	५	शकाब्दि	शकाब्द
७८	१६	भातकुवरस्य	भीतकुवेरस्य
८६	११	आकर्षयति	आकर्षति
८८	२	प्रोज्झिताः	प्रोज्झितम्
,,	१४	कवेरपरि	कविनापरि
९२	३	प्रणयन्ति	प्रीणयन्ति
९३	११	निपीडने	निपीड़नेन
९५	१७	जन	जनन
९६	८	बुद्धते	बुद्ध्यते
,,	२०	तस्या	तस्याः
९७	२०	माकर्ण्यपि	माकर्णापि
९८	१०	दूषित	दूषितां
९९	५	वर्त्तयतु	वर्त्तयतुं
,,	९	पुरसुप	पुरोप
१००	१४	धन्योऽयं	धन्यमिदं
,,	१४	मयो	मयं

शुद्धिपत्रम् ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१००	१५	वर्षः	वर्षं
१०२	१७	मनयत्	रमवत्
१०४	७	मौषेण	मिषेण
,,	१२	शकुन्तलां	शकुन्तला
,,	१५	विदधानः	विदधाति
१०५	७	तस्येय	तस्याय
१०७	४५	शताव्दी	शताव्दः
१०७।११०	१०।१	शकाव्द्यां	शकाव्दे
१०८।११०	५।१०	शताव्दी	शताव्दस्य
१०९	१६	कालिनत्वं	कालीनत्वं
१०९	१८	वद्घानि	वध्नाति
१११	१३	दुदन्तं	दुदन्तः
,,	,,	समीचीनमिति	समीचीन इति
११६	१७	चेदं	चेमं
१३८	१५	अभिमानमहङ्कार	अभिमानोऽहङ्कार
१४२	१७	तुष्टिष्यति	क्रटिर्नमविष्यति
		मदन्	मदुः
१४४	१	प्रमाणां	प्रमाणम्
,,	६	तदुत्तरे	तदुत्तरेण
१५९	८	विपश्चिदां	विपश्चितां
१५९	२१	शताव्द्याः	शताव्दस्य
२१५	७	दृश्यते	न दृश्यते
२१६	३	शपत्रयः	शपत्राः
२१७	१६	तिष्ठथः	तिष्ठथ
२२०	५५	स्वसुस्पृहां	स्वसुखस्पृहां

शुद्धिपत्रम् ।

पृष्ठे		पंक्ती		अशुद्धम्		शुद्धम्
२२१	...	११	...	पिवाज्ञानु	...	पिवाज्ञाननु
२३०	...	१७	...	सा:	...	सा
२०१	...	७	...	कत्वा	...	कत्व
,,	...	११	...	आत्मा	...	आत्म
,,	...	१७	...	निर्णय:	...	निर्भरर:
२०२	...	५	...	समवाय:	...	०
२३६	...	६	...	यय ं	...	यय ं
,,	...	७	...	एककशो	...	एकैकशो
२३९	...	१	...	नन ं	...	नून ं
२४०	...	१४	...	नति	...	नाति
२४२	...	८	...	कियद्दय ं	...	कियद्दर ं
,,	...	१३	...	विश्वस्रजा	...	विश्वस्रजा
,,	...	११	...	द्दष्कृत	...	दुष्कृत
२४६	...	११	...	कार: निकार:	...	करनिकर:
२४७	...	४	...	वहुकमानवर्णा:	...	वहव: मानववर्णा:
२५३	...	४	...	कि	...	क:
२५९	...	७	...	कल्पते	...	कल्प्यते
,,	...	१०	...	परम्प	...	परस्प
,,	...	१३	...	कातल्य	...	कैवल्य
,,	...	१७	...	समजायते	...	संजायते
२६०	...	६	...	मर्त्त्य	...	स्वर्ग
२६१	...	४।७	...	कारानि	...	कारीणि
,,	...	८	...	इत्यादी	...	इत्यादी
२६३	...	५	...	किमिपि	...	किमपि
२३३	...	७	—	विको	—	विकी
,,		९		रग ं		रग्यं

प्रेषणीयं पत्रम् ।

वर्त्तमानख्रीष्टाब्दीयडिसेम्बरमासाभ्यन्तरे स्वस्वनामधामादिपूरणेन निम्नलिखितस्थाने प्रेषितेऽस्मिन् पत्रे ग्राहकाणां विनाव्ययेन पुस्तकस्यास्यावशिष्टांशं लिखितस्थाने प्रेरयिष्यामो वयमिति ।

ग्राहक नं 499. V.P.N. 76. 17-4-17.

श्री

C/o

ग्राम (Village.)

पोष्ट (P. O.)

जिला (Dist.)

तारिख

सन

श्रीअखिलबन्धु भट्टाचार्य्य

संस्कृतपुस्तकालय ।

५८ नं कर्णओयालिस् ष्ट्रीट्, कलिकाता ।

यन्त्रस्थपुस्तकानि ।

सटीकसांख्यसारः, सटीकवङ्गानुवादगौरपादभाष्यसहसांख्यकारिका, मणिप्रभासहयोगसूत्रम्, सटीकवङ्गानुवादभोजप्रबन्धः, सटीककविरहस्यम्, सटीकवङ्गानुवादद्वात्रिंशत्पुत्तलिका ।

कतिपय पुस्तक ।

१। मालविकाग्निमित्र। मञ्जुभाषिणी नाम्नी निरन्तरा टीकाके साथ (पक्कि जिल्द) मूल्य १।)
२। दशकुमारचरित। (पाठ्यतक) विद्योतनी नाम्नी निरन्तरा व्याख्या और वङ्गभाषादि परिशोभित हैं (पक्कि जिल्द) मूल्य १।)
३। सारमञ्जरी। बालबोधिनी टीकाके साथ मूल्य ॥)
४। प्राकृतप्रकाश। (परिशिष्ट सह) प्राकृतभाषाके व्याकरण मूल्य ॥⁄)
५। लिङ्गानुशासन। वङ्गानुवाद और अतिविस्तृत वृत्तिके साथ मूल्य ।)
६। संस्कृतशिक्षा और रचनाप्रणाली (इं सं) मूल्य ॥)
७। संस्कृतमञ्जरी। ईशवनीति प्रभृति ग्रन्थसे सङ्कलित बालकोंकों विशेष उपयोगी हैं मूल्य ।)
८। उक्तिका अर्थ ॥⁄)
९। लकारार्थ-निर्णय। दशलकारका शक्तिप्रभृति निर्णयात्मक हैं ⁄)
१०। सटीक मीमांसा परिभाषा। अतिविस्तृत टीकाके साथ ॥)
11. Helps to additional Sanskrit most useful as a text-book for additional study in Sanskrit. Price Ans. 8.

संस्कृत पुस्तकालय।

प्रकाशक—श्रीअखिलबन्धु भट्टाचार्य्य।

२८ नं० कर्णवायालिस् ष्ट्रीट्, कलकत्ता।

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर छै नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा ।

19 MAY 1964
१/८(कर्णि)

१००००.६ ५६।